CC-0. Digitized by eGangotri and MIDF- Delhi

८३

सिद्धान्त संग्रह वर्ग

श्रीसम्वत् १८१६ [illegible]

[illegible]

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥अ॰ को॰॥
॥१॥

क्ष्माभृद्वनौषधिमृगादिभिः ॥ नृब्रह्मक्षत्रविट्शूद्रैः सांगोपांगैरिहोदिताः ॥१॥ भूर्भूमिरच
लानंतारसाविश्वंभरास्थिरा ॥ धराधरित्रीधरणीक्षोणीज्याकाश्यपीक्षितिः ॥२॥ सर्वंसहा
वसुमतीवसुधोर्वीवसुन्धरा ॥ गोत्राकुःपृथिवीपृथ्वीक्ष्मावनिर्मेदिनीमही ॥३॥ मृन्मृत्तिका
प्रशस्तातुमृत्सामृत्स्नाचमृत्तिका ॥४॥ उर्वरासर्वसस्याढ्यास्यादूषःक्षारमृत्तिका ॥४॥ ऊषवा
नूषरोद्वावप्यन्यलिंगौस्थलंस्थली ॥ समानौमरुधन्वानौद्वेखिलाप्रहतेसमे ॥५॥ त्रिष्वथो
जगतीलोकोविष्टपंभुवनंजगत् ॥ लोकोयंभारतंवर्षंशरावत्यास्तुयोवधेः ॥६॥ देशःप्राग्द
क्षिणःप्राच्यउदीच्यःपश्चिमोत्तरः ॥ प्रत्यन्तोम्लेच्छदेशःस्यान्मध्यदेशस्तुमध्यमः ॥७॥ आर्या
वर्तःपुण्यभूमिर्मध्यंविंध्यहिमालयोः ॥ नीवृज्जनपदोदेशविषयौतूपवर्तनं ॥८॥ त्रिष्वागोष्ठा
न्नड्प्रायेनड्वान्नड्वलमित्यपि ॥ कुमुद्वान्कुमुदप्रायेवेतस्वान्बहुवेतसे ॥ शाद्वलःशादहरिते

॥को॰ २॥
॥१॥

भू॰ १ ॥२॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सजंबाले तु पंकिलः॥ जलप्रायमनूपं स्यात्पुंसि कच्छस्तथाविधः॥१०॥ स्त्री शर्करा शर्करिलः शा
र्करः शर्करावति॥ देश एवादिमावेवमुन्नेयाः सिकतावति॥११॥ देशो नद्यंबुवृष्ट्यंबुसंपन्न
व्रीहिपालितः॥ स्यान्नदीमातृको देवमातृकश्च यथाक्रमं॥१२॥ सुराज्ञि देशे राजन्वा
न्स्यात्ततोन्यत्र राजवान्॥ गोष्ठं गोस्थानकं तत्तु गौष्ठीनं भूतपूर्वकं॥१३॥ पर्यंतभूः परि
सरः सेतुराली स्त्रियां पुमान्॥ वामलूरश्च नाकुश्च वल्मीकं पुंनपुंसकं॥ अयनं वर्त्म मा
र्गाध्वः पंथानः पदवी सृतिः॥ सरणिः पद्धतिः पद्या वर्त्तन्येकपदीति च॥१५॥ अतिपंथाः सुप
न्थाश्च सत्पथश्चार्चितेध्वनि॥ व्यध्वो दुरध्वो विपथः कदध्वा कापथः समाः॥१६॥ अपंथा
स्त्वपथं तुल्ये शृंगाटकचतुष्पथे॥ प्रांतरं दूरशून्योध्वा कांतारं वर्त्म दुर्गमं॥१७॥ गव्यू
तिः स्त्री क्रोशयुगं नल्वः किष्कुचतुःशतं॥ घंटापथः संसरणं तत्पुरस्योपनिष्करं॥१८॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

अ.को.

इतिभूमिवर्गः॥:॥उपकंठःप्रदेशास्तु उपवर्गइतिस्मृतः॥द्यावापृथिव्यौरोदस्यौ

॥२॥ द्यावाभूमीचरोदसी॥दिवःपृथिव्यौ जातुरुमास्याल्लवणाकरः॥२॥पूःस्त्रीपुरीनग

र्यौवापत्तनंपुटभेदनम्॥स्थानीयंनिगमोन्यत्तुयन्मूलनगरात्पुरम्॥३॥तच्छाखानग

४ वेशो रंवेश्याजनसमाश्रयः॥आपणस्तुनिषद्यायांविपणिःपण्यवीथिका॥ ॥रथ्याप्र

तोलीविशिखास्याच्चयोवप्रम स्त्रियाम्॥प्राकारोवरणःसालःप्राचीनंप्रांततोवृतिः॥४॥

भित्तिःस्त्रीकुड्यमेडूकंयदन्तर्न्यस्तकीकसम्॥गृहंगेहोदवसितंवेश्मसद्मनिकेतनम्

॥५॥निशान्तपस्त्यसदनंभवनागारमंदिरम्॥गृहाःपुंसिचभूम्न्येवनिकाय्यनिल श्रीः

यालयाः॥६॥वासःकुटीद्वयोःशालासभासंजवनंत्विदम्॥चतुःशालंमुनीना ॥२॥

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नुपर्णशालोटजोऽस्त्रियां ॥७॥ चैत्यमायतनंतुल्ये वाजिशालातुमन्दुरा ॥ आवेशनंशि
ल्पशालाप्रपापानीयशालिका ॥ मठश्छात्रादिनिलयोगंजातुमदिरागृहम् ॥८॥
गर्भागारंवासगृहमरिष्टंसूतिकागृहं ॥ वातायनंगवाक्षोऽथमंडपोऽस्त्रीजनाश्र
यः ॥१०॥ हर्म्यादिधनिनांवासः प्रासादोदेवभूभुजां ॥ सौधोऽस्त्रीराजसदनमुपका
र्योपकारिका ॥११॥ स्वस्तिकःसर्वतोभद्रोनंद्यावर्तादयोऽपिच ॥ विच्छन्दकःप्रभेदाहिभ
वन्तीश्वरसद्मनां ॥१२॥ स्त्र्यगारंभूभुजामन्तःपुरंस्यादवरोधनम् ॥ शु
द्धान्तश्चावरोधश्चस्यादट्टःक्षौममस्त्रियाम् ॥१३॥ प्रघाणप्रघणालिन्दा
बहिर्द्वारप्रकोष्ठके ॥ गृहावग्रहणीदेहल्यङ्गणंचत्वराजिरे ॥१४॥ अधस्ताद्दा



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

अ·को
॥३॥

गोधिका नासा दारूपरि स्थितम् ॥ प्रच्छन्नमन्तर्द्वारं स्यात्पक्षद्वारं तु पक्षकम् ॥
वलीकनीध्रे पटलप्रान्तेऽथ पटलं छदिः ॥ गोपानसी तु वलभी छादने वक्रदारुणि ॥
कपोतपालिकायां तु विटङ्कं पुन्नपुंसकम् ॥ स्त्री द्वार्द्वारं प्रतीहारः स्याद्वितर्दिस्तु
वेदिका ॥ तोरणोऽस्त्री बहिर्द्वारं पुरद्वारं तु गोपुरम् ॥ कूटं पूर्द्वारि यद्धस्तिनख
स्तस्मिन्नथ त्रिषु ॥१८॥ तद्धिस्के [illegible] ॥ आरोहणं स्यात्सोपानं निश्रे
णिस्त्वधिरोहणी ॥ सम्मार्जनी सोधनी स्यात् संकरोऽवकरस्तथा ॥ क्षिप्ते मुखं निः
सरणं सन्निवेशो निकर्षणं ॥ समौ सम्वसथग्रामौ वेश्मभूर्वास्तुरस्त्रियाम् ॥
ग्रामान्त उपशल्यं स्यात्सीमसीमे स्त्रियामुभे ॥ घोष आभीरपल्ली स्यात्पक्कणः शब

श्रीः
॥३॥

कपाट नगरे [illegible] ४

CC-0. Digitized by eGangotri and MIDF- Delhi
Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

महीध्रे शिखरिक्ष्माभृदहार्यधरपर्वताः॥ अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः॥१॥ लोकालो
कश्चक्रवालस्त्रिकूटस्त्रिककुत्समौ॥ अस्तस्तु चरमक्ष्माभृदुदयः पूर्वपर्वतः॥२॥ हिमवान्निषधो
विन्ध्यो माल्यवान्पारियात्रिकः॥ गन्धमादनमन्ये च हेमकूटादयो नगाः॥३॥ पाषाणप्रस्तरग्रावो
पलाश्मानः शिला दृषत्॥ कूटोस्त्री शिखरं शृङ्गं प्रपातस्त्वतटो भृगुः॥४॥ कटकोस्त्री नितं(
बोद्रेः स्नुः प्रस्थः सानुरस्त्रियाम्॥ उत्सः प्रस्रवणं वारिप्रवाहो निर्झरो झरः॥५॥ दरी तु कंदरो वा स्त्री दे
वखातबिले गुहा॥ गह्वरं गण्डशैलास्तु च्युताः स्थूलोपला गिरेः॥६॥ खनिः स्त्रियामाकरः स्यात्पा
दाः प्रत्यन्तपर्वताः॥ उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका॥७॥ धातुर्मनःशिलाद्यद्रेर्गैरिकं
तु विशेषतः॥ निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे॥८॥ इति शैलवर्गः॥ अटव्यरण्यं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वन्ध्योऽफलोऽवकेशी च फलवान्फलिनः फली ॥ प्रफुल्लोत्फुल्लसंफुल्लव्याकोशविकच
स्फुटाः ॥ फुल्लश्चैते विकसिते स्युरवन्ध्यादयस्त्रिषु ॥ स्थाणुर्वा ना ध्रुवः शङ्कुः ह्रस्वशाखाशिफः

अटवी अरण्यं विपिनं गहनं काननं वनं ॥ महारण्यमरण्यानी गृहारामास्तु निष्कुटाः ॥१॥ आरामः स्यादुपवनं कृत्रि
मं वनमेव यत् ॥ अमात्यगणिकागेहोपवने वृक्षवाटिका ॥२॥ पुमानाक्रीड उद्यानं राज्ञः साधा
४ रणं वनं ॥ स्यादेतदेव प्रमदवनमन्तःपुरोचितं ॥ वीथ्यालिरावलिः पंक्तिः श्रेणी लेखास्तु राज
यः ॥ वन्या वनसमूहे स्यादङ्कुरोऽभिनवोद्भिदि ॥४॥ वृक्षो महीरुहः शाखी विटपी पादपस्तरुः ॥
अनोकहः कुटः सालः पलाशी द्रुद्रुमागमाः ॥ पुष्पवान् वनस्पत्यः फलैः पुष्पात्तैरपुष्पाद्वनस्पतिः ॥
ओषध्यः फलपाकान्ताः स्यादवन्ध्यः फलेग्रहिः ॥६॥ अप्रकाण्डे स्तम्बगुल्मौ वल्ली तु व्रततिर्लता ॥
लता प्रतानिनी वीरुद् गुल्मिन्युलप इत्यपि ॥७॥ नगाद्यारोह उच्छ्राय उत्सेधश्चोच्छ्रयश्च सः ॥
अस्त्री प्रकाण्डः स्कन्धः स्यान्मूलाच्छाखावधिस्तरोः ॥८॥ समे शाखालते स्कन्धशाखाशाले
शिफाजटे ॥

धन:

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



यात्ववाश्रिफावतेह: स्यान्मृतीर्या गंगता टेता ॥ ९ ॥ शिरो गंशिरोयं वा नामस तेव्र धोऽन्हि नाम
के: ॥ तारोम स्नानसमो त्वकणीवत्कं वत्को टे मसि ह्रिया ॥ १० ॥ काष्ट दार्विन्धनं त्वे धऽधमेध:
समित्ह्रियां ॥ निस्कु ह: कोरः वा ना वस्तुर्पिस्रोशिह्रियो ॥ ११ ॥ पत्रे प ताश्रां छद द नद लेप
र्ले छद: प्रमाने ॥ पलुवो स्त्रीक्लि मत्रेयविला ताविट पो हि्रयां ॥ १२ ॥ वृक्षा दीनां फलेस
स्यवंजेप्रसवंव-धनमा ॥ आमेफ केप्पा ताटुस्याछुप्पौ वा नमु मेथिषु ॥ १३ ॥ श्याको जालेक
लीवे कोलिका कोरके: पुमाने ॥ स्यान्गुच्छ कल्सृत वके: कुप्न लौ मुकुलो ऽस्त्रियाम् ॥ १४ ॥
स्त्रिप: सुमनस: पुष्प प्रसून कुसुमंसुमं ॥ मकरंद: पुष्परस: परागः सुमनोरज: ॥ १५ ॥ द्विहीने
प्रसवे सर्वं हरीतक्यादयः स्त्रियाम् ॥ आश्वत्थवैणवप्लाक्षनैयग्रोधैंगुदं फले ॥ १६ ॥ वार्हतंच
फले जंबा जंबूः स्त्री जंबु जाम्बवम् ॥ पुष्पे जातीप्रभृतय: स्वलिंगाव्रीहय: फले ॥ १७ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अकाण्ड विदार्याद्यास्तु मूलेपि पुष्पे क्लीबेपि पाटला ॥ बोधिद्रुमश्चलदलः पिप्पलः कुञ्जराशनः ॥ १८ ॥
अश्वत्थेऽथ कपित्थे स्युर्दधित्थग्राहिमन्मथाः ॥ तस्मिन्दधिफलः पुष्पफलदन्तशठावपि ॥
॥ ५ ॥ १९ ॥ उदुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः ॥ कोविदारे चमरिकः कुद्दालो युगपत्रकः ॥ २० ॥
सप्तपर्णो विशालत्वक् शारदो विषमच्छदः ॥ आरग्वधे राजवृक्षशम्याकचतुरङ्गुलाः ॥ २१ ॥
आरेवतव्याधिघातकृतमालसुवर्णकाः ॥ स्युर्जम्बीरे दन्तशठजम्भजम्भीरजम्भलाः ॥ २२ ॥ वरुणो व
रणः सेतुस्तिक्तशाकः कुमारकः ॥ पुन्नागे पुरुषस्तुङ्गः केसरो देववल्लभः ॥ २३ ॥ पारिभद्रे निम्बत
रुर्मन्दारः पारिजातकः ॥ तिनिशे स्यन्दनो नेमी रथद्रुरतिमुक्तकः ॥ २४ ॥ वञ्जुलश्चित्रकृच्चाथ द्वौ जलजे
पीतनकपीतनौ ॥ आम्रातके मधूके तु गुडपुष्पमधुद्रुमौ ॥ २५ ॥ वानप्रस्थमधुष्ठीलौ [illegible] (प्रीलौ
ऽत्र मधूलकः ॥ पीलौ गुडफलः स्रंसी तस्मिंस्तु गिरिसंभवे ॥ २६ ॥ अक्षोटकर्[illegible]लौ द्वावङ्कोटे तु
निकोचकः ॥ पलाशे किंशुकः पर्णो वातपोथोऽथ वेतसे ॥ २७ ॥ रथाभ्रपुष्पविदुलशीतवानी

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रवञ्जुलाः ॥ द्वौ परिव्याधविदुलौ नादेयी वांबुवेतसे ॥ २८ ॥ शोभाञ्जने शिग्रुतीक्ष्णगंधका
क्षीवमोचकाः ॥ रक्तोसौ मधुशिग्रुः स्यादरिष्टः फेनिलः समौ ॥ २९ ॥ बिल्वे शाण्डिल्यशैलूषौ मालूरश्रीफ [illegible] २
लावपि ॥ प्लक्षो जटी पर्कटी स्यान्न्यग्रोधो बहुपाद्वटः ॥ ३० ॥ गालवः शाबरो लोध्रो वृत्तिल्वमार्जनौ ॥ रीटस्ति ३
आम्रश्चूतो रसालोसौ सहकारोतिसौरभः ॥ ३१ ॥ कुम्भोलूखलकं क्लीबे कौशिको गुग्गुलुः पुरः ॥
शेलुः श्लेष्मातकः शीत उद्दालो बहुवारकः ॥ ३२ ॥ राजादनं प्रियालः स्यात्सन्नकद्रुर्धनुःपटः ॥
गंभारी सर्वतोभद्रा काश्मरी मधुपर्णिका ॥ ३३ ॥ श्रीपर्णी भद्रपर्णी च काश्मर्यश्चाप्यथ द्व
योः ॥ कर्कन्धूर्बदरी कोलिः कोलं कुवलफेनिले ॥ ३४ ॥ सौवीरं बदरं घोण्टाप्यथ स्यात्स्वादुकंट
कः ॥ विकङ्कतः स्रुवावृक्षो ग्रंथिलो व्याघ्रपादपि ॥ ३५ ॥ ऐरावतो नागरङ्गो नादेयी भूमिजंबुका ॥ ति
न्दुकः स्फूर्जकः कालस्कन्धश्च शितिसारके ॥ ३६ ॥ काकेन्दुः कुलकः काकपीलुके काकति

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

गी० ६

नुके ॥ गोत्र सोटो भन्याट लोभ घरा पाट सिर्फो क्षानुष्का कौ ॥ ३७ ॥ ति सबके: प्युरके: भीमान् सोमे पिचु र
सं बुको ॥ भीषार्गिकाको मुद्दिको कुमीबेर्द धेकाछु लो ॥ ३८ ॥ जमुर्के: पद्दिको व्यः स्पात्यहि ला
क्षा प्रसादने: ॥ न दस्तु एस: ॥ नमु को बुलन पाप व सुदा रस ॥ ३९ ॥ तल हो म्भो नी प प्रियक के दवा
लुहा लिप्रिये ॥ बोरवक्षोत्पको निमुरवी भन्न्यातकी विस्तु ॥ ४० ॥ गद भांड़ेकरेण सेके पी
तनसु पार्थका: ॥ पुष्प स्पाति तिलो चिम्याप्रि काथो पी तमा खेो ॥ ४१ ॥ लर्जका सने [illegible] वु
नै कु पुष्प प्रिय के जो व का: ॥ भ्रा सो नुस र्जका [illegible] का एि कासस्य संवा: ॥ ४२ ॥ न दीस जो
वीरतल सिंह के के भोर्जुन: ॥ राजा नो [illegible] ला ध्यक्षः शीरिका यापथ [illegible] यो: ॥ ४३ ॥ पिछा तु
सा लमे तो वेस्रो चनः कु घपा रम्भे सी चितविलो ने सेमा तः कर तेम्घ कार ज्ञे को ॥ ४४ ॥ प्र

॥ ६ ॥
॥ राम ॥

८

CC-0. Digitized by eGangotri and MIDF- Delhi

कीर्यः पूतिकरजः पूतीकः कलिमारकः॥ करंजभेदाः षड्ग्रन्थो मर्कट्यंगारवल्लरी॥४५॥ रो
हीतो हितकः प्लीहशत्रुर्दाडिमपुष्पकः॥ गायत्री बालतनयः खदिरो दन्तधावनः॥४६॥ अरि
मेदो विट्खदिरे कदरः खदिरे सिते॥ सोमवल्कोप्यथ व्याघ्रपुच्छगन्धर्वहस्तकौ॥४७॥
एरण्ड उरुबूकश्च रुचकश्चित्रकश्च सः॥ चंचुः पंचांगुलो मण्डवर्धमानव्यडंबकाः॥४८॥ अ
ल्पा शमी शमीरः स्याच्छमी सक्तुफला शिवा॥ पिण्डीतको मरुबकः श्वसनः करहाटके
४९॥ शल्यश्च मदने शक्रपादपः पारिभद्रके॥ भद्रदारु द्रुकिलिमं पीतदारु च॥५०॥ पूति दारु च
काष्ठं च सप्त स्युर्देवदारुण्यथ द्वयोः॥ पाटलिः पाटला मोघा काचस्थाली फलेरुहा॥५१॥ कृष्णवृ
न्ता कुबेराक्षी श्यामा तु महिलाह्वया॥ लता गोवन्दनी गुन्द्रा प्रियंगुः फलिनी फली॥५२॥ विष्व
क्सेना गन्धफली कारम्भा प्रियकश्च सा॥ मण्डूकपर्णपत्रोर्णनटकट्वंगटुण्टुकाः॥५३॥ स्योना

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



अ०कोषि ॥७॥

कःशुकनासर्क्षदीर्घवृन्तकुटन्नटाः॥ शोणकोऽप्यथ तिष्यफला त्वामलकी त्रिषु ॥५४॥ अमृ
ता च वयस्था च त्रिलिङ्गस्तु बिभीतकः॥ अक्षस्तुषः कर्षफलो भूतावासः कलिद्रुमः ॥५५॥ अभ
या त्वव्यथा पथ्या वयस्था पूतनामृता॥ हरीतकी हैमवती चेतकी श्रेयसी शिवा ॥५६॥ पीतद्रुः स
रलः पूतिकाष्ठं चाथ द्रुमोत्पलः॥ कर्णिकारः परिव्याधो लकुचो लिकुचो डहुः ॥५७॥ पनसः कण्टकि
फलो निचुलो हिज्जलोऽम्बुजः॥ काकोदुम्बरिका फल्गुर्मलयूर्जघनेफला ॥५८॥ अरिष्टः सर्वतोभ
द्रहिङ्गुनिर्यासमालकाः॥ पिचुमन्दश्च निम्बेऽथ पिच्छिला गुरुशिंशपा ॥५९॥ कपिला भस्मगर्भा सा
शिरीषस्तु कपीतनः॥ भाण्डिलोऽप्यथ चाम्पेयश्चम्पको हेमपुष्पकः ॥६०॥ एतस्य कलिका गन्धफली
स्यादथ केसरे॥ बकुलो वञ्जुलोऽशोके समौ करकदाडिमौ ॥६१॥ चाम्पेयः केसरो नागकेसरः ॥श्री॥
काञ्चनाह्वयः॥ जया जयन्ती तर्कारी नादेयी वैजयन्तिका ॥६२॥ श्रीपर्णमग्निमन्थः स्या

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सिता ऽसौ श्वेतसुरसा भूतवेश्यथ मागधी । गणिका यूथिका ऽ
म्बष्ठा सा पीता हेमपुष्पिका ॥५

कणिका गणिकारिका ॥ जयोथ कुटजः शक्रो वत्सको गिरिमल्लिका ॥ ६३ ॥ एतस्यैव कलिंगेंद्र
यवभद्रयवं फले ॥ कृष्णपाकफलाविग्नसुषेणाः करमर्दके ॥ ६४ ॥ कालस्कंधस्तमालः स्यात्ता
पिच्छोप्यथ सिंदुके ॥ सिंदुवारेंद्रसुरसौ निर्गुंडींद्राणिकेत्यपि ॥ ६५ ॥ वेणी खरा गरी देवता
डो जीमूत इत्यपि ॥ श्रीहस्तिनी तु भूरुंडी तृणशून्यं तु मल्लिका ॥ ६६ ॥ भूपदी शीतभीरुश्च सैवास
फोता वनोद्भवा ॥ शेफालिका तु सुवहा निर्गुंडी नीलिका च सा ॥ ६७ ॥ अतिमुक्तः पुंड्रकः स्या
द्वासंती माधवी लता ॥ सुमना मालती जातिः सप्तला नवमालिका ॥ ६८ ॥ [redacted]
सहा कुमारी तरणिरम्लानस्तु महासहा ॥ ६९ ॥ तत्र शोणे कुरबकस्तत्र पीते कुरंटकः ॥ नीली झि
ण्टी द्वयोर्बाणा दासी चार्त्तगलश्च सा ॥ ७० ॥ सैरीयकस्तु झिंटी स्यात्तस्मिन्कुरबको ऽरुणे ॥
पीता कुरंटको झिंटी तस्मिन्सहचरी द्वयोः ॥ ७१ ॥ ओड्रपुष्पं जपापुष्पं वज्रपुष्पं तिलस्य यत् ॥ प्र

माध्यं कुंदं । रक्तकस्तु बंधूको बंधुजीवकः ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

अको
।१८।

तीहासशतप्रासचंडातहयमारकः॥७२॥ करवीरेकरीरेतुक्रकरग्रंथिलावुभौ॥ उंमत्तःकितवो
धूर्तोधत्तूरःकनकाह्वः॥७३॥ मातुलोमदनश्चास्यफलेमातुलपुत्रकः॥ फलपूरोबीजपूरोरु-
चकोमातुलुंगके॥७४॥ समीरणोमरुबकःप्रस्थपुष्पफणिज्जकः॥ जंबीरोप्यथपर्णासेक-
ठिंजरकुठेरकौ॥७५॥ सितेर्जकोत्रपाठीतुचित्रकोवह्निसंज्ञकः॥ अर्कावसुकास्फोतगण-
रूपविकीरणाः॥७६॥ मंदारश्चार्कपर्णोत्र शुक्लेलर्कप्रतापसौ॥ शिवमल्लीपाशुपतएकाष्ठी-
लाबकोवसुः॥७७॥ वंदावृक्षादनीवृक्षरुहाजीवंतिकेत्यपि॥ वत्सादनीछिन्नरुहागुडूचीतंत्रि-
कामृता॥७८॥ जीवंतिकासोमवल्लीविशल्यामधुपर्ण्यपि॥ मूर्वादेवीमधुरसामोरटातेजनी
स्रुवा॥७९॥ मधुलिकामधुश्रेणीगोकर्णीपीलुपर्ण्यपि॥ पाठांबष्ठाविद्धकर्णीस्थापनी
श्रेयसीरसा॥८०॥ एकाष्ठीलापापचेलीप्राचीनावनतिक्तिका॥ कटुःकटंभराशोकरोहिणी

वा। म पा
।१८।
श्री

CC-0. Digitized by eGangotri and MIDF- Delhi

के टौ ह्ल लौ ॥ ८ ॥ म स्य पि ना के ल भे दौ च का ङ्गी शा कु ला द नी ॥ आ ल म गु प्रा ज ग ध्यं ड्रा के रु रा प्रा व
षा ष्टि लौ ॥ ९ ॥ स ष्य प्रा ना र के शिं वि: के पि के छु श्य म के टी ॥ चि त्रो र्प च त्रा न्य मे धा द्रु व ती
न वे रिं व षा ॥ १० ॥ प्र त्य के न्ये लौ मु त ग्ने लौ रां ना ह्रि षि के पा र्पि पि ॥ अ पा म ना गं श्री र व रि को ध्या मा
र्ग व म प र कौ ॥ ११ ॥ प्र से के र्गीं कौ रा प लौ कि लि हि ल्व र म ज री ॥ प जि को ब्रा ल लौ प ध्या म
गौ ब्रा ल्ल ल य ष्ठि का ॥ १२ ॥ अं गा व ल्लो का ल्प रा के च वी व ड्र का ॥ मं जि वि के स म ल्ला को ल नि	छा त्रिंमीत
शि वां न ऽ के प लौ भां ङ्गी री भं डी मो ज न ग ल्प: ॥ ना सा प्र वा सा दु: स्प र्शा ध न्व या स: कु नी प्र
क: ॥ १३ ॥ ई री द नी क फु ला न ना स मु द्रा न्ता दु रा ल मा ॥ प ज्ञि प र्णा पृ थ क्या लौ चि त्र प र्णि न्दि
व ल्लि को ॥ १४ ॥ को ष्टु वि न्ना सि ह्र पु ष्टो का ला सि र्व व नि गु ला ॥ नि दि ग्धि का स्पृ शी व्या घ्री
र ह ती क न्ता का रि को रि का ॥ १५ ॥ प्र बो द नी कु लौ ष्टु दा दु: स्प र्शा रा ष्ट्रि के न्य पि ॥ नी ली का लौ

पि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

त्रिंमीत

CC-0. Digitized by eGangotri and MIDF- Delhi

ओ.को
१८

क्रीतविका॥ सामीताम चुपर्णिका॥८३॥ जनीशमीफली नुम्पोतू लौदो साचनी हिरनी॥ अवल्गु
जः सोमराजी सुवल्लिः सोमवल्लिका॥८०॥ कोटरमेषी कुलफला वाकुची पूतिफल्यपि॥ कृष्णो
पकुल्या वैदेही मागधी चपला कणा॥८१॥ उषणा पिप्पली शौंडी कोला थ गजपिप्पली॥ कपिव
ल्ली कोलवल्ली श्रेयसी वशिरः पुमान्॥८२॥ चव्यं तु चविकं काकचिंची गुंजा तु कृष्णला॥ पलंकषा
त्विक्षुगंधा स्वदंष्ट्रा स्वादुकंटकः॥८३॥ गोकंटको गोक्षुरको वनशृंगाट इत्यपि॥ विश्वा विषा प्र
तिविषा तिविषोपविषारुणा॥८४॥ शृंगी महौषधं चाथ क्षीरावी दुग्धिका समे॥ शतमूलीव
हुसुताभीरुरिंदीवरीवरी॥८५॥ ऋष्यप्रोक्ताभीरुपत्री नारायण्यः शतावरी॥ अहेरुरथ पीतद्रु का
लेयकहरिद्रवः॥८६॥ दार्वी पचंपचा दारुहरिद्रा पर्जनीत्यपि॥ वचोग्रगंधा षड्ग्रंथा गोलोमी शतपर्व
िका॥८७॥ शुक्ला हैमवती वैद्यमातृसिंह्यौ तु वाशिका॥ वृषोऽटरूषः सिंहास्यो वासको वाजि

राम
१८

प

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दंतकः ॥ आस्फोता गिरिकर्णी स्याद्विष्णुक्रान्ता पराजिता ॥ इक्षुगन्धा तु काण्डेक्षुकोकिलाक्षेक्षुरक्षु
राः ॥ ९८ ॥ शालेयः स्याच्छीतशिवश्छत्रा मधुरिका मिसिः ॥ मिश्रेयोप्यथ सीहुंडो वज्रद्रुः स्नु
क्स्नुही गुडा ॥ ९९ ॥ समन्तदुग्धाथो वेल्लममोघा चित्रतंडुला ॥ तंडुलश्च कृमिघ्नश्च विडङ्गं
पुन्नपुंसके ॥ १०० ॥ बला वाट्यालका घण्टारवा तु शणपुष्पिका ॥ मृद्वीका गोस्तनी द्राक्षा
स्वाद्वी मधुरसेति च ॥ सर्वानुभूतिः सरला त्रिपुटा त्रिवृता त्रिवृत् ॥ त्रिभंडी रोचनी श्यामा
पालिन्द्यौ तु सुषेणिका ॥ १०२ ॥ काला मसूरविदलार्द्धचन्द्रा कालमेषिका ॥ मधुकं क्लीतकं यष्टि
मधुकं मधुयष्टिका ॥ १०३ ॥ विदारी क्षीरशुक्लेक्षुगन्धा क्रोष्ट्री तु या सिता ॥ अन्या क्षीरविदा
री स्यान्महाश्वेतर्क्षगन्धिका ॥ १०४ ॥ लाङ्गली शारदी तोयपिप्पली शकुलादनी ॥ खराश्वा का
रवी दीप्यो मयूरो लोचमस्तकः ॥ १०५ ॥ गोपी श्यामा शारिवा स्यादनन्तोत्पलशारिवा ॥ योग्य

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

एत्वायानुक्रमेलेयंप्रगंधिहरिवा:तुकं: धानुकं वाथपालकयं मुकुन्द:कुन्दकुन्दुरु:

बालं ह्रीबेरे वाहिष्ठोदीव्यं केशांबुनामव: कालानुसार्यं च ध्यामनध्यप्रशीतशियानितु:।

अंको ॥१५॥ स्पृक्का: सिद्धिलक्ष्मी वधूस्पृक्कामृतासमे ॥१०६॥ वदनी वालतनुः सा लामेघाबुमनस्के लता ॥ का

शीलाबुरुफलीरुक्काकमुप्रस्त्रेहस्थपि ॥१०७॥ वा नौ धौ हिमुलीलिरिकामंटा कीदृ:प्रचाधिं णी ॥ ना

कुलीमुरसारास्त्रामुगंधागंधना कुली ॥१०८॥ नवकु लेष्टा पजंत्रशी छुत्राको सुवहा चसा ॥ विद

रोचामृमतीसालणीस्थिरातुवा ॥१०९॥ नतुर्क्रिकेटी सपुत्रा नाकपोसीबदीतिच ॥ भारद्वाजीतु

सावन्या हरं गी तु लौ व भोवृष: ॥११०॥ गांगेरुकी नागवलासुषाहस्वा गवेधुका ॥ धामार्गवो

घोषक: स्या महाजालीसपीतक: ॥१११॥ ज्योत्स्नी पटोलिका जाली नादेयी भूमिजंबुका ॥ [illegible] अस्रो गलिक्यगिनाशिखाकाकोगी काकनासिका गीधापदीतुसुवहा सन्म

मुसलीतालमूलिका ॥ अजशृंगी विषाणी स्याद्गोजिह्वादार्विके समे ॥११२॥ ताम्बूलेवल्ली तांबू ॥१०॥

लीनागवल्ल्यप्यथद्विजा ॥ हरेणूरेणुकाकौंती कपिलाभस्मगंधिनी ॥११३॥ एलावालुकमैलेयं

शोलेयंतालपर्णीतु दैत्यागंधकुटी मुरा: गंधिनी गजभक्ष्यातु सुवहासुरभीरसा ॥

महेरणाकुन्दरुकी सल्लकी ह्लादिनीतिच ॥ अग्निज्वाला धातुकी पुष्पी धातकी धातुपुष्पिका

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीसान्के नि न्पथ विन्के: ॥ [illegible] जलैली भिवातामसके की क्रियाँ प्रयोऽरीके पोऽयमथतुन्न कुरके ॥
॥११४॥ कुलि: के चऊ: कातल को न[illegible] थराथ सि ॥ चेला धनहरी थैमड: पुत्रगला हास का ॥
११५॥ कालागु धं आप्रतव के जे चेके काकेम ॥ सुषिगविद्रुमले ताके पाता हि नेटीन सी ॥
११६॥ यमन्प जनके शीचदने हरि विलासिन्नि ॥ मृक्ति: रावः क्रूर को लदलेन वेमथाट को ॥
११७॥ काशीम: स्मातुवा कामनालेके सुरा [illegible] जो कुदन्ने दणशापुरबोलेपपरिपेलवं ॥ ११८॥ पु
वगोपुरगोनदैकैवतीमुक्तकानिचे ॥ समि पलशु के वर्हि: पुष्पश्रीलेयकेकौ: ॥ ११९॥ म
तंसोला तुपिशु नामरका देवीले तालपु ॥ समपुष्पा ताव ध: काऽ८ वर्का लले पिकत्यपि ॥ १२०॥
नपरिवनी जेतमांसी जटिला लोमशा भिसि ॥ [illegible] ॥१२१॥ कर्च
रकोटु विलेके का पको वेघमु [illegible] ॥ [illegible] तिमा [illegible] तोसर्वमेप धं ॥१२२॥
श का [illegible] पुष्पादि [illegible] समारिके: ॥ बिरास्या [illegible] कालिनेपा केपुष्प ना।
।८।

प्रथिका वन्द्रुवालेलानिष्कुटि [illegible] लाथरा सूक्ष्मोपकंविका [illegible] कोरंगी त्रिपुटा त्रुटि:
माधप कुष्ट पासिमो [illegible] पाकं [illegible]

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF, Delhi

एलापर्णी तु सुवहा रास्ना युक्तरसा च सा ॥ चाङ्गेरी चुक्रिकादन्तशठाम्बष्ठाम्ललोणिका ॥

श्रो स्यादक्ष्कां धाकु गलाशोगे वृश्चीव रुद्रपकः ॥ जेगन्धा ब्राह्मी तु मत्स्याक्षी वयस्था सोमवल्लरी ॥ पटुपर्णी

११ हैमवती स्वर्णक्षीरी हिमावती ॥ हयपुच्छी तु काम्बोजी माषपर्णी महासहा ॥१२३॥ तुण्डिकेरी र

क्तफला बिम्बिका पीलुपर्ण्यपि ॥ बर्बरा कबरी तुङ्गी खरपुष्पाजगन्धिका ॥१२४॥ सहस्रवेधी चु

क्रोऽम्लवेतसः शतवेध्यपि ॥ नमस्कारी गण्डकारी समङ्गा खदिरेत्यपि ॥१२५॥ जीवन्ती जीव

नी जीवा जीवनीया मधुस्रवा ॥ कूर्चशीर्षो मधुरकः शृङ्गह्रस्वाङ्गजीवकाः ॥१२६॥ किराततिक्तो

भूनिम्बोऽनार्यतिक्तोऽथ सप्तला ॥ विमला सातला भूरिफेना चर्मकषेत्यपि ॥१२७॥ वायसो

ली स्वादुरसा वयस्थाथ मकूलकः ॥ निकुम्भो दन्तिका प्रत्यक्श्रेण्युदुम्बरपर्ण्यपि ॥१२८॥ अजमोदा राम

तूग्रगन्धा ब्रह्मदर्भा यवानिका ॥ मूले पुष्करकाश्मीरपद्मपत्राणि पौष्करे ॥१२९॥ अव्यथाति

चरा पद्मा चारटी पद्मचारिणी ॥ काम्पिल्यः कर्कशश्चन्द्रो रक्ताङ्गो रोचनीत्यपि ॥१३०॥ प्रपुन्नाड ११

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



स्येऽग्रजो दक्षुर्मस्य मर्दकः॥ पुत्रात्तु उरगो व्येष्ठ्यपतां पुत्रुत्र कंदकः॥१३१॥ स नाकं दुन्दुभो नवहीते
थामसो बधा तेषु नेगं जनानि दैहमल कंदलो नकाः॥ पुनर्नेवा तुलोपधर्मा वितु नेतु निघ नकाः॥ स्याद्दु
नकेः गीत लोका॥ प्रजितो सुनयं पिपु॥ पानवतां हि कापी घल्यास्याति घ्नतौ लक्षा॥ नार्षे केत्रो
यमालोऽस्या ज्ञापद्रीवसेभादिं॥ विश्वकेसनापूयागये विरा हीबटे त्सपि॥ मार्केवा प्रगराजः स्याका
कमाचीतुवायसी॥१३२॥ शातव्या विनश्चो अनमुवर्षिलिः॥ अवाकुप्मी कावी चतराला तुसाहिती
१३३॥ तस्मात्के भराराजेव त्वामदवेलति चाजनो जलेका जतीजनुक्वकवनि मो॥१३४॥ सुस्पर्थी
५४३ धस्तीगं वाल लीग्नथिकेतपि॥ कर्वलेपिवसारो प्रिकावे ह्यं कौट सकः॥१३५॥ पुषवीचा
पकुरोकं मटो लानि हके पट॥ कूष्मालकनुकवीत है वीहः ककदो द्विषो॥१३६॥ इक्ष्वाकुः
कटतुन्वीस्या तेमलाककभेवमो चित्रागवाक्षी नार्दे विमसा विद्वा हर्णी॥१३७॥ अंशोपुः पु
रलोंः क सेगनी स्त्रुसमहि ला॥ कवियादिका वीतुमलं कहि हमाचिका॥१३८॥ वालुकं पाकमेदा स्तु

प नें ई

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

को दूर्वा तु शतपर्विका ॥ सहस्रवीर्या भार्गव्यौ रुहानन्ताथ सा सिता ॥ १३ ॥ गोलोमी शतवीर्या च गण्डाली
१२ शकुलाक्षकः ॥ कुरुविन्दो मेघनामा मुस्ता मुस्तकमस्त्रियाम् ॥ १४० ॥ ~~[illegible]~~
~~[illegible]~~ स्याद्भद्रमुस्तको गुन्द्रा चूडाला चक्रलोच्चटा ॥ वंशे त्वक्सारकर्मारत्वचिसारतृणध्व
जाः ॥ शतपर्वा यवफलो वेणुमस्करतेजनाः ॥ वेणवः [redacted] कीचकास्ते स्युर्ये स्वनन्त्यनिलो
द्धताः ॥ १४२ ॥ ग्रन्थिर्ना पर्वपरुषी गुन्द्रस्तेजनकः शरः ॥ नडस्तु धमनः पोटगलोऽथो काशमस्त्रियाम् ॥ १४३ ॥
इक्षुगन्धा पोटगलः पुंसि भूम्नि तु बल्वजाः ॥ रसाल इक्षुस्तद्भेदाः पुण्ड्रकान्तारकादयः ॥ १४४ ॥ स्याद्वीरणं
३ ले वीरतरं मूलेऽस्योशीरमस्त्रियाम् ॥ अभयं नलदं सेव्यममृणालं जलाशयम् ॥ १४५ ॥ लामज्जकं लघुलयमव राम
दाहेष्टकापथे ॥ नडादयस्तृणं गर्मुच्छ्यामाकप्रमुखा अपि ॥ १४६ ॥ अस्त्री कुशं कुथो दर्भः पवित्रमथ
कत्तृणम् ॥ पौरसौगन्धिकध्यामदेवजग्धकरौहिषम् ॥ १४७ ॥ छत्रातिच्छत्रपालघ्नौ मालातृणकभू १२

स्त २ Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्तोनामास्थं बालतृणं घासो यवसं तृणमर्जुनं॥ तृणानां संहतिस्तृण्या नड्यातु नडसंहतिः॥ तृणरा
जाह्वयस्तालो नारिकेलस्तु लाङ्गली॥ घोण्टा तु पूगः क्रमुको गुवाकः खपुरोस्य तु॥ फलमुद्वेगमेते
च हिन्तालसहितास्त्रयः॥ खर्जूरः केतकी ताली खर्जूरी च तृणद्रुमाः॥१०॥ पद॥ इति वनौषधिवर्गः॥
सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिः॥ शार्दूलद्वीपिनौ व्याघ्रे तरक्षुस्तु मृगादनः॥१॥ वराहः
शूकरो घृष्टिः कोलः पोत्री किरी किरिः॥ दंष्ट्री घोणी स्तब्धरोमा क्रोडो भूदार इत्यपि॥ कपि
प्लवङ्गप्लवगशाखामृगवलीमुखाः॥ मर्कटो वानरः कीशो वनौकाः अथ भल्लुके॥३॥ ऋक्षाच्छभल्ल
भाल्लूका गण्डके खड्गखड्गिनौ॥ लुलापो महिषो वाहद्विषत्कासरसैरिभाः॥४॥ स्त्रियां शिवा
भूरिमायगोमायुमृगधूर्तकाः॥ शृगालवञ्चकक्रोष्टुफेरुफेरवजम्बुकाः॥५॥ ओतुर्विडालो मा
र्जारो वृषदंशक आखुभुक्॥ त्रयो गौधारगौधेरगौधेयागौधिका॥ संजाहः श्वावित्तु शल

औ२

Jagannath Bhattaraj Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



गलो स्यात्तल्लोष्विमालेलीमालेलंमालं॥ वातप्रमीर्वातमृगः कोकर्दिहामृगोवृका॥९॥ मृगेकुरंगवा
॥१३॥ तायुहरिणाजिनयोनयः॥ ऐणेयमेणाप्याश्चर्मा द्यमेणास्यैणमुभे त्रिषु॥८॥ कदली कन्दली
पृ चीनश्चमूरुप्रियकावपि॥ समूरश्चेति हरिणा अमी अजिनयोनयः॥९॥ कृष्णसारुरुन्यंकुरंकुशंव रंकुउ
रु रौहिषाः॥ गोकर्णपृषतैणर्श्यरोहिताश्चमरोमृगाः॥१०॥ गंधर्वः शरभोरामः सृमरोगवयःशशः॥
५ गावाद्याः इत्यादयोमृगेन्द्राद्यागावाद्याः पशुजातयः॥११॥ उंदुरुर्मूषिकोप्याखुर्गिरिकाबालमूषिका॥ छुछुन्दरी
दीर्घमुखीमूषिकागंधमूषिकाः॥१२॥ सरटः कृकलासस्यामूसलीगृहगोधिका॥ लूतातंतुवा लूता ४
योर्णनाभमर्कटकाःसमाः॥१३॥ नीलंगुस्तुक्रिमिः कर्णजलौकाः शतपद्युभे॥ वृश्चिकःशूक तन
कीटःस्यादलिद्रुणौतुवृश्चिके॥१४॥ पारापतः कलरवः कपोतोथशशादनः॥ पत्रीश्येनउ
लूकेतुवायसारातिपेचकौ॥१५॥ व्याघ्राटःस्याद्भरद्वाजः खंजरीटस्तुखंजनः॥ लोहपृष्ठस्तु ॥१३॥

गंधमूषीदीर्घदेहादिर्वांधकाः॥४ र: ४

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कंकः स्यादथ चाषः किकीदिविः ॥१६॥ कलिंगभृंगधूम्याटा अथ स्याच्छतपत्रकः ॥ दार्वाघा-

तो टोऽथ सारंगः स्तोकश्चातकः समौ ॥१७॥ कृकवाकुस्ताम्रचूडः कुक्कुटश्चरणायुधः ॥ चटकः

कलविङ्कः स्यात्तस्य स्त्री चटका तयोः ॥१८॥ पुमपत्ये चाटकैरः स्त्र्यपत्ये चटकैव हि ॥ कर्करेटुः

करेटुः स्यात्कृकणक्रकरौ समौ ॥१९॥ वनप्रियः परभृतः कोकिलः पिक इत्यपि ॥ काके तु करटारि-

ष्टबलिपुष्टसकृत्प्रजाः ॥२०॥ ध्वांक्षात्मघोषपरभृद्बलिभुग्वायसा अपि ॥ द्रोणकाकस्तु काको-

लो दात्यूहः कालकण्टकः ॥२१॥ आतापिचिल्लौ दाक्षाय्यगृध्रौ कीरशुकौ समौ ॥ क्रुङ् क्रौ-

ञ्चोऽथ बकः कह्वः पुष्कराह्वस्तु सारसः ॥२२॥ कोकश्चक्रश्चक्रवाको रथांगाह्वयनामकः ॥

कादम्बः कलहंसः स्यादुत्क्रोशकुररौ समौ ॥२३॥ हंसास्तु श्वेतगरुतश्चक्रांगा मानसौकसः ॥

राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः ॥२४॥ मलिनैर्मल्लिकाक्षास्ते धार्तराष्ट्राः सि-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अमरको तैः ॥ स्यात् लितनिशाश्च बलाका बिसकण्ठिका ॥२५॥ हंसस्य योषिद्वरटा सारसस्य तु लक्ष्म
णा ॥ जतुकाजिनपत्रा स्यात् परोष्णी तैलपायिका ॥२६॥ वर्वणा मक्षिका नीला सरघा मधुमक्षिका ॥ म घु २
१५४ पतंगिका पुत्तिका स्याद्दंशस्तु वनमक्षिका ॥२७॥ दंशी तज्जातिरल्पा स्याद्गन्धोली वरटा द्वयोः
भृंगारी झीरुका चीरी झिल्लिका च समा इमाः ॥२८॥ समौ पतंगशलभौ खद्योतो ज्योतिरिंग
णः ॥ मधुव्रतो मधुकरो मधुलिण्मधुपालिनः ॥२९॥ द्विरेफपुष्पलिड्भृंगषट्पदभ्रमरालयः ॥
मयूरो बर्हिणो बर्ही नीलकण्ठो भुजंगभुक् ॥३०॥ शिखावलः शिखी केकी मेघनादानुला
स्यपि ॥ केका वाणी मयूरस्य समौ चन्द्रकमेचकौ ॥३१॥ शिखा चूडा शिखण्डस्तु पिच्छबर्हे नपुंसके ॥ राम ॥
खगे विहंगविहगविहंगमविहायसः ॥३२॥ शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाः ॥
पतत्रिपत्रिपतगपतत्पत्ररथाण्डजाः ॥३३॥ नगौकोवाजिविकिरविविष्किरपतत्रयः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF Delhi

नीडोद्भवा गरुत्मन्तः पित्सन्तो नभसङ्गमाः ॥ ३४ ॥ तेषां विशेषा हारीतो मद्गुः कारण्डवः प्लवः ॥ तित्तिरिः
कुक्कुभो लावो जीवञ्जीवश्चकोरकः ॥ ३५ ॥ कोयष्टिष्टिट्टिभो वर्तिको ... दयोऽपि च ॥ गरुत्पक्षच्छदाः प
त्रं पतत्रं च तनूरुहम् ॥ ३६ ॥ स्त्री पक्षतिः पक्षमूलं चञ्चुस्त्रोटिरुभे स्त्रियौ ॥ प्रडीनोड्डीनसण्डीनान्येताः ख
गगतिक्रियाः ॥ ३७ ॥ पेशी कोशो द्विहीनेऽण्डं कुलायो नीडमस्त्रियाम् ॥ पोतः पाकोऽर्भको डिम्भः पृथुक
शावकः शिशुः ॥ ३८ ॥ स्त्रीपुंसौ मिथुनं द्वन्द्वं युग्मं तु युगलं युगम् ॥ समूहे निवहव्यूहसन्दोहविसर
व्रजाः ॥ ३९ ॥ स्तोमौघनिकरव्रातवारसंघातसञ्चयाः ॥ समुदायः समुदयः समवायश्चयो गणः ॥
४० ॥ स्त्रियां तु संहतिर्वृन्दं निकुरम्बं कदम्बकम् ॥ वृन्दभेदाः समैर्वर्गः संघसार्थौ तु जन्तुभिः ॥ ४१ ॥
सजातीयैः कुलं यूथं तिरश्चां पुंनपुंसकम् ॥ पशूनां समजोऽन्येषां समाजोऽथ सधर्मिणाम् ॥ ४२ ॥ स्या
न्निकायः पुञ्जराशी तूत्करः कूटमस्त्रियाम् ॥ कापोतशौकमायूरतैत्तिरादीनि तद्गणे ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



॥१५॥ सक्ताः पक्षिमृगाश्चैकास्तेन स्वकाश्चैते ॥ ४३ ॥ :: इति सिंहादिवर्गः ॥ ५ ॥ मनुष्या मानुषा मर्त्या
अंको मनुजा मानवा नराः ॥ स्युः पुमांसः पंचजनाः पुरुषाः पूरुषा नरः ॥ १ ॥ स्त्री योषिदबला योषा नारी सी
मन्तिनी वधूः ॥ प्रतीपदर्शिनी वामा वनिता महिला तथा ॥ २ ॥ विशेषास्त्वंगनाभीरुः कामिनी वामलोच
ना ॥ प्रमदा भाविनी कान्ता ललना च नितम्बिनी ॥ ३ ॥ सुन्दरी रमणी रामा कोपना सैव भामिनी ॥
वरारोहा मत्तकाशिन्युत्तमा वरवर्णिनी ॥ ४ ॥ कृताभिषेका महिषी भोगिन्योऽन्या नृपस्त्रियः ॥
^ भार्या जाया थ पुंभूम्नि दाराः स्यात्तु कुटुम्बिनी ॥ ५ ॥ पुरन्ध्री सुचरित्रा तु सती साध्वी पतिव्रता ॥ कृ
तसापत्निकाध्यूढाधिविन्नाथ स्वयंवरा ॥ ६ ॥ पतिंवरा च वर्याथ कुलस्त्री कुलपालिका ॥
कन्या कुमारी गौरी तु नग्निकानागतार्त्तवा ॥ ७ ॥ स्यान्मध्यमा दृष्टरजास्तरुणी युवतिः समे ॥
समाः स्नुषाजनीवध्वश्चिरिण्टी तु सुवासिनी ॥ ८ ॥ इच्छावती कामुका स्याद्वृषस्यन्ती तु कामुकी ॥
कान्तार्थिनी तु या याति संकेतं साभिसारिका ॥ ९ ॥ पुंश्चली धर्षिणी बन्धक्यसती कुलटेत्वरी ॥ ॥१५॥

पत्नी पाणिगृहीती च द्वितीया सहधर्मिणी ॥ ५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

अर्याणी स्वयमर्या स्यात्क्षत्रिया क्षत्रियाण्यपि॥ उपाध्यायाप्युपाध्यायी स्यादा
चार्यापि च स्वतः॥१३॥३

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वैरिणी पांसुला च स्यादशिश्वी शिशुना विना॥ अवीरा निष्पतिसुता विश्वस्ता विधवे समे॥१०॥ आ
लिः सखी वयस्याथ पतिवत्नी सभर्तृका॥ वृद्धा पलिक्नी प्राज्ञी तु प्रज्ञा प्राज्ञा तु धीमती॥११॥ शूद्री शू
द्रस्य भार्या स्याच्छूद्रा तज्जातिरेव च॥ आभीरी तु महाशूद्री जातिपुंयोगयोः समा॥१२॥ आचार्या
नी तु पुंयोगे स्यादर्यी क्षत्रियी तथा॥ उपाध्यायान्युपाध्यायी पोटा स्त्रीपुंसलक्षणा॥१३॥ वीर
पत्नी वीरभार्या वीरमाता तु वीरसूः॥ जातापत्या प्रजाता च प्रसूता च प्रसूतिका॥१४॥ स्त्री नग्नि
का कोटवी स्याद्दूती सञ्चारिके समे॥ कात्यायन्यर्द्धवृद्धा या काषायवसनाधवा॥१५॥ सैरन्ध्री
परवेश्मस्था स्ववशा शिल्पकारिका॥ असिक्नी स्यादवृद्धा या प्रेष्यान्तःपुरचारिणी॥१६॥ वारस्त्री
गणिका वेश्या रूपाजीवाथ सा जनैः॥ सत्कृता वारमुख्या स्यात्कुट्टनी शम्भली समे॥१७॥ विप्र
श्निका त्वीक्षणिका दैवज्ञाथ रजस्वला॥ स्त्रीधर्मिण्यविरात्रेयी मलिनी पुष्पवत्यपि॥१८॥ ऋ
तुमत्यप्युदक्यापि स्याद्रजः पुष्पमार्तवम्॥ श्रद्धालुर्दोहदवती निष्कला विगतार्तवा॥१९॥ आ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अमरको
१८

पन्नसत्वा स्याद्गुर्विण्यन्तर्वत्नी च गर्भिणी ॥ गणिकादेस्तु गाणिक्यं गार्भिणं यौवतं गणे ॥२०॥
पुनर्भूर्दिधिषूरूढा द्विस्तस्या दिधिषुः पतिः ॥ स तु द्विजोऽग्रेदिधिषूः सैव यस्य कुटुम्बिनी ॥२१॥
कानीनः कन्यकाजातः सुतोऽथ सुभगासुतः ॥ सौभागिनेयः स्यात्पारस्त्रैणेयस्तु परस्त्रियाः ॥२२॥
पैतृष्वसेयः स्यात्पैतृष्वस्रीयश्च पितृस्वसुः ॥ सुतो मातृष्वसुश्चैवं वैमात्रेयो विमातृजः ॥२३॥
अथ बान्धकिनेयः स्याद्बन्धुलश्चासतीसुतः ॥ कौलटेयः कौलटेरो भिक्षुकी तु सती यदि ॥२४॥ त
दा कौलटिनेयोऽस्याः कौलटेयोऽपि चात्मजः ॥ आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी ॥
२५॥ आहुर्दुहितरं सर्वेऽपत्यं तोकं तयोः समे ॥ स्वजाते त्वौरसोरस्यौ तातस्तु जनकः पिता ॥२६॥ जन
यित्री प्रसूर्माता जननी भगिनी स्वसा ॥ ननान्दा तु स्वसा पत्युर्नप्त्री पौत्री सुतात्मजा ॥२७॥ भार्यास्तु
भ्रातृवर्गस्य यातरः स्युः परस्परं ॥ प्रजावती भ्रातृजाया मातुलानी तु मातुली ॥२८॥ पतिपत्न्योः

राम
१८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सूः श्वश्रूः श्वसुरस्तु पिता तयोः । पितृभ्राता पितृव्यः स्यान्मातुर्भ्राता तु मातुलः ॥ १० ॥ श्यालास्युर्भ्रा
तरः पत्न्याः स्वामिनो देवृदेवरौ । स्वस्रीयो भागिनेयः स्याज्जामाता दुहितुः पतिः ॥ ११ ॥ पितामहः पि दि० २
तृपिता तत्पिता प्रपितामहः । मातुर्मातामहाद्येवं सपिण्डास्तु सनाभयः ॥ १२ ॥ समानोदर्यसोदर्यसगर्भ्य
सहजाः समाः । सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः ॥ १३ ॥ ज्ञातेयं बन्धुता तेषां
क्रमाद्भावसमूहयोः । धवः प्रियः पतिर्भर्त्ता जारस्तूपपतिः समौ ॥ १४ ॥ अमृते जारजः कुण्ड
ो मृते भर्त्तरि गोलकः । भ्रात्रीयो भ्रातृजो भ्रातृभगिन्यौ भ्रातरावुभौ ॥ १५ ॥ मातापिते
रौ पितरौ मातरपितरौ च तौ । श्वश्रूश्वशुरौ श्वशुरौ पुत्रौ पुत्रश्च दुहिता च ॥ १६ ॥ दम्पती जम्पती जाया
पती भार्यापती च तौ । गर्भाशयो जरायुः स्यादुल्वं च कललोऽस्त्रियाम् ॥ १७ ॥ सूतिमासो वैजननो
गर्भो भ्रूण इमौ समौ । तृतीयाप्रकृतिः षण्ढः क्लीवः पण्डो नपुंसके ॥ १८ ॥ शिशुत्वं शैशवं बाल्यं तारुण्य



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



[illegible]
[illegible]
।१३। [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] ।१४।

[illegible]

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यंश्चिकित्सारुक्प्रतिक्रियाभेषजौष[illegible]ज्यान्यगदोजायुरित्यपि ॥ ५०॥ स्त्रीरुग्रुजाचोपताप
रोगव्याधिगदामयाः ॥ क्षयःशोषश्चयक्ष्माचप्रतिश्यायस्तुपीनसः ॥ ५१॥ स्त्रीक्षुत्क्षुतंक्षवःपुंसिका
सस्तुक्षवथुःपुमान् ॥ शोफस्तुश्वयथुःशोथःपादस्फोटोविपादिका ॥ ५२॥ किलाससिध्मेकच्छ्वांतु
पा ५ पामपामाविचर्चिका ॥ कण्डूःखर्जूश्चकण्डूयाविस्फोटःपिटकःस्त्रियाम् ॥ [illegible]
[illegible]यामीर्ममरुःक्लीबेनाडीव्रणःपुमान् ॥ कोठोमण्डलकंकुष्ठश्वित्रेदु
र्नामकार्शसी ॥ ५४॥ आनाहस्तुविबन्धःस्याद्ग्रहणीरुक्प्रवाहिका ॥ प्रच्छर्दिकावमिश्चस्त्री
पुमांस्तुवमथुःसमाः ॥ ५५॥ व्याधिभेदाविद्रधिःस्त्रीज्वरमेहभगन्दराः ॥ अश्मरीमूत्रकृच्छ्रंस्यात्पूर्वे
शुक्रावधीत्रिषु ॥ ५६॥ रोगहार्यगदङ्कारोभिषग्वैद्यौचिकित्सके ॥ वार्त्तोनिरामयःकल्यउल्लाघो
निर्गतोगदात् ॥ ५७॥ ग्लानग्लास्नूआमयावीविकृतोव्याधितोऽपटुः ॥ आतुरोऽभ्यमितोऽभ्यान्तः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ओं तमोपामनकच्छुरौ॥ दद्रुणो दद्रुरोगी स्यादर्शोरोगयुतोर्शसः॥ वातकी वातरोगी स्यात्साति
॥१८॥ सारोतिसारकी॥ स्युः क्लिन्नाक्षे चुल्लचिल्लपिल्लाः क्लिन्नेक्ष्णि चाप्यमी॥ उन्मत्त उन्मादव
ति श्लेष्मलः श्लेष्मणः कफी॥ ६०॥ न्युब्जो भुग्ने रुजा वृद्धनाभौ तुण्डिलतुण्डिभौ॥ किलासी
सिध्मलोऽन्धोऽदृङ् मूर्छाले मूर्तमूर्छितौ॥ ६१॥ शुक्रं तेजोरेतसी च बीजवीर्येन्द्रियाणि च
मायुः पित्तं कफः श्लेष्मा स्त्रियां तु त्वगसृग्धरा॥ ६२॥ पिशितं तरसं मांसं पललं क्रव्यमामिषम्॥ उत्त
६ प्तं शुष्कमांसं स्यात्तद्वल्लूरं त्रिलिङ्गकम्॥ ६३॥ रुधिरेसृग्लोहितास्ररक्तक्षतजशोणितम्॥ बु
क्काग्रमांसं हृदयं हृन्मेदस्तु वपा वसा॥ ६४॥ पश्चाद्ग्रीवासिरा मन्या नाडी तु धमनिः सिरा॥ तिलकं क्लो राम
मस्तिष्कं गोर्दं किट्टं मलोस्त्रियाम्॥ ६५॥ अन्त्रं पुरीतद्गुल्मस्तु प्लीहा पुंस्यथ वस्नसा॥ स्नायुः
कालखण्डयकृती तु समे इमे॥ ६६॥ सृणिका स्यन्दिनी लाला दूषिका नेत्रयोर्मलम्॥ [illegible]॥ १८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वउखाप वस्कोरोहाम लंमाकु नमरु॰। पुरी षं गः थं वर्ष ल्कमस्त्री विष्टा विवेहि यो। स्या त्कर्पः कुपा
लोली की कसं कु स्मथि च। स्वाह्री रास्थि कं सौ लः व्रष्टा स्थि तु कस्ता स्को। शिरो रा थन्नि कं रा दिः
स्त्री यार्वस्थानि तु वार्षु का। अं कुंपुती कोः वय बाः पव नो पक लेवा म। ना चेवपुः संहनेन शुगी रंलर्भ
विरुद्धः। प्र॰। का रो देदः स्त्री षपु सो हि यां नि ल तु ल न। पा दा म षु व दं पा दः प दा हस्व णा गहि पु ४
पान। प्रा। नडु स्था पुरि केरु स्तो पुमा न्या हिः थेत लपः। जं मु तु प्र स्व तो जा नु रू व दी पी वदलि षं
प्ररः। हि लू हीं वपु मा न्हू स्ते ल्सः श्विः पुस्त्रि वं क्षा राः। गु दं लपा नं पा पु नो व लि नी मे र। ओ दु यो। प्रडु। के टो ना
रोलि पा ले कं का ट्ले रो लिः कं कु म ती। पख्वा नि त म्वः स्त्री क पाः स्त्री वं तु ज व्र नं पु रः। ०४ं। कु प को दु नि
तं व स्त्रो हु य हो ने कु कु न्दे रो। लि यां स्मि चो का दि प्रा थो गु प स्त्रो व व्यु मा रा यो। प्र पा। म गं यो नि ध सा शि
र नो पि दू मे ह न वे प क सी। पु ष्का रा को बो व ष रा ः प ष वं स्रा ध रो न्व को। प्र दृ। पि चि यि ए कें क्षी ज ठ रा दं

६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तुन्दः स्तनौ कुचौ ॥ चूचुकन्तु कुचाग्रं स्यान्नना क्रोडं भुजान्तरं ॥ ७१ ॥ उरो वत्सं च वक्षश्च पृष्ठन्तु चरमन्त
नोः ॥ स्कन्धो भुजशिरोंसोस्त्री संधी तस्यैव जत्रुणी ॥ ७२ ॥ बाहुमूले उभे कक्षौ पार्श्वमस्त्री तयोरधः ॥
मध्यमं चावलग्नं च मध्योस्त्री द्वौ परौ तयोः ॥ भुजबाहू प्रवेष्टो दोः स्यात्कफोणिस्तु कूर्परः ॥ अस्योप
रि प्रगंडः स्यात्प्रकोष्ठस्तस्य चाप्यधः ॥ ७३ ॥ मणिबन्धादाकनिष्ठं करस्य करभो बहिः ॥ पञ्चशाखः शयः पा
णिस्तर्जनी स्यात्प्रदेशिनी ॥ ७४ ॥ अङ्गुल्यः करशाखाः स्युः पुंस्यङ्गुष्ठः प्रदेशिनी ॥ मध्यमानामिका चा
पि कनिष्ठा चेति ताः क्रमात् ॥ पुनर्भवः कररुहो नखोस्त्री नखरोस्त्रियां ॥ प्रादेशता
लगोकर्णास्तर्जन्यादियुते तते ॥ ७५ ॥ अङ्गुष्ठे सकनिष्ठे स्याद्वितस्तिर्द्वादशाङ्गुलः ॥
पाणौ चपेटप्रतलप्रहस्ता विस्तृताङ्गुलौ ॥ ७६ ॥ द्वौ संहतौ संहतलप्रतलौ वामदक्षिणौ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पापाग्नि कुजः भृगुः निसौम्यसुता शनिः पुमान् [illegible] प्रकोष्ठाविलग्ने तु केंद्रे हन्ति स्यात्तु वदुष्या
सुतिः स्याद्धनिस्तु निः कनिष्ठे न पृष्ठे ना [illegible] प्रमा भौमो लग्ने यो स्ति पिंगं तं
उद्धिनिस्तु तदोष्मा नि – [illegible] सपवित्रि [illegible] कोष्ठाग न स्थ्य सीवा यां मिश्रा धि के विस्त्य कें
वृषी वा त्रिरेखा ॥ बुधपंक्को [illegible] वक्र नासे वदने तु [illegible] न सप्ने [illegible] ॥ श्री बोधा गंगे
धनसाधो शानामाव नासिका ॥ ओष्ठाधरौ तु रदन [illegible] दशन वा [illegible] ॥ अथ [illegible] ॥ धनुर्वा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ को

॥ ४० ॥

वैरिः पुर्वेशीषो [illegible] स्यो विप्रादे करे च ॥ पाप्मा: पक्षस्व [illegible] स्व केना पापौ: कचात्वे ॥ [illegible] तत्र
रहसोमनोमते द्रुक्रो ममधुपुत्रके ॥ [illegible] केनावेषो ने पथ्यं प्रति कर्म प्रसाधनम् ॥ २७ ॥ रोते त्रिषु लक्ष्म तो
ल [illegible] कारिस्तु स्वमराज्नः प्रमाधितोल कुन [illegible] षि नस्व पारिकृत ॥ ०८ ॥ विभक्तू जिष्णुरोचि [illegible] यातु
स्यादलङ्क्रि या ॥ अलंको [illegible] भरणं वाभिरू [illegible] विभूषणं ॥ [illegible] मणुने आथम कुटकिरीटपुंनपुंसकम् ॥
चूडामणिः शिरोरत्नं तरलो हारमध्यगः ॥ [illegible] वालपाश्या पारितथ्या पत्रपाश्या ललाटिका ॥ कर्णिका ता
लपत्रं स्यात् कुण्डलं कर्णवेष्टनं ॥ पत्र [illegible] वेयकं कण्ठभूषा लम्बनं स्याल्ललन्तिका ॥ स्वर्णैः प्राल
काथो रुक्मसूत्रकं मे [illegible] कं: [illegible] ॥ [illegible] मुक्तावली देवच्छन्दो [illegible] पष्टिके ॥ हारभेद
[illegible] मतते माणवकोर्धकोर्धं [illegible] पष्टिका ॥ [illegible] नक्षत्र ॥ ४८ ॥
मालास्यात् सप्तविंशतिमौक्तिकैः [illegible] ॥ आपादः पारिहार्यः कटकः केवलं [illegible] ॥ के

॥ राम ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यूरमंगदं तुल्ये अङ्गुलीयकमूर्म्मिकां ॥१०४॥ श्रीगणेशाय नमः ॥

मंगलं भगवा[illegible] [illegible]

[illegible] करोतु मे ॥ [illegible]

[illegible] १८ २०

सुचेलकः पटोऽस्त्री वराशिः स्थूलशाटकः ॥ निचोलः प्रच्छदपटः समौ रल्लककंबलौ ॥१०५॥ अन्तरीयोप
संव्यानपरिधानान्यधोंऽशुके ॥ द्वौ प्रावारोत्तरासंगौ समौ बृहतिका तथा ॥१०६॥ संव्यानमुत्तरीयं च चोलः
कूर्पासकोऽस्त्रियां ॥ नीशारः स्यात्प्रावरणे हिमानिलनिवारणे ॥१०७॥ अर्द्धोरुकं वरस्त्रीणां स्याच्चं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उत्कटं स्युकम्॥ स्यात्रिष्वाप्रपदीनं तत्प्राप्नोत्याप्रपदं हियत्॥१६॥ अस्त्रीवितानमुल्लोचो दूष्याद्यं
अको वस्त्रवेश्मनि॥ प्रतिसीरा जवनिका स्यात्तिरस्करिणी च सा॥१७॥ परिकर्माङ्गसंस्कारः स्यान्मार्ष्टि
र्मार्जना मृजा॥ उद्वर्तनोत्सादने द्वे समे आप्लाव आप्लवः॥१८॥ स्नानं चर्चा तु चार्चिक्यं स्थासकोप्र
२१ बोधनम्॥ अनुबोधः पत्रलेखा पत्राङ्गुलिरिमे समे॥१९॥ तमालपत्रतिलकचित्रकाणि वि
शेषकः॥ द्वितीयं च तुरीयं च न स्त्रियामथ कुङ्कुमं॥२०॥ काश्मीरजन्माग्निशिखं वरं बाल्हीक
पीतनम्॥ रक्तसंकोचपिशुनं धीरं लोहितचंदनं॥२१॥ लाक्षा राक्षा जतु क्लीबे यावो लक्तो रामः
द्रुमामयः॥ लवंगं देवकुसुमं श्रीसंज्ञमथ जायकं॥२२॥ कालीयकं च कालानुसार्यं चा २१
थ समार्थकम्॥ वंशिकागुरुराजार्हं लोहं कृमिजजोंगकं॥२३॥ कालागुर्वगुरुः स्यात्तु

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न्मंगस्याम क्लिंगं धियंत्रा ॥ पक्षधूपः सर्जरसो रालसर्वरसावपि ॥४७॥ बहुरूपोऽप्यथवृकधूप
कृत्रिमधूपकौ ॥ तुरुष्कः पिंडकः सिह्लो यावनोऽप्यथ पायसः ॥४८॥ श्रीवासो वृकधूपोऽपि
श्रीवे ष्टसरलद्रवौ ॥ मृगनाभिर्मृगमदः कस्तूरी चाथ कोलकं ॥४९॥ कक्कोलकं कोशफलम
थ कर्पूरमस्त्रियां ॥ घनसारश्चंद्रसंज्ञः सितांभो हिमवालुका ॥५०॥ गंधसारो मलयजो भद्र
श्रीश्चंदनोऽस्त्रियां ॥ तैलपर्णिकगोशीर्षे हरिचंदनमस्त्रियां ॥५१॥ तिलपर्णी तु पत्रां
गं रंजनं रक्तचंदनं ॥ कुचंदनं चाथ जातीकोशजातीफले समे ॥५२॥ कर्पूरागुरुकस्तूरी
कक्कोलैर्यक्षकर्दमः ॥ गात्रानुलेपनी वर्तिर्वर्णकं स्याद्विलेपनं ॥५३॥ चूर्णानि वास
योगाः स्युर्भावितं वासितं त्रिषु ॥ संस्कारो गंधमाल्याद्यैर्यः स्यात्तदधिवासनं ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

अ॰ को॰ द्वि॰ २२

(ला) (गर्भ)

माल्यं मालास्रजौ मूर्द्धि केशमध्ये तु गर्भकः ॥ प्रभ्रष्टकं शिखालंबि पुरोन्यस्तं ललामकं ॥ प्रा
लंबमृजुलंबि स्यात्कण्ठाद्वैकक्षकं तु तत् ॥ यत्तिर्यक्क्षिप्तमुरसि शिखास्वापीडशेखरौ ॥ ३२ ॥
रचना स्यात्परिस्पन्द आभोगः परिपूर्णता ॥ उपधानं तूपबर्हः शय्यायां श
यनीयवत् ॥ ३३ ॥ शयनं मञ्चपर्यङ्कपल्यङ्काः खट्वया समाः ॥ गेन्दुकः कन्दुको दीप
प्रदी पः पीठमासनं ॥ ३४ ॥ समुद्गकः संपुटकः प्रतिग्राहः पतद्ग्रहः ॥ प्रसाधनी कंकति
का पिष्टातः पटवासकः ॥ दर्पणे मुकुरादर्शौ व्यजनं तालवृन्तकं ॥ ३५ ॥
इति मनुष्यवर्गः ॥ ६ ॥ संततिर्गोत्रजननकुलान्यभिजनान्वयौ ॥ वंशोऽन्ववायः स
न्तानो वर्णाः स्युर्ब्राह्मणादयः ॥ १ ॥ विप्रक्षत्रियविट्शूद्राश्चातुर्वर्ण्यमिति स्मृतं ॥ सम २०

CC-0. Digitized by eGangotri and MIDF- Delhi
Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राजबीजी राजवंश्यो बीज्यस्तु कुलसंभवः ॥२॥ महाकुलकुलीनार्यसभ्यसज्जनसा
धवः ॥ ब्रह्मचारी गृही वानप्रस्थो भिक्षुश्चतुष्टये ॥३॥ आश्रमोऽस्त्री द्विजात्यग्रजन्म
८ भूदेववाडवाः ॥ विप्रश्च ब्राह्मणोऽसौ षट्कर्मा यागादिभिर्युतः ॥४॥ विद्वान्विपश्चिद्दोष
ज्ञः सन्सुधीः कोविदो बुधः ॥ धीरो मनीषी ज्ञः प्राज्ञः संख्यावान्पण्डितः कविः ॥५॥
धीमान्सूरिः कृती कृष्टिर्लब्धवर्णो विचक्षणः ॥ दूरदर्शी दीर्घदर्शी श्रोत्रियच्छान्
दसौ समौ ॥६॥ उपाध्यायोऽध्यापकोऽथ स निषेकादिकृद्गुरुः ॥ मन्त्रव्याख्याकृदा
चार्य आदेष्टा त्वध्वरे व्रती ॥७॥ यष्टा च यजमानश्च स सोमवति दीक्षितः ॥ इज्याशी
लो यायजूको यज्वा तु विधिनेष्टवान् ॥८॥ स गीष्पतीष्ट्या स्थपतिः सोमपीथी सोमपीत्



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



सोमपाः॥ सर्ववेदास येनेष्टो यागः सर्वस्वदक्षिणः॥ अनूचानः प्रवचने साङ्गेधीती
गुरोस्तु यः॥ लब्धानुज्ञः समावृत्तः सुत्वा त्वभिषवे कृते॥१०॥ छात्रान्तेवासिनौ शिष्ये शैक्षाः प्र
थमकल्पिकाः॥ एकब्रह्मव्रताचारा मिथः सब्रह्मचारिणः॥११॥ सतीर्थ्यास्त्वेकगुरवश्चि
तेणानग्निमग्निचित्॥ पारम्पर्योपदेशे स्यादैतिह्यमितिहाव्ययम्॥ उपज्ञा ज्ञान
माद्यं स्याज्ज्ञात्वारम्भ उपक्रमः॥ यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः॥१२॥ पाठो होम
श्चातिथीनां सपर्या तर्पणं बलिः॥ एते पञ्च महायज्ञा ब्रह्मयज्ञादिनामकाः॥१३॥ समा
ज्या परिषद्गोष्ठी सभा समितिसंसदः॥ आस्थानी क्लीबमास्थानं स्त्रीनपुंसक
योः सदः॥१४॥ प्राग्वंशः प्राग्घविर्गेहात्सदस्या विधिदर्शिनः॥ सभासदः सभास्ताराः



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सभ्याः सामाजिकाश्च ते ॥ अध्वर्यूद्गातृहोतारो यजुःसामर्ग्विदः क्रमात् ॥ आग्नी
ध्राद्या धनैर्वार्या ऋत्विजो याजकाश्च ते ॥१७॥ वेदिः परिष्कृता भूमिः समे स्थण्डिलच
त्वरे ॥ चषालो यूपकटकः कुम्बा सुगहना वृतिः ॥१८॥ यूपाग्रं तर्म निर्मन्थ्यदारु
स्वरा तरणिर्द्वयोः ॥ दक्षिणाग्निर्गार्हपत्याहवनीयौ त्रयोऽग्नयः ॥१९॥ अग्नित्रयमिदं त्रे
ता प्रणीतः संस्कृतोऽनलः ॥ समूह्यः परिचाय्योपचाय्यावग्नौ प्रयोगिणः ॥२०॥
यो गार्हपत्यादानीय दक्षिणाग्निः प्रणीयते ॥ तस्मिन्नानाय्योऽथाग्नायी स्वाहा
च हुतभुक्प्रिया ॥२१॥ ऋक् सामिधेनी धाय्या च या स्यादग्निसमिन्धने ॥ गायत्रीप्रमुखं
छन्दो हव्यपाके चरुः पुमान् ॥२२॥ आमिक्षा सा शृतोष्णे या क्षीरे स्याद्दधियोगतः ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



धिवत्वं व्यंजनं त्वेपदुचितं मृगचर्मणि ॥२३॥ पृषदाज्यं सदध्याज्ये परमान्नं तु पायसं ॥ ह
व्यकव्ये दैवपित्र्ये अन्ने पात्रं स्रुवादिकं ॥२४॥ ध्रुवोपभृज्जुहूर्नातु स्रुवो भेदाः स्रुचः स्त्रियः
उपाकृतः पशुरसौ योभिमन्त्र्य क्रतौ हतः ॥२५॥ परम्पराकं शमनं प्रोक्षणं च वधार्थकाः ॥ वा
च्यलिंगाः प्रमीतोपसम्पन्नप्रोक्षिता हते ॥२६॥ सान्नाय्यं हविरग्नौ तु हुतं त्रिषु वषट्कृतं ॥ दी
क्षान्तोवभृथो यज्ञे तत्कर्मार्हं तु यज्ञियं ॥२७॥ त्रिष्वथ क्रतुकर्मेष्टं पूर्तं खातादि क
र्म यत् ॥ अमृतं विघसो यज्ञशेषभोजनशेषयोः ॥२८॥ त्यागो विहापितं दानमुत्स
र्जनविसर्जने ॥ विश्राणनं वितरणं स्पर्शनं प्रतिपादनं ॥२९॥ प्रादेशनं निर्वपणं
मपवर्जनमंहतिः ॥ मृतार्थं तदहे दानं त्रिषु स्यादौर्ध्वदेहिकं ॥३०॥ पितृदानं निवापः



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्वाहार्यं मासिकेंऽशोऽष्टमोऽह्नः कुतपोऽस्त्रियां ॥ पर्येषणा परीष्टिश्चान्वेषणा च ग
वेषणा ॥३१॥ सनिस्त्वध्येषणा याञ्चाऽभिशस्तिर्याचनार्थना ॥ षट्तु त्रिष्वर्घ्यमर्घार्थे पा
द्यं पादाय वारिणि ॥३२॥ क्रमादातिथ्यातिथेये अतिथ्यर्थेऽत्र साधुनि ॥ स्यादा
वेशिक आगन्तुरतिथिर्ना गृहागते ॥३३॥ पूजा नमस्यापचितिः सपर्यार्चार्हणाः
समाः ॥ वरिवस्या तु शुश्रूषा परिचर्याप्युपासनं ॥३४॥ व्रज्याटाट्या पर्यटनं चर्या त्वीर्याप
थे स्थितिः ॥ उपस्पर्शस्त्वाचमनमथ मौनमभाषणं ॥३५॥ आनुपूर्वी स्त्रियां वावृत्परि
पाटी अनुक्रमः ॥ पर्यायश्चातिपातस्तु स्यात्पर्यय उपात्ययः ॥३६॥ नियमो व्रतमस्त्री
तच्चोपवासादि पुण्यकं ॥ उपवस्तस्तूपवासो विवेकः पृथगात्मता ॥३७॥ स्याद्ब्रह्मव

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

२ कस्याः शोस्वे निधौ न्यायेसद्धतौ ब्रह्मसौ दिने ॥२

CC-0. Digitized by eGangotri and MIDF- Delhi

कोदि
२५

र्चसं वृत्ताध्ययनर्द्धिरथाञ्जलिः॥ पाठेब्रह्माञ्जलिः पाठे प्रुषो ब्रह्मबिन्दवः॥१८॥ ध्यानयोगासने
ब्रह्मासनं कल्पे विधिक्रमौ॥ मुख्यः स्यात्प्रथमः कल्पोऽनुकल्पस्तु ततोऽधमः॥१९॥ सं
स्कारपूर्वग्रहणं स्यादुपाकरणं श्रुते॥ समे तु पादग्रहणमभिवादनमित्युभे॥
भिक्षुपरिव्राट् कर्मन्दी पाराशर्यपि मस्करी॥ तपस्वी तापसः पारिकांक्षी वाचंयमो मु
निः॥२०॥ तपःक्लेशसहो दान्तो वर्णिनो ब्रह्मचारिणः॥ ऋषयः सत्यवचसः स्नातकस्त्वाप्लुतव्र
ती॥२१॥ ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च ते॥ यः स्थण्डिले व्रतवशाच्छेते स्थण्डिलशाय्य
सौ॥२२॥ स्थाण्डिलश्चाथ विरजस्तमसः स्युर्द्वयातिगाः॥ पवित्रः प्रयतः पूतः पाषण्डाः सर्वलिंगिनः॥२३॥

छुराम छुराम छुराम छुराम छुराम छुराम छुराम छुराम छुराम राम छुरामः

राम
२५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पालाशो दंडआषाढो व्रतेष्वभात्तु वैल्वः ॥ अश्लीकमस्य स्नायुः ऽतिवृत्तिनामास्रजं वर्षी ॥४६॥ दास्त्रिति
नवमसृक्ति स्त्रीभैक्षं भिक्षाकदम्बकं ॥ विधा धारा यः स्यात्रपः स्मृ न्माभिषवः प्रवर्तनं
यस्य ॥४७॥ सर्वैनसामपध्वंसि जप्यं त्रिषवणमघमर्षणं ॥ दर्शश्च पौर्णमासश्च
प्रागेव यागे पार्वणः पृथक् ॥४८॥ शरीरसाधनापेक्षं नित्यं यत्कर्म तद्यमः ॥ नियम
स्तु यत्कर्म नित्यमागन्तुसाधनं ॥४९॥ उपवीतं यज्ञसूत्रं प्रोद्धृते दक्षिणे करे ॥ प्राचीनावी
तमन्यस्मिन्निवीतं कण्ठलम्बितं ॥५०॥ अंगुल्यग्रे तीर्थं दैवं स्वल्पांगुल्योर्मूले कायं ॥ मध्यें
गुष्ठांगुल्योः पित्र्यं मूले त्वंगुष्ठस्य ब्राह्मं ॥५१॥ स्याद्ब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायुज्यमित्य
पि ॥ देवभूयादिकं तद्वत्कृच्छ्रं सांतपनादिकं ॥५२॥ संन्यासवत्यनशने पुमान्प्रायो

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यवीरहा ॥ नष्टाग्निः कुहना लोभान्मिथ्येर्यापथकल्पना ॥५३॥ व्रात्यः संस्कारहीनः स्यादस्वा
ध्यायो निराकृतिः ॥ धर्मध्वजी लिंगवृत्तिरवकीर्णी क्षतव्रता ॥५४॥ सुप्ते यस्मिन्नस्त
मेति सुप्ते यस्मिन्नुदेति च ॥ अंशुमानभिनिर्मुक्ताभ्युदितौ नौ यथाक्रमात् ॥५५॥ परिवेत्तानु
अ·को·द्वि· जोनूढे ज्येष्ठे दारपरिग्रहात् ॥ परिवित्तिस्तु तज्ज्यायान्विवाहोपयमौ समौ ॥५६॥ तथा परिणयो
॥२६॥ द्वाहोपयामाः पाणिपीडनं ॥ व्यवायो ग्राम्यधर्मो मैथुनं निधुवनं रतं ॥५७॥ त्रिवर्गो ध
र्मकामार्थैश्चतुर्वर्गः समोक्षकैः ॥ सबलैस्तैश्चतुर्भद्रं जन्याः स्निग्धा वरस्य ये ॥५८॥
ः इति ब्रह्मवर्गः ॥ ः ॥ मूर्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट् ॥ राजा राट् पार्थि ॥ राम·
वः क्ष्माभृन्नृपभूपमहीक्षितः ॥१॥ राजा तु प्रणताशेषसामन्तः स्यादधीश्वरः ॥ चक्रवर्ती सार्वभौमो ॥ २६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नृपोन्यो मंडलेश्वरः ॥२॥ येनेष्टं राजसूयेन मंडलस्येश्वरश्च यः ॥ शास्ति यश्चाज्ञया राज्ञः स सम्राडथ
राजकं ॥३॥ राजन्यकं च नृपतिक्षत्रियाणां गणे क्रमात् ॥ मंत्री धीसचिवो ऽमात्यो ऽन्ये कर्मस
चिवास्ततः ॥४॥ महामात्राः प्रधानानि पुरोधास्तु पुरोहितः ॥ द्रष्टरि व्यवहाराणां प्राड्विवाकाक्षद
र्शकौ ॥५॥ प्रतीहारो द्वारपालद्वास्थद्वाःस्थितदर्शकाः ॥ रक्षिवर्गस्त्वनीकस्थो ऽथाध्यक्षाधि धि.४
कृतौ समौ ॥६॥ स्थायुको ऽधिकृतो ग्रामे गोपो ग्रामेषु भूरिषु ॥ भौरिकः कनकाध्यक्षो रूप्याध्य
क्षस्तु नैष्किकः ॥७॥ अंतःपुरे त्वधिकृतः स्यादंतर्वंशिको जनः ॥ सौविदल्लाः कंचुकिनः स्थापत्याः
सौविदाश्च ते ॥८॥ शंढो वर्षवरस्तुल्याः सेवकार्थ्यनुजीविनः ॥ विषयानंतरो राजा शत्रुर्मित्रम
तः परं ॥९॥ उदासीनः परतरः पार्ष्णिग्राहस्तु पृष्ठतः ॥ रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः ॥१०

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

को॰दि
२२

द्विड्विपक्षाहितामित्रदस्युशात्रवशत्रवः॥ अभिघातिपरारातिप्रत्यर्थिपरिपंथिनः॥१॥ व
यस्यः स्निग्धः सवया अथ मित्रं सखा सुहृत्॥ सख्यं साप्तपदीनं स्यादनुरोधोऽनुवर्त्तनं॥२॥
यथार्हवर्णः प्रणिधिरपसर्पश्चरः स्पशः॥ चारश्च गूढपुरुषश्चाप्तप्रत्ययितौ समौ॥३॥ स
सांवत्सरो ज्योतिषिको दैवज्ञगणकावपि॥ स्युर्मौहूर्तिकमौहूर्तज्ञानिकार्तांतिका अपि॥४॥ ता
तांत्रिको ज्ञातसिद्धांतः सत्री गृहपतिः समौ॥ लिपिकारोऽक्षरचणोऽक्षरचुंचुश्च लेखके॥५॥ लि
लिखिताक्षरसंस्थाने लिपिर्लिबिरुभे स्त्रियौ॥ स्यात्संदेशहरो दूतो दूत्यं दूतस्य कर्मणि॥६॥
अध्वनीनोऽध्वगोऽध्वन्यः पांथः पथिक इत्यपि॥ स्वाम्यमात्यसुहृत्कोषराष्ट्रदुर्गबलानि च॥७॥
राज्यांगानि प्रकृतयः पौराणां श्रेणयोऽपि च॥ संधिर्ना विग्रहो यानमासनं द्वैधमाश्रयः॥८॥ ।राम॥

२२

CC-0. Digitized by eGangotri and MIDF- Delhi

षड्गुणाः शक्तयस्तिस्रः प्रभावोत्साहमन्त्रजाः ॥१८॥ क्षयः स्थानं च वृद्धिश्च त्रिवर्गो नीतिवेदिनां ॥ स
प्रतापः प्रभावश्च यत्तेजः कोषदण्डजं ॥१९॥ भेदो दण्डः साम दानमित्युपायचतुष्टयं ॥ साहसं तु दमो दण्डः
साम सान्त्वमथो समौ ॥२०॥ भेदोपजापावुपधा धर्माद्यैर्यत्परीक्षणं ॥ पञ्च त्रिष्वषडक्षीणो यस्तृ
तीयाद्यगोचरः ॥२१॥ विविक्तविजनच्छन्ननिःशलाकास्तथा रहः ॥ रहश्चोपांशु चालिङ्गे रहस्यं त्रि
षु तद्भवे ॥२२॥ समौ विस्रम्भविश्वासौ भ्रेषो भ्रंशो यथोचितात् ॥ अभ्रेषन्यायकल्पास्तु देशरूपं स
मञ्जसम् ॥२३॥ युक्तमौपयिकं लभ्यं भजमानाभिनीतवत् ॥ न्याय्यं च त्रिषु षट् संप्रधारणा तु
समर्थनं ॥२४॥ अववादस्तु निर्देशो निदेशः शासनं च सः ॥ शिष्टिश्चाज्ञा तु संस्था तु मर्यादा धार
णा स्थितिः ॥२५॥ आगोऽपराधो मन्तुश्च समौ तूद्दानबन्धने ॥ द्विपाद्यो द्विगुणो दण्डो भागधेयः क
रो बलिः ॥२६॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यचादिदेयमुत्कोचः स्त्री प्राभृतं तु प्रदेशनं ॥ उपायनमुपग्राह्यमुपहारस्तथोपदा ॥२७॥ यौतुका
अको दि तु यद्देयं सुदायो हरणं च तत् ॥ तत्कालस्तु तदात्वं स्यादुत्तरः काल आयतिः ॥२८॥ सांदृष्टि
२९ कं फलं सद्य उदर्कः फलमुत्तरं ॥ अदृष्टं वह्नितोयादि दृष्टं स्वपरचक्रजं ॥२९॥ महीभुजा
महिभयं स्वपक्षप्रभवं भयं ॥ प्रक्रिया त्वधिकारः स्याच्चामरं तु प्रकीर्णकं ॥३०॥ नृपास
नं यत्तद्भद्रासनं सिंहासनं तु तत् ॥ हैमं छत्रं त्वातपत्रं राज्ञस्तु नृपलक्ष्म तत् ॥३१॥ भद्र
कुम्भः पूर्णकुम्भो भृङ्गारः कनकालुका ॥ निवेशः शिबिरं षण्डे सज्जनं तूपरक्षणं ॥३२॥ हस्त्य
श्वरथपादातं सेनाङ्गं स्याच्चतुष्टयं ॥ दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः ॥३३॥
मतङ्गजो गजो नागः कुञ्जरो वारणः करी ॥ इभः स्तम्बेरमः पद्मी यूथनाथस्तु यूथपः ।
२४ ॥ राम
२९

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



मदोत्कटो मदकलः कलभः करिपोतकः॥ प्रभिन्नो गर्जितो मत्तः समावुद्वान्तनिर्मदौ॥ हा
स्तिकं गजता वृन्दे करिणी धेनुका वशा॥ गंडः कटो मदो दानं वमथुः करशीकरः॥ कुंभौ
तु पिंडौ शिरसस्तयोर्मध्ये विदुः पुमान्॥ अवग्रहो ललाटं स्यादीषिका त्वक्षिकूटकं॥
अपांगदेशो निर्याणं कर्णमूलं तु चूलिका॥ अधः कुंभस्य वाहित्थं प्रतिमानमधोस्य यत्॥
आसनं स्कंधदेशः स्यात्पद्मकं बिंदुजालकं॥ पक्षभागः पार्श्वभागो दंतभागस्तु योग्रतः॥
द्वौ पूर्वपश्चाज्जंघादिदेशौ गात्रावरे क्रमात्॥ तोत्रं वेणुकमालानं बंधस्तंभेथ शृंखले॥ अं
दुको निगडोस्त्री स्यादंकुशोस्त्री सृणिः स्त्रियां॥ दूष्या कक्ष्या वरत्रा स्यात्कल्पना सज्जना समे॥
प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथो द्वयोः॥ वीतं त्वसारं हस्त्यश्वं वारी तु गजबंधनी॥ घोटके
पीति तुरगतुरंगाश्वतुरंगमाः॥ वाजिवाहार्वगंधर्वहयसैंधवसप्तयः॥ ४४॥ आजानेयाः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रबोधि
२२

कुली नाः सुर्विनी ताः साधुवादिनः ॥ वीना युक्ताः पासीका कां बोजावा प्रिकांदेयाः ॥ ७४ ॥ प
पुरुषो ऽष्टमयी यो ज्ञेव नस्तु ज्ञेयाधिकः ॥ एष पः स्थौरीसित कंकी ऽयो त्रयस्त्रयः ॥ सा वालु कि
शोरे वा प्यष्टा बश्वा वा ऽवकु रो ॥ विषुभ्यो नेय दक्षे न दिनेनैकेन गम्यते ॥ महाकपयं तु मध्यमध्वानां
देवोकृष्णाचेनि स्वनः ॥ निमांस स्तु गलो दिव्यो वृ दे त्वमी घमाश्चघतः ॥ ७ ॥ आ स्वस्ति तां बोरितकं पि चतं
वसितं सुतं ॥ गतश्चामः पं चे धारं पो गात्युप्रो धमसि ति यांधता कवि कातुरव लीनो त्वीकाफं कीखलुः
पुमानां पुष्टो ऽक्षीस्मन् लागले वा लक्ष्मत्स्यवासधिंध ॥ विरूपा कृष्णाविती पराष्टते मुकुर्भवि ॥ याने च
क्षितिपुत्रापर्वत ताः कुःस्यंदनोरथा ॥ ७ ॥ पयकोवसवा कपा केव लादिपितावृते ॥ विशुद्धपांडुर्वा ध्याप
थवकाघ्रास्यावश्मा ॥ पा ॥ कः श्रीसी केमा नेपुरुवस्यादुधावम पश्कर ॥ यकेस्याङ्गते स्यां क्षेत्रेसि स्त्री स्वास्थ
धिःपुमानां ॥ पा ॥ पिंडिकानां मिक्षांतवकीः सेवकैः पुच पानति ॥ स्पयगृहि विस्त्रीनांकेवरत्तु ग ॥ पा ॥ अ

३ असोपुष्पारंपक्षकपानलसकरापयति ॥ कपी स्य पुष्पवस्तांत्स्य च्यासमक्षयां ॥ पुंसी पुनः शयकाक्षीस्पापुत्री कंबलिकापकर ॥
३ सीवि काया च्यवा ...

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

पान
२२

५२ गु

CC-0. Digitized by eGangotri and MIDF- Delhi

तुकेधीराघषः स्थप्रासंगो नायुगाद्युगः ॥ सर्वंस्याद्वाहनं यानं युग्मं पत्रं च धोरणं ॥ ४४ ॥ परम्पराबाहनं यं
तद्वैनीतकमस्त्रियां ॥ आधोरणा हस्तिपका हस्त्यारोहा निषादिनः ॥ ४५ ॥ नियन्ता प्राजिता यन्ता
सूतः क्षत्ता च सारथिः ॥ सव्येष्ठ दक्षिणास्थौ च संज्ञा रथकुटुम्बिनः ॥ ४६ ॥ रथिनः स्यन्दनारोहा अश्वारोहास्तु
सादिनः ॥ भटा योधाश्च योद्धारः सेनारक्षास्तु सैनिकाः ॥ ४७ ॥ सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते ॥ बलि
नो ये सहस्रेण साहस्रास्ते सहस्रिणः ॥ ४८ ॥ परिधिस्थः परिचरः सेनानीर्वाहिनीपतिः ॥ कंचुको वारबाणो ऽ ५६
स्त्री यत्तु मध्ये सकंचुकाः ॥ ४९ ॥ बध्नन्ति तत्सारसनमधिकाङ्गो ऽथ शीर्षकं ॥ शीर्षण्यं च शिरस्त्रे ऽथ तनुत्रं व
र्म दंशनं ॥ ५० ॥ उरश्छदः कंकटको जगरः कवचो ऽस्त्रियां ॥ आमुक्तः प्रतिमुक्तश्च पिनद्धश्चापिनद्धवत्
॥ ५१ ॥ सन्नद्धो वर्मितः सज्ज दंशितो व्यूढकंकटः ॥ त्रिष्वामुक्तादयो वर्मभृतां कावचिकं गणे ॥ पदाति
पत्तिपदगपादातिकपदाजयः ॥ पदगश्च पदिकश्चाथ पादातं पत्तिसंहतिः ॥ ५३ ॥ शस्त्राजीवे काण्डपृष्ठा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अमो
३०

धीयायुधिकाः समाः॥ कृतहस्तः सुप्रयोगविशिखः कृतपुंखवत्॥ ६४॥ अपराद्धपृषत्कोऽसौ लक्ष्या-
च्च्युतसायकः॥ धन्वी धनुष्मान् धानुष्को निषङ्ग्यस्त्री धनुर्द्धरः॥ ६५॥ स्यात्काण्डवांस्तु काण्डीरः शा-
क्तीकः शक्तिहेतिकः॥ याष्टीकपारश्वधिकौ यष्टिपरश्वधहेतिकौ॥ ६६॥ नैस्त्रिंशिकोऽसिहेतिः स्या-
त्समौ प्रासिककौन्तिकौ॥ चर्मी फलकपाणिः स्यात्पताकी वैजयन्तिकः॥ ६७॥ अनुप्लवः सहायश्चानुचरोऽभिस-
रः समाः॥ पुरोगाग्रेसरप्रष्ठाग्रतःसरपुरःसराः॥ ६८॥ पुरोगमः पुरोगामी मन्दगामी तु मन्थरः
जङ्घालोऽतिजवस्तुल्यौ जङ्घाकरिकजाङ्घिकौ॥ ६९॥ तरस्वी त्वरितो वेगी प्रजवी जवनो जवः॥ जय्यो
यः शक्यते जेतुं जेयो जेतव्यमात्रके॥ ७०॥ जैत्रस्तु जेता यो गच्छत्यलं विद्विषतः प्रति॥ सोऽभ्यमित्र्योऽ
मित्रीणइत्यपि॥ ७१॥ ऊर्जस्वलः स्यादूर्जस्वी य ऊर्जातिशयान्वितः॥ स्यादुरस्वानुरसिलो रथिको
रथिनो रथी॥ ७२॥ कामङ्गाम्यनुकामीनोऽत्यन्तीनस्तथा भृशं॥ शूरो वीरश्च विक्रान्तो जेता जिष्णुश्च

रम
३०

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्याच्चित्वरः॥७३॥ सांयुगीनो रणे साधुः शस्त्राजीवायुधिकौ॥ ध्वजिनी वाहिनी सेना पृतनानीकि-
नी चमूः॥७४॥ वरूथिनी बलं सैन्यं चक्रं चानीकमस्त्रियां॥ व्यूहस्तु बलविन्यासो भेदा दण्डादयो यु-
धि॥७५॥ प्रत्यासारो व्यूहपार्ष्णिः सैन्यपृष्ठे प्रतिग्रहः॥ एकेभैकरथा त्र्यश्वा पत्तिः पञ्चपदाति-
का॥७६॥ पत्त्यङ्गैस्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्तरं॥ सेनामुखं गुल्मगणौ वाहिनी पृतना च-
मूः॥७७॥ अनीकिनी दशानीकिन्यक्षौहिण्यथ सम्पदि॥ सम्पत्तिः श्रीश्च लक्ष्मीश्च विपत्त्यां विप-
दापदौ॥७८॥ आयुधं तु प्रहरणं शस्त्रमस्त्रमथास्त्रियौ॥ धनुश्चापौ धन्वशरासनकोदण्डकार्मु-
कं॥७९॥ इष्वासोऽप्यथ कर्णस्य कालपृष्ठं शरासनं॥ कपिध्वजस्य गाण्डीवगाण्डिवौ पुंनपुंसके॥
॥८०॥ कोटिरस्याटनी गोधातले ज्याघातवारणे॥ लस्तकस्तु धनुर्मध्यं मौर्वी ज्या शिञ्जिनी गुणः॥
॥८१॥ स्यात्प्रत्यालीढमालीढमित्यादि स्थानपञ्चकं॥ लक्षं लक्ष्यं शरव्यं च शराभ्यास उपासनं॥८२॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



पयत्कवा।।विमिरवात्पुजिस्मेगरवगा।सुगा।।कंतुधर्मार्गणाम्याः पञ्चीणोपरवर्दुर्दुयोः।।जा।।पक्षी
ऽनोतृनारा चाः पक्षो वा जाक्षिप्ततरो।निरत्तः पूदितैवा।णोविया ह्नो दिग्धा शिवृकोणा।।त।।तरोणा
संगकुनी रनिषंगाद्द्भु पिद्गौ।।हरूपाके गृनि।कंमारंभ पूणासा।सिरिष्युः।।छ।।कौक्षेपक्षौ
मऽसा।मः कवोसः कुपा रावता।दसतः।क।दिगुषिः स्पा नौ खेनातत्रिव नमा।।छ।।गाण्युधीः
लियां स्त्रिः पांमृत्नानपयारजः।। ... दिः सम्तु तिपं आपिं जरो भक्ष्मांकुलो।।छ।।प
तावीवेजयंती स्पाकेतनं ध्वजं मास्त्रि याम।।सा विरामसन्त पुरुषस्मि यौसि भयप्रदा
णा।जाकं पूर्वमनं दर्सं मित्यस्त्रप्रविंकारिस्यौ। आणोपुक्षिकाद पांप्यास्पा संभवना
मानीरणा।। प्रसमाह भिकाऽसा स्पा परस्पर या भवत्प्रसकाम।। प्रविरातारः तथा ... सौ



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शान्तिं प्रराकमप्रारौलोविक्रमस्त्वत्रिमान्कित्ता॥ विस्यानत्तु यत्यानेन्द्रनोभाविनिवारा॥२३॥सु
क्रमायोधनजन्यप्रधनप्रविदारणं॥ मृधमास्कन्दनं संख्यंतमीकं सांपरायिकं॥२४॥
अस्त्रियां समरानीकरणाः कलहविग्रहौ॥ संप्रहाराभिसंपातकलिसंस्फोटसंयुगाः॥
अभ्यामर्दसमाघातसंग्रामाभ्यागमाहवाः॥ समुदायः स्त्रियः संयत्समित्याजिसमि
द्युधः॥२५॥ नियुद्धं बाहुयुद्धे स्यात्तुमुलं रणसंकुले॥ क्ष्वेडा तु सिंहनादः स्यात्करिणां घ
टनाघटा॥२६॥ क्रन्दनं योधसंरावो बृंहितं करिगर्जितं॥ विस्फारो धनुषः स्वानः पटहाडं
बरौ समौ॥२७॥ प्रसभं तु बलात्कारो हठोऽथ स्खलितं छलं॥ अजन्यं क्लीबमुत्पात उपस
र्ग: समं त्रयम्॥२८॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

३२

मूर्छा तु कश्मलं मोहोऽप्यवमर्दस्तु पीडनं। अभ्यवस्कंदनं त्वभ्यासादनं विजयो जयः॥९९॥
वैरशुद्धिः प्रतीकारो वैरनिर्यातनं च सा। प्रद्रावोद्द्राव संद्राव संदावा विद्रवो द्रवः॥१००॥ अ
पक्रमोऽपयानं च रणे भंगः पराजयः। पराजितपराभूतौ त्रिषु नष्टतिरोहितौ॥१०॥ प्रमा
पणं निबर्हणं निकारणं विशारणं। प्रवासनं परासनं निषूदनं निहिंसनं॥१०१॥
निर्वासनं संज्ञपनं निर्ग्रंथनमपासनं। निस्तर्हणं निहननं क्षणनं परिवर्जनं॥१०२॥ निर्वापणं
विशसनं मारणं प्रतिघातनं। उद्वासनप्रमथनक्रथनोज्जासनानि च॥१०३॥ आलंभपिंजविश
रघातोन्माथवधा अपि। स्यात्पंचता कालधर्मो दिष्टांतः प्रलयोऽत्ययः॥१०४॥ अंतो नाशो द्व
योर्मृत्युर्मरणं निधनोऽस्त्रियां। परासुप्राप्तपंचत्वपरेतप्रेतसंस्थिताः॥१०५॥ मृतप्रमीतौ त्रि

३२

CC-0. Digitized by eGangotri and MIDF- Delhi

ष्वेते चिता चित्या चितिः स्त्रियाः॥ कबंधोऽस्त्री क्रियायुक्तमपमूर्द्धकलेवरम्॥ श्मशान
स्यात्पितृवनं कुणपः शवमस्त्रियाः॥ प्रग्रहोपग्रहौ बंद्यां कारास्याद्बंधनालये॥१७
पुंसि भूम्न्यसवः प्राणाश्चैवं जीवोऽसुधारणम्॥ आयुर्जीवितकालो ना जीवातुर्जीवनौषधम्॥१८
॥०॥ इति क्षत्रियवर्गः॥ ॥ऊरव्या ऊरुजा अर्या वैश्या भूमिस्पृशो विशः॥ आजीवो जीविका वार्ता वृत्तिर्वर्त्तन
जीवने॥ स्त्रियां कृषिः पाशुपाल्यं वाणिज्यं चेति वृत्तयः॥ सेवा श्ववृत्तिरनृतं कृषिरुंछशिलं त्वृतं
२॥ द्वे याचितायाचितयोर्यथासंख्यं मृतामृते॥ सत्यानृतं वणिग्भावः स्यादृणं पर्युदंचनम्॥३॥ उद्धारोऽर्थप्रयोग
स्तु कुसीदं वृद्धिजीविका॥ याञ्चयाप्तं याचितकं निमयादापमित्यकम्॥४॥ उत्तमर्णाधमर्णौ द्वौ प्रयोक्त
ग्राहकौ क्रमात्॥ कुसीदिको वार्द्धुषिको वृद्ध्याजीवश्च वार्द्धुषिः॥ क्षेत्राजीवः कर्षकश्च

श्या

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



षिक स्य कृषीवलः॥ सेमंत्रोहे यश्चा ले यंत्री दिशा स्पुडु वो चित्तं॥ दाप्रद्वीप वकय थक्ति विप्रवाद्भिमवनं
हितत्॥ तिस्यं तेलो नव न्मा षोमाग्रु भंगी द्विरुत्ताप७॥ सोद्रु नेको द्रुवीराणां दिशे शु चा न्योडु वसीमा॥
वी जाभृ तन्नृत कथंसी यं पं वह स्यव रा गा ये गुणा के तं चि ह स्य त्रिसीत्यन पितास्मि न्रा॥ द्वि गु णा कृते
तुसर्वं सु वसिन्वाभृ तनभी दा॥ राद्विराणा ७ का दिवा पाप्रो रिा का ७ का स्य॥ रवारीणा पक्तु रवारी क उ त्रुणोदय
स्थि श्रु॥१०॥ गेन्वयुसक मो र्वघ्रके दारः भेय म स्यता॥ के दार कं स्पा ध्वैदा य श्रैत्र के दा र्द्वे कं ग रो॥११॥ लोप्पा
निलेयवः प्रासि कोटि सोसु भे दनः॥ प्र आ नं तो न्वे तो यंरव निवम बदा रुणा मा॥१२॥ दा येसा वि च मा ल न्मी
यो त्रंयो क मथो फरासु॥ निरी षा कृ ७ कं प रा लें के षि को सो ग लं दल॥१३॥ गोदारणं वशी र प्य या म्मा
स्ती युगको लकं॥ ईशा लो ग रा दंडः स्मात्सी ता लो ग लपद्रु तो॥१४॥ प्रसिसे धिः वेदो दा ह न्य स्तप मन्थुव
न्धने॥ आश्वत्री हिः पाटलः स्याद्धि राम्रू कमवो सपो॥१५॥ तो न्मस्नु त त्रहू तिक ला यप्रुसती नकः॥ ह

ग॰२

राम ३३

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रत्युरवडिको चाम्सि कोरदूषस्य कोद्रवः ॥१८॥ मैरुस्वको मसूरो पनकुष्टकामकुष्टको ॥ वनमुद्गे मकुष्ठको ११
गेरीतनु भकोद्रवको ॥१७॥ सिन्धु थरिस्त्रेषषवतोगो ध्रुमःसुमनसमौ ॥ स्या घावकस्तु कुल्माषश्चणा
कोहरिमन्थकः ॥१८॥ त्रीति तिलेतिलपेजश्वातिलपिंजो निष्फलः ॥ क्षवस्तु आभिजनभोराजिका कालिका
सुरीता ॥१९॥ स्त्रियोकडुप्रियंगू द्वे अतसीस्यादुमाक्षुमा ॥ मातुलानी तु भंगायांव्रीहिभेदस्त्वणुःपुमान् ॥२०॥ किंशारुः
सस्यशूकं स्यात्कणिशं सस्यमंजरी ॥ धान्यंव्रीहिःस्तंबकरिस्तंबोगुच्छस्तृणादिनः ॥२१॥ नाडी नालश्च काण्डोस्य पला
लोऽस्त्री सनिष्फलः ॥ कडंगरो बुसं क्लीबे धान्यत्वचि तुषः पुमान् ॥२२॥ शूकोऽस्त्री श्लक्ष्णतीक्ष्णाग्रे शमी शिंबा त्रिषु
तत्तरे ॥ ऋद्धमावसितं धान्यं पूतं तु बहुलीकृतं ॥ माषादयः शमीधान्ये शूकधान्ये यवादयः ॥ शालयः कलमाद्याश्च षष्टिको
द्याश्च पुंस्यमी ॥२३॥ तृणधान्यानि नीवाराः स्त्री गवेधुर्गवेधुका ॥ अयोग्रं मुसलोऽस्त्री स्यादुदूखलमुलूखलं ॥२४॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



प्रस्फोटनं शूर्पमस्त्री चालनी तितउः पुमान्॥ स्यूतप्रसेवौ कंडोलपिटौ कटकिलिंजकौ॥२६॥ समा-
नौ रसवत्यां तु पाकस्थानमहानसे॥ पौरोगवस्तदध्यक्षः सूपकारास्तु बल्लवाः॥२७॥ आरालि-
का आंधसिकाः सूदा औदनिका गुणाः॥ आपूपिकः कांदविको भक्ष्यकार इमे त्रिषु॥२८॥ अश्मंतमुद्धा-
नमधिश्रयणी चुल्लिरंतिका॥ अंगारधानिकांगारशकट्यपि हसन्यपि॥२९॥ हसन्त्यथ न स्त्री स्या-
दंगारोऽलातमुल्मुकं॥ क्लीबेऽम्बरीषं भ्राष्ट्रो ना कन्दुर्वा स्वेदनी स्त्रियां॥३०॥ आलिंजरः स्यान्माणिकः कर्क-
र्यालुर्गलंतिका॥ पिठरः स्थाल्युखा कुंडं कलशस्तु त्रिषु द्वयोः॥३१॥ घटः कुटनिपावस्त्री शरावो वर्द्धमान-
कः॥ ऋजीषं पिष्टपचनं कंसोऽस्त्री पानभाजनं॥३२॥ कुतूः कृत्तेः स्नेहपात्रं सैवाल्पा कुतुपः पुमान्॥ सर्व-
मावपनं भांडं पात्रामत्रं च भाजनं॥३३॥ दर्विः कंबिः खजाका च स्यात्तर्दूर्दारुहस्तकः॥ अस्त्री शाकं हरि-



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नकंशिग्रुरस्यतुनाडिका॥३४॥कडंबश्चकलंबश्चवेसवारउपस्करः॥तिंतिलीकंचचुक्रंश्चवृक्षाम्लमथवेल्लजं॥३५॥
मरीचंकोलकंकृष्णमूषणंधर्मपत्तनं॥जीरकोऽजरणोजाजीकणाकृष्णेतुजरके॥३६॥सुषवीकारवीप
थ्वीपृथुःकालोपकुंचिका॥आर्द्रकंशृंगवेरंस्यादथछत्रावितुन्नकम्॥३७॥कुस्तुंबुरुचधान्याकमथशुं
ठीमहौषधं॥स्त्रीनपुंसकयोर्विश्वंनागरंविश्वभेषजं॥३८॥आरनालकसौवीरकुल्माषाभिषुतानिच॥अवं
तिसोमधान्याम्लकुंजलानिचकांजिकं॥३९॥सहस्रवेधिजतुकंवाह्लीकंहिंगुरामठं॥तत्पत्रीकारवी
पृथ्वीवाष्पीकाकबरीपृथुः॥४०॥निशाह्वाकांचनीपीताहरिद्रावरवर्णिनी॥सामुद्रंयत्तुलवणमक्षीबंव
शिरंचतत्॥४१॥सैंधवोस्त्रीशीतशिवंमाणिमंथंचसिंधुजे॥रौमकंवसुकंपाक्यंविडंचकृतकेद्वयं॥४२॥सौवर्च
लेऽक्षरुचकंतिलकंतत्रमेचकं॥मत्स्यंडीफाणितंखंडविकारेशर्करासिता॥४३॥कूर्चिकाक्षीरविकृतिःस्या
द्रसालातुमार्जिता॥स्यात्तेमनंतुनिष्ठानंत्रिलिंगावासितावधेः॥४४॥शूलाकृतंभटित्रंचशूल्यमुख्यंतुपेठरंप्रणीत

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अकोदि ॥३५॥

तमुपसम्पन्नं प्रयस्तं स्यात्सुसंस्कृतं॥ स्यात्पिच्छिलं तु विज्जलं॥ संमृष्टं शोधितं समौ॥ चिक्कणं मसृणं स्निग्धं तुल्ये
भावितवासिते॥ आपक्वं पौलिरभ्यूषो लाजाः पुं भूम्नि चाक्षताः॥ पृथुकः स्याच्चिपिटको धाना भृष्टयवे स्त्रियः॥४७॥
पूपोऽपूपः पिष्टकः स्यात्करम्भो दधिसक्तवः॥ भिस्सा स्त्री भक्तमन्धोऽन्नमोदनोऽस्त्री स दीदिविः॥४८॥ भिस्स-
टा दग्धिका सर्वरसाग्रे मंडमस्त्रियां॥ मासराचामनिस्रावा मंडे भक्तसमुद्भवे॥४९॥ यवागूरुष्णिका श्राणा वि-
लेपी तरला च सा॥ गव्यं त्रिषु गवां सर्वं गोविड्गोमयमस्त्रियां॥५०॥ तत्तु शुष्कं करीषोऽस्त्री दुग्धं क्षीरं पयः समं॥
पयस्यमाज्यदध्यादि द्रप्स्यं दधि घनेतरत्॥५१॥ घृतमाज्यं हविः सर्पिर्नवनीतं नवोद्धृतं॥ तत्तु हैयंगवीनं यद्ध्यो-
गोदोहोद्भवं घृतं॥५२॥ दंडाहतं कालशेयमरिष्टमपि गोरसः॥ तक्रं ह्युदश्विन्मथितं पादाम्ब्वर्धाम्बु निर्जलं॥५३॥ मंडं दधि-
भवं मस्तु पीयूषोऽभिनवं पयः॥ अशनाया बुभुक्षा क्षुद्ग्रासस्तु कवलः पुमान्॥५४॥ सपीतिः स्त्री तुल्यपानं सग्धिः
स्त्री सहभोजनं॥ उदन्या तु पिपासा तृट्तर्षो जग्धिस्तु भोजनं॥५५॥ जेमनं लेप आहारो निघासो न्याद इत्यपि॥ सौहि-
त्यं तर्पणं तृप्तिः फेला भुक्तसमुज्झितं॥ कामं प्रकामं पर्याप्तं निकामेष्टं यथेप्सितं॥ गोपे गोपालगोसंख्यगोधु-

श्री ष्णो नौ

राम ३५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्री ५

गो॥ वल्लवाः॥५८॥ गोमहिष्यादिकं पादबंधनं द्वौ गवीश्वरे॥ गोमान्गोमी गोकुलन्तु गोधनं स्याद्गवांव्रजे॥५९॥

त्रिष्वाशितंगवीनं तद्गावो यत्राशिताः पुरा॥ उक्षा भद्रो बलीवर्द ऋषभो वृषभो वृषः॥ अनड्वान्सौरभेयो गौरु

क्ष्णांसंहतिरौक्षकं॥ गव्या गोत्रा गवां वत्सधेन्वोर्वात्सकधैनुके॥६०॥ वृषो महान्महोक्षः स्याद्वृद्धोक्षस्तु

जरद्गवः॥ उत्पन्न उक्षा जातोक्षः सद्योजातस्तोककः॥६१॥ शकृत्करिस्तु वत्सः स्याद्दम्यवत्सतरौ समौ॥ आर्षभ्यः षण्ड

तायोग्यः षण्डो गोपतिरिट्चरः॥६२॥ स्कन्धप्रदेशस्तु वहः सास्ना तु गलकम्बलः॥ स्यान्नस्तितस्तु नस्योतः प्रष्ठवाड्युग

पार्श्वगः॥६३॥ युगादीनां तु वोढारो युग्यप्रासङ्ग्यशाकटाः॥ खनति तेन तद्वोढास्येदं हालिकसैरिकौ॥६४॥

धूर्वहे धुर्यधौरेयधुरीणाः सधुरन्धराः॥ उभावेकधुरीणैकधुरीरो हरनामाता के[illegible]धुरावहे॥ स तु सर्वधुरी

णः स्यात्सर्वधुरावहः॥ माहेयी सौरभेयी गौरुस्रा माता च शृङ्गिणी॥६६॥ अर्जुन्यघ्न्या रोहिणी स्यादुत्तमा

गोषु नैचिकी॥ वर्णादिभेदात्संज्ञाः स्युः शबलीधवलादयः॥६७॥ द्विहायनी द्विवर्षा गौरेकाब्दा त्वेकहायनी॥

Jagannath Bhattarai Collection: Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



अकोटि ३६

चतुरश्राचतुरहयो ॥ अश्वकान्ति हायनी॥ हृतानश्रावुष्मावतोका तुरुनवह भेद्यसं खिनी॥ अङ्गाराः हृयमे
राथवेक्र ॥ भेपि तिनी॥ १९॥ काल्पापसर्पश्चि नेअष्टो ही वाश्र गामिरी॥ स्योदचंसेत्तुसुवस्वकुस्तृतिः परेष्टु
का॥ २०॥ सूर्म तावरकथरा॥ धेनुःस्या नवसूतिका॥ सुव्रता सुखसं दो पीनो धीपी वरस्तनी॥ २१॥ द्रोणक्षीरा
द्रोणदुग्धा धेनुष्या बन्धके स्थिता॥ समांसमीना सायें प्रप्रति वर्ष प्रसूयते॥ २२॥ ऊधस्तु क्लीबमापीनं समौ
शिवक कीलके॥ न पुंसि दाम सन्दानं पशुरज्जुः अस्त्रियाम्॥ २३॥ वैशाख मन्थ मन्थान मन्थानो मन्थ
दण्डके॥ कुठरो दण्डविष्कम्भो मन्थनी गर्गरी समे॥ २४॥ उष्ट्रे क्रमेलक मय महाङ्गाः करभः शिशुः॥ करभाः स्यु
श्रृङ्खलका दारवैः पादबन्धनः॥ २५॥ अजा छागी शुभच्छाग वस्तच्छगलका अजे॥ मेढ्रोरभोरणोर्णायु
मेषवृष्णय एडका॥ २६॥ उष्ट्रोरभ्राजं वृन्दे स्यादौष्ट्रकौरभ्रकाजका॥ चक्रीवन्तस्तु वालेया रासभा गर्दभाः
खराः॥ २७॥ वैदेहकः सार्थवाहो नैगमो वाणिजो वणिक्॥ पण्याजीवो ह्यापणिकः क्रयविक्रयिक

राम ३६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वस्तः ॥७८॥ विक्रेता स्याद्विक्रयिकः क्रायकः क्रयिकः समौ ॥ वाणिज्यं तु वणिज्या स्यान्मूल्यं वस्नोऽप्यवक्रयः ॥७९॥
नीवी परिपणो मूलधनं लाभोऽधिकं फलं ॥ परिदानं परीवर्तो नैमेयनिमयावपि ॥८०॥ पुमानुपनिधिर्न्यासः प्रतिदानं तदर्प-
णं ॥ क्रये प्रसारितं क्रय्यं क्रेयं क्रेतव्यमात्रके ॥८१॥ विक्रेतव्यं पणितव्यं पण्यं क्रय्यादयस्त्रिषु ॥ क्लीवे सत्यापनं स-
त्यंकारः सत्याकृतिः स्त्रियां ॥ विपणो विक्रयः संख्याः संख्येये ह्यादश त्रिषु ॥८२॥ विंशत्याद्याः सदैकत्वे सर्वाः
संख्येयसंख्ययोः ॥ संख्यार्थे द्विबहुत्वे स्तस्तासु चानवतेः स्त्रियः ॥८३॥ पंक्तेः शतसहस्रादि क्रमाद्दशगुणो-
त्तरं ॥ यौतवं द्रुवयं पाय्यमिति मानार्थकं त्रयं ॥८४॥ मानं तुलांगुलिप्रस्थैर्गुंजाः पंचाद्यमाषकः ॥ ते षोडशा-
क्षः कर्षोऽस्त्री पलं कर्षचतुष्टयं ॥८५॥ सुवर्णबिस्तौ हेम्नोऽक्षे कुरुविस्तस्तु तत्पले ॥ तुला स्त्रियां पलशतं भारः
स्याद्विंशतिस्तुलाः ॥८६॥ आचितं दश भाराः स्युः शाकटो भार आचितः ॥ कार्षापणः कार्षिकः स्यात्कार्षि-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

अकोद्वि
३७

कोषाम्त्रिके पराः॥ ८७॥ अस्त्रियामाढकद्रोणौ खारी वाहो निकुंचकः॥ कुडवः प्रस्थ इत्याद्याः परिमाणार्थकाः पृथक्॥ ८
पादस्तुरीयो भागः स्यादंशभागौ तु वण्टकः॥ द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु॥ हिरण्यं द्रविणं द्युम्न-
९ मर्थरैविभवा अपि॥ स्यात्कोशश्च हिरण्यं च हेमरूप्ये कृताकृते॥ ९०॥ ताभ्यां यदन्यत्तत्कुप्यं रूप्यं तद्द्वयमाह-
तं॥ गारुत्मतं मरकतमश्मगर्भो हरिन्मणिः॥ शोणरत्नं लोहितकः पद्मरागोऽथ मौक्तिकं॥ ९१ मु-
क्ताथ विद्रुमः पुंसि प्रवालं पुन्नपुंसकं॥ रत्नं मणिर्द्वयोरश्मजातौ मुक्तादिकेपि च॥ स्वर्णं सुवर्णं
कनकं हिरण्यं हेमहाटकं॥ ९२॥ तपनीयं शातकुंभं गांगेयं भर्म कर्बुरं॥ चामीकरं जातरूपं महारजतकांचने॥ रु-
क्मं कार्तस्वरं जांबूनदमष्टापदोऽस्त्रियां॥ अलंकारसुवर्णं यच्छृंगीकनकमित्यदः॥ दुर्वर्णं रजतं रूप्यं खर्जूरं
श्वेतमित्यपि॥ रीतिः स्त्रियामारकूटो न स्त्रियामथ ताम्रकं॥ ९४॥ शुल्वं म्लेच्छमुखं द्व्यष्टवरिष्ठोदुंबराणि च॥ लोहोऽस्त्री
शस्त्रकं तीक्ष्णं पिंडं कालायसायसी॥ ९५॥ अश्मसारोऽथ मंडूरं सिंहाणमपि तन्मले॥ सर्वं च तैजसं लोहं वि-

राम
३७

CC-0. Digitized by eGangotri and MIDF- Delhi
Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कारोत्वयसः कुसी॥८९॥ क्षारः काचोथ चपलो रसः सूतश्च पारदे॥ गवलं माहिषं शृंगमभ्रकं गिरिजामले॥ स्रोतोञ्जनं
तु सौवीरं कापोताञ्जनयामुने॥ तुत्थाञ्जनं शिखिग्रीवं वितुन्नकमयूरकं॥९०॥ कर्परी दार्विकाक्वाथोद्भवं तुत्थं रसाञ्जनं॥
रसगर्भं तार्क्ष्यशैलं गन्धाश्मनि तु गन्धकः॥९१॥ सौगन्धिकश्च चक्षुष्याकुलाल्यौ कुलित्थिका॥ रीतिपुष्पं पुष्पकेतुः पौष्पकं कुसु
माञ्जनं॥९२॥ पिञ्जरं पीतनं तालमालं च हरितालके॥ गैरेयमर्थ्यं गिरिजमश्मजं च शिलाजतु॥९३॥ बोलगन्धरसप्राणपिं
डगोपरसाः समाः॥ डिण्डीरोऽब्धिकफः फेनः सिन्दूरं नागसम्भवं॥९४॥ नागसीसकयोगेष्टवप्राणि त्रपु पिच्चटं॥ रङ्गवङ्गे अथ पिचु
स्तूलोऽथ कमलोत्तरं॥९५॥ स्यात्कुसुम्भं वह्निशिखं महारजनमित्यपि॥ मेषकम्बल ऊर्णायुः शशोर्णं शशलोमनि॥९६॥ मधु
क्षौद्रं माक्षिकादि मधूच्छिष्टं तु सिक्थकं॥ मनःशिला मनोगुप्ता मनोह्वा नागजिह्विका॥९७॥ नैपाली कुनटी गोला यवक्षारो
यवाग्रजः॥ पाक्योऽथ सर्जिकाक्षारः कापोतः सुखवर्चकः॥९८॥ सौवर्चलं स्याद्रुचकं त्वक्क्षीरी वंशरोचना॥ शिग्रुजं श्वेत
मरिचं मोरटं मूलमैक्षवं॥९९॥ ग्रन्थिकं पिप्पलीमूलं चटिकाशिर इत्यपि॥ गोलोमी भूतकेशो ना पत्राङ्गं रक्तचन्दनं॥१००॥
त्रिकटु त्र्यूषणं व्योषं त्रिफला तु फलत्रिकं॥१०१॥ ॐ॥ इति वैश्यवर्गः॥ ॥ शूद्राश्चावरवर्णाश्च वृषलाश्च जघन्यजाः॥ आ
चाण्डालात्तु संकीर्णा अम्बष्ठकरणादयः॥१॥ शूद्राविशोस्तु करणोऽम्बष्ठो वैश्याद्द्विजन्मनोः॥ शूद्राक्षत्रिययोरुग्रो मागधः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अमरको द्वि १ ३८ शूद्र ४

क्षत्रियाविशोः॥२॥ माहिष्योर्याक्षत्रिययोः क्षत्तार्याशूद्रयोः सुतः॥ ब्राह्मण्यां क्षत्रियात्सूतस्तस्यां वैदेहको विशः॥३॥
रथकारस्तु माहिष्यात्करिण्यां यस्य सम्भवः॥ स्याच्चण्डालस्तु जनितो ब्राह्मण्यां वृषलेन यः॥४॥ कारुः शिल्पी संहते-
स्तैर्द्वयोः श्रेणिः सजातिभिः॥ कुलकः स्यात्कुलश्रेष्ठी मालाकारस्तु मालिकः॥५॥ कुम्भकारः कुलालः स्यात्पलगण्डस्तु ले-
पकः॥ तन्तुवायः कुविन्दः स्यात्तुन्नवायस्तु सौचिकः॥६॥ रङ्गाजीवश्चित्रकरः शस्त्रमार्जोऽसिधावकः॥ पादूकृच्चर्मकारः स्याद्व्यो-
कारो लोहकारकः॥७॥ नाडिंधमः स्वर्णकारः कलादो रुक्मकारकः॥ स्याच्छाङ्खिकः काम्बविकः शौल्बिकस्ताम्रकुट्टकः॥८॥
तक्षा तु वर्द्धकिस्त्वष्टा रथकारस्तु काष्ठतट्॥ ग्रामाधीनो ग्रामतक्षः कौटतक्षोऽनधीनकः॥९॥ क्षुरी मुण्डी दिवाकीर्तिनापितां-
तावसायिनः॥ निर्णेजकः स्याद्रजकः शौण्डिको मण्डहारकः॥१०॥ जाबालः स्यादजाजीवो देवाजीवस्तु देवलः॥ स्यान्माया
शाम्बरी मायाकारस्तु प्रातिहारिकः॥११॥ शैलालिनस्तु शैलूषा जायाजीवाः कृशाश्विनः॥ भरता इत्यपि नटाश्चारणास्तु कु-
शीलवाः॥१२॥ मार्दङ्गिका मौरजिकाः पाणिवादास्तु पाणिघाः॥ वेणुध्माः स्युर्वैणविका वीणावादास्तु वैणिकाः॥१३॥ जी-
वान्तकः शाकुनिको द्वौ वागुरिकजालिकौ॥ वैतंसिकः कौटिकश्च मांसिकश्च समं त्रयम्॥१४॥ भृतको भृतिभुक्कर्मक-
रो वैतनिकोऽपि सः॥ वार्तावहो वैवधिको भारवाहस्तु भारिकः॥१५॥ विवर्णः पामरो नीचः प्राकृतश्च पृथग्जनः॥ निहीनो

राम ३८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

४ ॥ उन्माथः कूटयंत्रं स्याद्वागुरा मृगबंधनी॥ शुल्वं वराटकः स्त्री तु रज्जुस्त्रिषु वटी गुणः॥२६॥

CC-0. Digitized by eGangotri and MIDF- Delhi

भुजिष्य

पामरो जाल्मः क्षुल्लकश्चेतरश्च सः॥१६॥ भृत्ये दासेरदासेयदासगोप्यकचेटकाः॥ नियोज्यकिंकरप्रैष्यपरिचारकाः॥ पराचितपरिस्क-
न्दपरजातपरैधिताः॥१७॥ मन्दस्तुन्दपरिमृज आलस्यः शीतकोऽलसोऽनुष्णः॥ दक्षे तु चतुरपेशलपटवः सूत्थानउष्णश्च॥१८॥ चण्डा-
लप्लवमातंगदिवाकीर्तिजनंगमाः॥ निषादश्वपचावन्तेवासिचाण्डालपुक्कसाः॥१९॥ भेदाः किरातशबरपुलिन्दा म्लेच्छजात-
यः॥ व्याधो मृगवधाजीवो मृगयुर्लुब्धकोपि सः॥२०॥ कौलेयकः सारमेयः कुक्कुरो मृगदंशकः॥ शुनको भषकः श्वा स्यादलर्क-
स्तु स योगितः॥२१॥ श्वा विश्वकद्रुर्मृगयाकुशलः सरमा शुनी॥ विट्चरः शूकरो ग्राम्यो वर्करस्तरुणः पशुः॥२२॥ आच्छो-
दनं मृगव्यं स्यादाखेटो मृगया स्त्रियां॥ दक्षिणारुर्लुब्धयोगाद्दक्षिणेर्मा कुरंगकः॥२३॥ चौरैकागारिकस्तेनदस्युतस्क-
रमोषकाः॥ प्रतिरोधिपरास्कन्दिपाटच्चरमलिम्लुचाः॥२४॥ चौरिका स्तैन्यचौर्ये च स्तेयं लोप्त्रं तु तद्धनम्॥ वीतंसस्तूपकरणं ब-
न्धने मृगपक्षिणां॥२५॥ उद्घाटनं घटीयन्त्रं सलिलोद्वाहनं प्रहेः॥ पुंसि वेमा वायदण्डः सूत्राणि नरि तन्तवः॥२७॥ वाणिर्व्यूतिः
स्त्रियौ तुल्ये पुस्तं लेप्यादिकर्मणि॥ पाञ्चालिका पुत्रिका स्याद्वस्त्रदन्तादिभिः कृता॥२८॥ पिटकः पेटकः पेटा मंजूषाथ वि-
॥ ॥ ॥ ॥ हंगमा॥ भारयष्टिस्तदालंबि शिक्यं काचोथ पादुका स्त्रियां॥२९॥ ॥ ॥ ॥

अमरकोष ३९

CC-0. Digitized by eGangotri and MIDF- Delhi

सिद्धिश्री सर्वोपमा जोग्य पात्यादि सकल गुणालंकृत राजमान्य राज्य सर्व [illegible]
सिंन्धो गाधम्र घाज्ञता ॥ सेमता मक्षीयाथीसर श्रीयवामजय बाऽ

७८ श्री गणेशाय नमः ॥ स्वस्ति नदयासिध गाध सा नदाउ ता ॥ सेप्रताम [illegible]
धरा [illegible] श्रीयवामजायु तारा सम्रगु पामत [illegible] सादेपिः प्रति [illegible]

[illegible] श्री सर्वोपमा जोग्यपादि सकल गुणालंकृत राजमान्य श्री श्री राजवकस
हामलीन [illegible] रायुतात्पादीविलिया सहाव तीनिराज मान मानों श्री मम माहाराजधी
राजकुलि [illegible] कम माह आलारस [illegible] राजाहरु स्वस्ति श्री सर्वोपमा जोग्य पात्यादि सकल गुणा
गालंकृत राजमान्य [illegible]

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ·को
७९।

कुमुदकैरवे॥ शालूकमेषांकन्दःस्याद्वारिपर्णीतुकुंभिका॥जलनीलीतुशैवालंशैव
लोथकुमुद्वती॥३९॥कुमुदिन्यांनलिन्यांतुविसिनीपद्मिनीमुखाः॥वापुंसिपद्मंनलिनं
मरविन्दंमहोत्पलं॥४०॥सहस्रपत्रंकमलंशतपत्रंकुशेशयं॥पंकेरुहंतामरसंसारसं
सरसीरुहं॥४१॥विसप्रसूनराजीवपुष्कराम्भोरुहाणिच॥पुंडरीकेसितांभोजेमथर
क्तसरोरुहे॥४२॥रक्तोत्पलंकोकनदंनालोनालमथास्त्रियां॥मृणालंबिसमब्जादि
कदंबेखंडमस्त्रियां॥४३॥करहाटःशिफाकंदःकिंजल्कःकेसरोस्त्रियां॥संवर्तिकान
वदलंबीजकोशोवराटकः॥४४॥ ० ॥इतिवारिवर्गः॥१०॥ उक्तंस्वर्व्योमदिक्कालधीशब्दादि
सनाट्यकं॥पातालभोगिनरकंवारिचैषांचसंगतं॥१॥ ० ॥इत्यमरसिंहकृतौनामलिंगा
नुशासनेस्वरादिकाण्डःप्रथमःसांगएवसमर्थितः॥ ० ॥ ❀॥ ❀ ॥ वर्गाः ११ श्लो ३१८

सम
॥७९॥

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुराणपुरुषो यज्ञपुरुषो नरकांतकः २२ ॥ जलशायी विश्वरूपो मुकुंदो मुरमर्दनः

ध्नः वसुदेवोस्य जनकः स एवानकदुंदुभिः २२ बलभद्रः प्रलंबघ्नो बलदेवोच्युताग्रजः रेव
तीरमणो रामः कामपालो हलायुधः २३ नीलांबरो रौहिणेयस्तालांको मुषली हली संकर्षणः
सीरपाणिः कालिंदीभेदनो बलः २४ मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः कंदर्पो दर्पकोनं
गः कामः पंचशरः स्मरः २५ संबरारिर्मनसिजः कुसुमेषुरनन्यजः पुष्पधन्वा रतिपतिर्मकरध्व
ज आत्मभूः २६ मनोभूर्झषकेतुः स्यात्कुसुमायुधवल्लभाः ब्रह्मसूर्विश्वकेतुः स्यादनिरुद्ध उ
षापतिः २७ लक्ष्मीः पद्मालया पद्माकमला श्रीर्हरिप्रिया शंखो लक्ष्मीपतेः पांचजन्यश्चक्रं
सुदर्शनः २८ कौमोदकी गदा खड्गो नंदकः कौस्तुभो मणिः गरुत्मान् गरुडस्तार्क्ष्यो वैनतेयः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

खगेश्वरः २९ नागांतकोविष्णुरथः सुपर्णः पंनगाशनः शंभुरीशः पशुपतिः शिवः शूली
अ॰ २ महेश्वरः ३० ईश्वरः सर्व ईशानः शंकरश्चंद्रशेखरः भूतेशः खंडपरशुगिरीशोगिरिशोमृ
डः ३१ मृत्युंजयः कृत्तिवासाः पिनाकी प्रमथाधिपः उग्रः कपर्दी श्रीकंठः शितिकंठः कपा
लभृत ३२ वामदेवो महादेवो विरूपाक्षस्त्रिलोचनः कृशानुरेताः सर्वज्ञो धूर्जटिर्नीललो
हितः ३३ हरःस्मरहरोभर्गस्त्र्यंबकस्त्रिपुरांतकः गंगाधरोंधकरिपुः क्रतुध्वंसीवृष
ध्वजः ३४ व्योमकेशोभवोभीमः स्थाणूरुद्रउमापतिः कपर्दोस्यजटाजूटः पिनाकोज अ॰
गवंधनुः ३५ प्रमथास्युः पारिषदाब्राह्मीत्याद्यास्तुमातरः अनिमालघिमाप्राप्तिः प्रा २

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

काम्यमहिमास्तथा ३६ ईशिता वशिता चैव तथा कामावशायिता: विभूतिर्भूतिरैश्वर्यमणिमादि
कमष्टधा: ३७ उमा कात्यायनी गौरी काली हैमवतीश्वरी: शिवा भवानी रुद्राणी सर्वाणी सर्वमंगला:
३८ अपर्णा पार्वती दुर्गा मृडानी चंडिकांबिका विनायको विघ्नराज: द्वैमातुरगणाधिप: ३९ अप्येकदं
तहेरंबो: लंबोदरगजाननाः कार्तिकेयो महासेन: शरजन्मा षडाननाः ४० पार्वतीनंदन: स्कंद: सेना
नीरग्निभूर्गुह: बाहुलेयस्तारकजिद्विशाखशिखिवाहन: ४१ षाण्मातुर: शक्तिधरकुमार: क्रौंच
दारण: इंद्रोमरुत्वान्मघवा: बिडौजा: पाकशासन: ४२ वृद्धश्रवा: सुनाशीर: पुरुहूत: पुरंदर: जिष्णु
र्लेखर्षभ: शक्र: शतमन्युर्दिवस्पति: ४३ सुत्रामा गोत्रभिद्वज्री वासवो वृत्रहा वृषा वास्तोष्पति: सुरपति व

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ· १ लाराति:शचीपति: ४४ जंभभेदीहरिहय:स्वाराणंनमुचिसूदन: शंक्रंदनोदुश्च्यवन:तुराषाण्मेघवाहन:
४ ४५ आखण्डल:सहस्राक्ष:ऋभुक्षास्तस्यतुप्रिया: पुलोमजाशचीन्द्राणीनगरीत्वमरावती ४६
हयउच्चै:श्रवा:सूतमातलिर्नंदनंवनं स्यात्प्रासादोवैजयंतोजयंतपाकशासनि: ४७ ऐरावतोभ्र
मातंगैरावणाभ्रमुवल्लभा: ह्रादिनीवज्रमस्त्रीस्यात्कुलिशंभिदुरंपवि: ४८ शतकोटि:स्वरु:शंबोदंभोलि
रशनिर्द्वयो: व्योमयानंविमानोस्त्री:नारदाद्यासुरर्षय: ४९ स्यात्सुधर्मादेवसभापीयूषममृतंसुधा
मंदाकिनीवियद्गंगा:स्वर्णदीसुरदीर्घिका ५० मेरु:सुमेरुर्हेमाद्रि:रत्नसानु:सुरालय: पंचैतेदेवत उद्ः
रवो:मंदार:पारिजातक: ५१ संतान:कल्पवृक्षश्चपुंसिवाहरिचंदनं सनत्कुमारोवैधात्र:स्वर्वैद्यावश्वि ४

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नीसुतौः ५२ नासत्यावश्विनौ दस्रावाश्विनेयौ च ताउभौ स्त्रियां बहुष्वप्सरसः स्वर्वेश्या उर्वशीमुखाः ५३
उर्वशी मेनिका रंभा चित्रसेना तिलोत्तमा क्रतुफला मंदना च नयना च तथाष्टमी ५४ हाहा हूहूश्चैव
माया: गंधर्वास्त्रिदिवौकसः अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनंजयः ५५ कृपीतयोनिर्ज्वलनो जात
वेदास्तनूनपात् बर्हिः शुष्मा कृष्णवर्त्मा शोचिष्केश उषर्बुधः ५६ आश्रयाशो बृहद्भानुः कृशानुः पाव
कोनलः रोहिताश्वो वायुसखः शिखावानाशुशुक्षणिः ५७ हिरण्यरेता हुतभुग्दहनो हव्यवाहनः स
प्तार्चिर्दमुनाः शुक्रश्चित्रभानुर्विभावसुः ५८ शुचिरप्पित्तमौर्वस्तु वाडवो वडवानलः वह्नेर्द्वयोर्ज्वा
लकीलावर्चिर्हेतिः शिखा स्त्रियां ५९ त्रिषु स्फुलिंगोग्निकणाः संतापः संज्वरः समौ धर्मराजः पितृ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ१ पतिः समवर्त्ती परेतराट् ६० कृतान्तो यमुनाभ्राता शमनो यमराड्यमः कालो दण्डधरः श्राद्धदेवो वैवस्वतोऽन्तकः ६१
५ राक्षसः कौणपः क्रव्यात् क्रव्यादोऽस्रप आशरः रात्रिंचरो रात्रिचरः कर्बुरो निकषात्मजः ६२ यातुधानः पुण्यजनो
नैर्ऋतो यातुराक्षसी प्रचेता वरुणः पाशी यादसांपतिरप्पतिः ६३ श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः
पृषदश्वो गंधवहो गंधवाहानिलाशुगाः ६४ समीरमारुतमरुत्जगत्प्राणसमीरणाः
नभस्वत्वातपवनपवमानप्रभंजनाः ६५ प्राणोऽपानः समानश्चोदानव्यानौ च वायवः शरी
रस्था इमे रंहस्तरसी तु रयः स्यदः ६६ जवोऽथ शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतं सत्वरं चपलं तूर्ण श्रीः ५
मविलंबितमाशु च ६७ सततानारताश्रांतसंततावरतानिशं नित्यानवरताजस्रमप्यथाति

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शयो भरः ६८ अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरं तीव्रैकांतनितांतानि गाढबाढदृ
ढानि च ६९ क्लीवे शीघ्राद्यसत्वे स्यात्त्रिष्वेषां सत्वगामि यत् कुवेरस्त्र्यंवकसखो यक्षराड्गुह्यकेश्वरः ७०
मनुष्यधर्मा धनदो राजराजो धनाधिपः किंनरेशो वैश्रवणः पौलस्त्यो नरवाहनः ७१ यक्षैकपिंगैलवि
लश्रीदपुण्यजनेश्वराः अस्योद्यानं चैत्ररथं पुत्रस्तु नलकूवरः ७२ कैलासः स्थानमलका पूर्विमानं
तु पुष्पकं स्यात्किंनरः किंपुरुषस्तुरंगवदनो मयुः ७३ निधिर्ना सेवधिर्भेदाः पद्मशंखादयो निधेः
इति स्वर्गवर्गः १ द्योदिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमंवरं नभोंतरिक्षं गगनमनंतं सुरवर्त्म खम्
वियद्विष्णुपदं वा तु पुंस्याकाशविहायसि ७५ इति व्योमवर्गः २ दिशस्तु ककुभः काष्ठा आशाश्च हरि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ
६ तश्चताः प्राच्यवाचीप्रतीच्यस्ताः पूर्वदक्षिणपश्चिमाः ७६ उत्तरादिगुदीची स्याद्दिश्यंतुत्रिषुदिग्भवे
इंद्रोवह्निः पितृपतिर्नैरृतोः वरुणोमरुत ७७ कुवेरईशः पतयः पूर्वादीनांदिशांक्रमात् रविशु
क्रोमहीसूनुः स्वर्भानुरविजोविधुः ७८ बुधोबृहस्पतिश्चेति दिशामीशास्तथाग्रहाः ऐरावतःपुंड
रीकोवामनः कुमुदोंजनः ७९ पुष्पदंतः सार्वभौमः सुप्रतीकश्चदिग्गजाः करिण्योभ्रमुकपि
लापिंगलानुपमाक्रमात् ८० ताम्रपर्णीशुभ्रदंतीचांगनाचांजनावति क्लीबाव्ययंत्वपदिशे
दिशोर्मध्येविदिक्स्त्रियां ८१ अभ्यंतरंत्वंतरालंचक्रवालंतुमंडलं अभ्रंमेघोवारिवाहस्तन गु
यित्नुर्वलाहकः ८२ धाराधरोजलधरस्तडित्वान्वारिदोंवुभृत् घनजीमूतमुदिरजलमुग ६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धूमयोनयः ८४ कादंविनी मेघमाला त्रिष्व मेघभवे भ्रिय स्तनितं गर्जितं मेघनिर्घोषे रसिता
निच ८५ शंपा शतह्रदा ह्रादिन्यैरावत्यः क्षणप्रभा तडित्सौदामिनी विद्युच्चंचला चपलापि ८६
स्फूर्जथुर्वज्रनिर्घोषो मेघज्योतिरिरंमदः इंद्रायुधं शक्रधनुस्तदेव ऋजुलोहितं वृष्टिर्वर्षं तद्वि
घाते वग्राहावग्रहौ समौ धारासम्पात आसारः शीकरोंबुकणाः स्मृता ८८ वर्षोपलस्तु कर
का मेघछन्नेह्नि दुर्दिनं अंतर्द्धा व्यवधा पुंसि त्वंतर्द्धिरपवारणं अपिधानतिरोधानपिधाना
छादनानि च हिमांशुश्चंद्रमाश्चंद्र इंदुः कुमुदबांधवाः ९० विधुः सुधांशुः शुभ्रांशुरोषधीशो
निशापतिः अब्जो जैवातृकः सोमो ग्लौर्मृगांकः कलानिधिः ९१ द्विजराजः शशधरो नक्ष

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ त्रैशः सुधाकरः कलातु षोडशो भागो विंबोस्त्री मंडलं त्रिषु २२ भिन्नं सकलखण्डे वा पुंस्यर्धोर्द्धं समेंश
२ के चंद्रिका कौमुदी ज्योत्स्ना प्रसादस्तु प्रसंनता २३ कलंकांकौ लांछनं च चिह्नं लक्ष्म च लक्षणं सुषमा
परमा शोभा शोभा कांतिर्द्युतिश्छविः २४ अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमं प्रालेयं मिहिका च
थ हिमानी हिमसंहतिः २५ शीतं गुणे तद्वदर्थाः सुषीमः शिशिरो जडः तुषारः शीतलः शीतो हि
मः सप्तान्यलिंगकाः २६ ध्रुव औत्तानपादिः स्यादगस्त्यः कुंभसंभवः मैत्रावरुणिरस्यैव लोपामु
द्रा सधर्मिणी २७ नक्षत्रमृक्षं भं तारा तारकाप्युडु वा स्त्रियां दाक्षायिण्योश्विनीत्यादि तारा अ अमरः
श्वयुगश्विनी २८ राधा विशाखा पुष्ये तु सिध्यतिष्यौ श्रविष्ठया समा धनिष्ठाः स्युः प्रोष्ठपदा भद्र २

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पदास्त्रियां ९९ मृगशीर्षंमृगशिरस्तस्मिन्नेवाग्रहायणी इल्वलास्तच्छिरोदेशेतारकानिवसंतियाः १००
बृहस्पतिःसुराचार्योगीष्पतिर्धिषणोगुरुः जीवआंगिरसोवाचस्पतिश्चित्रशिषंडिजः १०१ शुक्रो
दैत्यगुरुःकाव्यउशनाभार्गवःकविः अंगारकःकुजोभौमोलोहितांगोमहीसुतः १०२ रौहिणेयोबु
धःसौम्यःसमौसौरिशनैश्चरौ तमस्तुराहुःस्वर्भानुःसैंहिकेयोविधुंतुदः १०३ सप्तर्षयोमरीच्य
त्रिमुखाश्चित्रशिखंडिनः राशीनामुदयोलग्नंतेतुमेषवृषादयः १०४ सूरसूर्यार्यमादित्य
द्वादशात्मदिवाकराः भास्कराहस्करब्रध्नप्रभाकरविभाकराः १०५ भास्वद्विवस्वत्सप्ताश्वहरि
दश्वोष्णरश्मयः विकर्तनार्कमार्तंडमिहिरारुणपूषणः १०६ द्युमणिस्तरणिर्मित्रश्चित्रभानु

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ॰ विरोचनः विभावसुर्ग्रहपतिस्त्विषांपतिरहस्पतिः १७ भानुर्हंससहस्रांशुस्तपनः सविता रविः
८ माठरः पिंगलो दण्डश्चण्डांशोः पारिपार्श्वकाः १०८ सूरसूतोरुणोनूरुः काश्यपिर्गरुडाग्रजः ॥
परिवेषस्तु परिधिरुपसूर्यकमण्डले १०९ किरणोस्रमयूखांशुगभस्तिघृणिघृष्णयः भा
नुः करो मरीचिः स्त्रीपुंसयो दीधितिः स्त्रियां १२० स्युः प्रभा रुग्रुचिस्त्विड्भाभाश्छविद्युतिदीप्तयः ॥
रोचिः शोचिरुभे क्लीवे प्रकाशो द्योत आतपः २१ कोष्णं कवोष्णं मन्दोष्णं कदुष्णं त्रिषु तद्वति ॥
तिग्मं तीक्ष्णं खरं तद्वन्मृगतृष्णा मरीचिका १२२ इति दिग्वर्गः ३ कालो दिष्टोप्यनेहापि स उरुः
मयोप्यथ पक्षतिः प्रतिपद्द्वे इमे स्त्रीत्वे तदाद्यास्तिथयो द्वयोः २३ घस्रो दिनाहनी वा तु क्ली ८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वे दिवसवासरौ प्रत्यूषोहर्मुखंकल्यमुषःप्रत्युषसी अपि २४ प्रभातंचदिनांतेतु सायंसंध्यापि
तृप्रसूः प्राह्णापराह्णमध्याह्नास्त्रिसंध्यमथसर्वरी २५ निशानिशीथिनीरात्रिस्त्रियामाक्षण
दाक्षपाः विभावरीतमस्विन्यौरजनीयामिनीतमी २६ तमिस्राजामसीरात्रिर्ज्योत्स्नीचंद्रि
कयान्विताः आगामिवर्त्तमानाहर्युक्तायांनिशिपक्षिणी २७ गणरात्रंनिशावह्वः प्रदोषो
रजनीमुखं अर्द्धरात्रनिशीथौद्वौद्वौयामप्रहरौसमौ २८ सपर्वसंधिःप्रतिपत्पंचदश्यो
र्यदंतरं पक्षांतौपंचदश्यौद्वेपौर्णमासीतुपूर्णिमाः २९ कलाहीनेसानुमतीपूर्णेराकानि
शाकरे अमावास्यात्वमावस्यादर्शसूर्येंदुसंगमः ३० साहष्टेंदुःसिनीवालीसानष्टेंदुकला
ली

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ१ तुदः उपरागोग्रहोराहुग्रस्तेत्विंदौचपुष्णिच ३१ सोपप्लवोपरक्तौद्वावग्न्युत्पातउपाहितः
८ एकयोक्त्यापुष्पवंतौदिवाकरनिशाकरौ ३२ अष्टादशनिमेषास्तुकाष्ठात्रिंशत्तुताःकलाः तास्तु
त्रिंशत्क्षणस्तेतुमुहूर्तोद्वादशास्त्रियां ३३ तेतुत्रिंशदहोरात्रंपक्षस्तेदशपंचच पक्षौपूर्वाप
रौशुक्लकृष्णौमासस्तुतावुभौ ३४ द्वौद्वौमाघादिमासौस्यादृतुस्तैरयनंत्रिभिः अयनेद्वेगति
रुदग्दक्षिणार्कस्यवत्सरः ३५ समरात्रिंदिवेकालेविषुवद्विषुवंचतत् पुष्पयुक्तापौर्णमासीपौ
षीमासेतुयत्रसा ३६ नाम्नासपौषोमाघाद्याश्चैवमेकादशापरे मार्गशीर्षेसहामार्गआग्रहा गुरुः
यणिकश्चसः ३७ पौषेतैषसहस्यौद्वौतपामाघेथफाल्गुने स्यात्तपस्यःफाल्गुनिकःस्याच्चैत्रेचै ८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्रिको मधुः ३३ वैसाखे माधवो राधो जेष्ठे शुक्रः शुचिस्त्वयं आषाढे श्रावणे तु स्यान्नभाः श्रावणि
कश्च सः ३४ स्वर्नभस्य प्रोष्ठपद भाद्र भाद्रपदाः समाः स्यादाश्विन इषोप्याश्वयुजोपि स्यात्तु
कार्त्तिके ३५ बाहुलोर्जौ कार्त्तिकिको हेमन्तः शिशिरोस्त्रियां वसन्ते पुष्पसमयः सुरभिर्ग्रीष्म ऊष्मकः ३६
निदाघ उष्णोपगम उष्ण ऊष्मागमस्तपः स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षा अथ शरत् स्त्रियां ३७
षडमी ऋतवः पुंसि मार्गादीनां युगैः क्रमात् संवत्सरो वत्सरोब्दो हायनोस्त्री शरत्समा ३८ मासे
न स्यादहोरात्रः पैत्रो वर्षेण दैवतः दैवे युगसहस्रे द्वे ब्राह्मः कल्पौ तु तौ नृणां ३९ मन्वन्तरं तु दिव्या
नां युगानामेकसप्ततिः संवर्त्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि ४० अस्त्री पंकं पुमान् पाप्मा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ१ पापंकिल्बिषकल्मषं कलुषंवृजिनैनोघमंहोदुरितदुष्कृतं ८१ स्याद्धर्ममस्त्रियांपुण्यश्रेयसी
१० सुकृतंवृषः मुत्प्रीतिःप्रमदोहर्षःप्रमोदामोदसंमदाः ८२ स्यादानंदथुरानंदःशर्मशातसु
खानि च श्वःश्रेयसंशिवंभद्रंकल्याणंमंगलंशुभं ८३ भावुकंभवुकंभव्यंकुशलंक्षेममस्
त्रियां शस्तंचाथत्रिषुद्रव्येपापंपुण्यंसुखादिच ८४ मतल्लिकामचर्चिकाप्रकाण्डमुद्धतल्ल
जौ प्रशस्तवाचकान्यमून्ययःशुभावहोविधिः ८५ दैवंदिष्टंभागधेयंभाग्यंस्त्रीनियतिर्विधिः
हेतुर्नाकारणंबीजंनिदानंत्वादिकारणं ८६ क्षेत्रज्ञआत्मापुरुषःप्रधानंप्रकृतिःस्त्रियां वि उह:
शेषःकालिकोवस्थागुणाःसत्वंरजस्तमः ८७ जनुर्जननजन्मानिजनिरुत्पत्तिरुद्भवः प्रा १०

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

णीतुचेतनोजन्मीजंतुजन्युशरीरिणः ४८ जातिर्जातंचसामान्यंव्यक्तिस्तुपृथगात्मता चित्तंतुचे
तोहृदयंस्वांतंहृन्मानसंमनः ४९ इतिकालवर्गः४ बुद्धिर्मनीषाधिषणाधीःप्रज्ञाशेमुषी
मतिः प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतना ५० धीर्धारणावतीमेधासंकल्पःकर्ममा
नसं चित्ताभोगोमनस्कारश्चर्चासंख्याविचारणा ५१ अध्याहारस्तर्कऊहोविचिकित्सातुसंश
यः संदेहद्वापरौचाथसमौनिर्णयनिश्चयौ ५२ मिथ्यादृष्टिर्नास्तिकताव्यापादोद्रोहचिंत
नं समौसिद्धांतराद्धांतौभ्रांतिर्मिथ्यामतिर्भ्रमः ५३ संविदागूःप्रतिज्ञानंनियमाश्रवसंश्र
वाः अंगीकाराभ्युपगमप्रतिश्रवसमाधयः ५४ मोक्षेधीर्ज्ञानमन्यत्रविज्ञानंशिल्पशा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ १ स्त्रियां: मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतं ५५ मोक्षोपवर्गोथाज्ञानमविद्याहंमतिः स्त्रियां·
११ रूपंशब्दोगंधरसःस्पर्शाश्चविषयाअमी ५६ गोचराइंद्रियार्थाश्च हृषीकंविषयीन्द्रियं कर्मेंद्रियंतु
पाय्वादिमनोनेत्रादिधींद्रियं ५७ तुवरस्तुकषायोस्त्रीमधुरोलवणःकटु तिक्ताम्लश्चरसाःपु
सितद्वत्सुषड्मीत्रिषु ५८ विमर्दोत्थेपरिमलोगंधेजनमनोहरे आमोदःसोतिनिर्हारी वाच्य
लिंगत्वमागुणात् ५९ समाकर्षीतुनिर्हारीसुरभिर्घ्राणतर्पणः इष्टगंधःसुगंधिःस्यादामो
दीमुखवासनः ६० पूतिगंधिस्तुदुर्गंधोविस्रंस्यादामगंधियत् शुक्लशुभ्रशुचिश्वेतविशद गुरुः
श्येतपाण्डराः ६१ अवदातःसितोगौरोवलक्षोधवलोर्जुनः हरिणःपांडरःपांडुरीषत्पां १९

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

डुमुधूसरः ६२ कृष्णेनीलासितश्यामकालश्यामलमेचकाः पीतोगौरोहरिद्राभः पालाशोहरितो
हरित ६३ रोहितोलोहितोरक्तः शोणः कोकनदछविः अव्यक्तरागस्त्वरुणः श्वेतरक्तस्तुपाट
लः ६४ श्यावः स्यात्कपिशोधूम्रधूमलौकृष्णलोहिते कडारः कपिलः पिंगपिशंगौकद्रु
पिंगलौ ६५ चित्रंकिर्मीरकल्माषशबलैताश्चकर्बुरे गुणेशुक्लादयः पुंसिगुणिलिंगास्तु
तद्वति ६६ इतिधीवर्गः ५ ब्राह्मीतुभारतीभाषागीर्वाग्वाणीसरस्वती व्याहारउक्ति
र्लपितंभाषितंवचनंवचः ६७ अपभ्रंशोपशब्दः स्याच्छास्त्रेशब्दस्तुवाचकः तिङ्सुबन्तच
योवाक्यंक्रियावाकारकान्विता ६८ श्रुतिस्त्रीवेदआम्नायस्त्रयीधर्मस्तुतद्विधिः स्त्रिया

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ१ ऋक्सामयजुषी इति वेदास्त्रयस्त्रयी ॥६॥ शिक्षेत्यादि श्रुतेरंगमोंकारप्रणवौ समौ इति
१२ हासः पुरावृत्तमुदात्ताद्यास्त्रयः स्वराः ॥१०॥ आन्वीक्षिकी दण्डनीतिस्तर्कविद्यार्थशास्त्रयोः
आख्यायिकोपलब्धार्था पुराणं पंचलक्षणं ॥११॥ प्रबंधकल्पना कथा प्रवह्लिका प्रहेलि
का स्मृतिस्तु धर्मसंहिता समाहृतिस्तु संग्रहः ॥१२॥ समस्या तु समासार्था किंवदंती जन
श्रुतिः वार्ता प्रवृत्तिर्वृत्तांत उदंतः स्यादथाह्वयः ॥१३॥ आख्याह्वे अभिधानं च नामधे
यं च नाम च हूतिराकारणाह्वानं संहूतिर्बहुभिः कृता ॥१४॥ विवादो व्यवहारः स्यादुप प्रु:
न्यासस्तु वाङ्मुखं उपोद्घात उदाहारः शपनं शपथः पुमान् ॥१५॥ प्रश्नोऽनुयोगः पृ १२

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

छावप्रीतिवाकोन्तरे समे मिथ्याभियोगोभ्याख्यानमथमिथ्याभिशंसनं ७६ अभिशापः प्र
णादस्तु शब्दस्यादनुरागजः यशःकीर्तिःसमज्ञा च स्तवः स्तोत्रं स्तुतिःस्तुतिः ७७ आम्रेडितं द्वि
स्त्रिरुक्तमुच्चैर्घुष्टंतु घोषणा काकुःस्त्रियांविकारोयःशोकभीत्यादिभिर्ध्वनेः ७८
अपर्णाक्षेपनिर्वादपरीवादापवादवत् उपक्रोशोजुगुप्सा च कुत्सानिंदा च गर्हणे ७९
पारुष्यमतिवादस्याद्भर्त्सनंत्वपकारगीः यःसनिंदउपालंभस्तत्रस्यात्परिभाषणम् ८०
तत्रत्वाक्षारणायःस्यादाक्रोशो मैथुनंप्रति स्यादाभाषणमा॰लापः प्रलापोनर्थकं
वचः ८१ अनुलापोमुहुर्भाषाविलापः परिदेवनं विप्रलापोविरोधोक्तिःसंलापो

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भाषणंमिथः ८२ सुप्रलापःसुवचनमपलापस्तुनिह्नवः संदेशवाग्वाचिकंस्याद्वा
अ ग्भेदास्तुत्रिषूत्तरे ८३ रुशतीवागकल्याणीस्यात्कल्यातुशुभात्मिका अत्यर्थमधुरं
१३ सांत्वंसंगतंहृदयंगमं ८४ निष्ठुरंपरुषंग्राम्यमश्लीलंसूनृतंप्रिये सत्येथसंकु
लक्लिष्टेपरस्परपराहते ८५ लुप्तवर्णपदंग्रस्तंनिरस्तंत्वरितोदितं अंबूकृतंस
निष्ठीवमबद्धंस्यादनर्थकं ८६ अनक्षरमवाच्यंस्यादाहतंतुमृषार्थकं अथम्लि
ष्टमविस्पष्टंवितथंत्वनृतंवचः ८७ सत्यंतथ्यमृतंसम्यगमूनित्रिषुतद्वति शब्दे अः
निनादनिनदध्वनिध्वानरवस्वनाः ८८ स्वाननिर्घोषनिर्ह्रादनादनिस्वाननिस्वनाः १३

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आरवारावसंरावविरावा अथ मर्मरः ८९ स्वनिते वस्त्रपर्णानां भूषणानां तु शिंजितम्
निक्वाणो निक्वणः क्वाणः क्वणः क्वणनमित्यपि ९० वीणायाः क्वणिते प्रादेः प्रक्वा
णप्रक्वणादयः कोलाहलः कलकलस्तिरश्चां वाशितं रुतं ९१ स्त्री प्रतिश्रुत्प्रति
ध्वाने गीतं गानमिमे समे इति शब्दादिवर्गः ६ निषादर्षभगांधारषड्जमध्य
मधैवताः ९२ पंचमश्चेत्यमी सप्त तंत्रीकंठोत्थिताः स्वराः काकली तु कले सूक्ष्मे
ध्वनौ तु मधुरास्फुटे ९३ कलो मंद्रस्तु गंभीरे तारोत्युच्चैस्त्रयस्त्रिषु समन्वित
लयस्त्वेकतालो वीणा तु वल्लकी ९४ विपंची सा तु तंत्रीभिः सप्तभिः परिवा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ
१४

दिनी ततंवीणादिकंवाद्यमानद्धंमुरजादिकं ९५ वंशादिकंतुशुषिरंकांस्यतालादिकंघनं
चतुर्विधमिदंवाद्यंवादित्रातोद्यनामकं ९६ मृदंगामुरजाभेदाङ्क्यालिंग्योर्द्धकास्त्रयः
स्याद्यशःपटहोढक्काभेरीस्त्रीदुंदुभिःपुमान् ९७ आनकःपटहोस्त्रीस्यात्कोणोवीणादिवा
दनं वीणादंडःप्रवालःस्यात्ककुभस्तुप्रसेवकः ९८ कोलंवकस्तुकायोस्याउपनाहो
निवंधनं वाद्यप्रभेदाडमरुमड्डुडिंडिमझर्झराः ९९ मर्द्दलःपणवोन्येचनर्तकीलासि
केसमे विलंवितंद्रुतंमध्यंतत्वमोघोघनंक्रमात् १०० तालःकालक्रियामानंलयःसा
म्यमथास्त्रियां ताण्डवंनटनंनाट्यंलास्यंनृत्यंचनर्त्तने १०१ तौर्यत्रिकंनृत्यगीतवा १४

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

घंनाघमिदं त्रयं भ्रुकुंसश्च भ्रुकुंसश्च भ्रूकुंसश्चेति नर्तकः १०२ स्त्रीवेशधारी पुरुषो ना
ट्योक्तौ गणिकाज्जुका भगिनीपतिरावुत्तो भावो विद्वानथावुकः १०३ जनको युवराजस्तु
कुमारो भर्तृदारकः राजा भट्टारको देवस्तत्सुता भर्तृदारिकाः १०४ देवी कृताभिषेकाया
मितरासु तु भट्टिनी अब्रह्मण्यमवध्योक्तौ राजश्यालस्तु राष्ट्रियः १०५ अंबा माताथ
बाला स्याद्वासूरार्यस्तु मारिषः अत्तिका भगिनी ज्येष्ठा निष्ठा निर्वहने समे ६ हंडे
हंजे हलाह्वाने नीचां चेटीं सखीं प्रति अंगहारोंगविक्षेपो व्यंजकाभिनयौ समौ ७
निर्वृत्ते त्वंगसत्वाभ्यां द्वे त्रिष्वांगिकसात्विके शृंगारवीरकरुणाद्भुतहास्यभयानकाः ८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

अ१ वीभत्सरौद्रौ च रसाः शृंगारः शुचिरुज्वलः उत्साहवर्द्धनो वीरः कारुण्यं करुणा घृणाः ९
१५ कृपा दयानुकंपा स्यादनुक्रोशोप्यथो हसः हासो हास्यं च वीभत्सं विकृतं त्रिष्विदं द्वयम्
१० विस्मयोद्भुतमाश्चर्यं चित्रमप्यथ भैरवं दारुणं भीषणं भीष्मं घोरं भीमं भया
नकं ११ भयंकरं प्रतिभयं रौद्रं त्युग्रममी त्रिषु चतुर्दश दरस्त्रासो भीतिर्भीः साध्व
संभयं १२ विकारो मानसो भावोनुभावो भावबोधकः गर्वोभिमानोहंकारो मानश्चि
त्तसमुंनतिः १३ अनादरः परिभवः परिभावस्तिरस्क्रिया रीढावमाननावज्ञाव गुरुः
हेलनमसूक्षणं १४ मंदाक्षं ह्रीस्त्रपा व्रीडा लज्जा सापत्रपान्यतः क्षांतिस्तितिक्षा भिध्या १५
CC-0. Digitized by eGangotri and MIDF- Delhi
Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तुपरक्तविषयस्पृहः १५ असांतिरीर्ष्यासूयातु दोषारोपोगुणेष्वपि वैरंविरोधोविद्वे
षोमन्युशोकौतुशुक्स्त्रियां १६ पश्चात्तापोनुतापश्च विप्रतीसारइत्यपि कोपक्रोधाम
र्षरोषप्रतिघारुट्क्रुधौस्त्रियौ १७ शुचौतुचरितेशीलमुन्मादश्चित्तविभ्रमः प्रेमानां
प्रियताहार्दंप्रेमस्नेहोथदोहदं १८ इछाकांक्षास्पृहेहातृड्वांछालिप्सामनोरथः कामो
भिलाषस्तर्षश्चसमौहश्चालसाद्वयोः १९ उपाधिर्नाधर्मचिंतापुंस्याधिर्मानसीव्य
था स्याचिंतास्मृतिराध्यानमुत्कंठोत्कलिकेसमे २० उत्साहोध्यवसायःस्यात्सवी
र्यमतिशक्तिभाक् कपटोस्त्रीव्याजदंभोपधयश्छद्मकैतवे २१ कुसृतिर्निकृतिःशा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ१ संभ्रमासोनवधानता कौतूहलंकौतुकंचकुतुकंचकुतूहलं २२ स्त्रीणांविलासविव्वोकवि
१८ भ्रमाललितंतथा हेलालीलेत्यमीहावाःक्रियाःशृंगारभावजाः २३ द्रवकेलिपरीहासाःक्रीडाली
लावनर्मच व्याजोपदेशोलक्ष्यंचक्रीडाखेलाचकूर्दनं २४ घर्मोनिदाघःस्वेदःस्यात्प्र
लयोनष्टचेष्टता अवहित्थाकारगुप्तिःसमौसंवेगसंभ्रमौ २५ स्यादाच्छुरितकंहासः
सोत्प्रासःसमनाक्स्मितं मध्यमंस्याद्विहसितंरोमांचोरोमहर्षणं २५ क्रंदितंरुदितं
जृंभस्तुत्रिषुजृंभणं विप्रलंभोविसंवादोरिंगणंस्खलनंसमे २६ स्यान्निद्राशय अ०:
नंस्वापःस्वप्नःसंवेशइत्यपि तंद्रीप्रमीलाभ्रुकुटिर्भ्रुकुटिर्भ्रूकुटिःस्त्रियां २७ अदृष्टि १८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्याद्दसोम्येऽस्त्रि सांसिद्धिप्रकृतौ त्विमे स्वरूपं च स्वभावश्च निसर्गश्चाथ वेपथुः २८
कंपोथ क्षण उद्धर्षो मह उद्धव उत्सवः इति नाट्यवर्गः ७ अधोभुवनपातालं बलिसद्म
रसातलं २९ नागलोकोथ कुहरं शुषिरं विवरं बिलं छिद्रं निर्व्यथनं रोकं रंध्रं श्वभ्रं
वपा शुषिः ३० गर्त्तावटौ भुवि श्वभ्रे सरंध्रे शुषिरं त्रिषु अंधकारोस्त्रियां ध्वांतं तमिस्रं
तिमिरं तमः ३१ ध्वांते गाढेऽन्धतमसं क्षीणेऽवतमसं तमः विष्वक्संतमसं नागाः काद्र
वेयास्तदीश्वराः ३२ शेषोनंतो वासुकिस्तु सर्पराजोथ गोनसे तिलित्सः स्यादजगरे शयु
र्वाहस इत्युभौ ३३ अलगर्द्दो जलव्यालः समौ राजिलडुंडुभौ मालुधानो मातुलाहिर्नि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ१ र्मुक्तोमुक्तकंचुकः ३४ सर्पः पृदाकुर्भुजगो भुजंगोहिर्भुजंगमः आशीविषो विषधरश्चक्री
१७ व्यालः सरीसृपः ३५ कुंडली गूढपाच्चक्षुःश्रवाः काकोदरः फणी दर्वीकरो दीर्घपृष्ठो दंद
शूको बिलेशयः ३६ उरगः पन्नगो भोगी जिह्मगः पवनाशनः त्रिष्वाहेयं विषास्थ्यादि
स्फटायां तु फणा द्वयोः ३७ समौ कंचुकनिर्मोकौ क्ष्वेडस्तु गरलं विषं पुंसि क्लीबे च का
कोलकालकूटहलाहलाः ३८ सौराष्ट्रिकः शौक्लिकेयो ब्रह्मपुत्रः प्रदीपनः दारदो वत्स अमः
नाभश्च विषभेदा अमी नव ३९ विषवैद्यो जांगुलिको व्यालग्राह्याहितुंडिकः
इति पातालभोगिवर्गः ८ स्यान्नारकस्तु नरको निरयो दुर्गतिः स्त्रियां तद्भेदास्तपना १७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वीचिमहारौरवरौरवाः संघातःकालसूत्रंचेत्याद्याःसत्वास्तुनारकाः ४१ प्रेतावैतरणीसि
न्धुःस्यादलक्ष्मीस्तुनिर्ऋतिः विष्टिराजूःकारणातुयातनातीव्रवेदना ४२ पीडाबाधाव्यथा
दुःखममानस्यंप्रसूतिजं स्यात्कष्टंकृच्छ्रमाभीलंत्रिष्वेषांभेद्यगामियत् ४३ इतिनरकव
र्गः ९ समुद्रोब्धिरकूपारःपारावारःसरित्पतिः उदन्वानुदधिःसिंधुःसरस्वान्सागरोर्ण
वः ४४ रत्नाकरोजलनिधिर्यादःपतिरपांपतिः तस्यप्रभेदाःक्षीरोदोलवणोदस्तथा
परेः ४५ आपःस्त्रीभूम्निवार्वारिसलिलंकमलंजलं पयःकीलालममृतंजीवनंभुव
नंवनं ४६ कबंधमुदकंपाथःपुष्करंसर्वतोमुखं अंभोर्णस्तोयपानीयनीरक्षीरांबु

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

अ० संवर्तः ४७ मेघपुष्पं घनरसस्त्रिषु द्वे आप्यमम्मयं भंगस्तरंग ऊर्मिर्वा स्त्रियां वीचिरथोर्मि
१८ षु ४८ महत्सूल्लोलकल्लोलौ स्यादावर्तोंभसां भ्रमः पृषंति बिंदुपृषताः पुमांसो विप्रुषः स्त्रियः ४९
चक्राणि पुटभेदाः स्युर्भ्रमाश्च जलनिर्गमाः कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु ५० पारावारे प
रार्वाचीतीरे पात्रं तदंतरं द्वीपोस्त्रियामंतरीपं यदंतर्वारिणस्तटं ५१ तोयोत्थितं तत्पुलिनं
सैकतं सिकतामयं निषद्वरस्तु जंबालः पंकोस्त्री शादकर्दमौ ५२ जलोच्छ्वासाः परीवाहाः कू
पकास्तु विदारकाः नाव्यं त्रिलिंगं नौतार्ये स्त्रियां नौस्तरणिस्तरिः ५३ उडुपं तु प्लवः कोलः स्रोतों [illegible]
बुसरणं स्वतः आतरस्तरपण्यं स्याद्द्रोणी काष्ठांबुवाहिनी ५४ सांयात्रिकः पोतवणिक् कर्ण १८

CC-0. Digitized by eGangotri and MIDF- Delhi
Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धारस्तु नाविकः नियामकाः पोतवाहाः कूपको गुणवृक्षकः ५५ नौकादण्डः क्षेपणी स्यादरित्रं
केनिपातकः अभ्रिः स्त्री काष्ठकुद्दालः सेकपात्रं तु सेचनं ५६ यानपात्रं तु पोतोब्धिभवे सामुद्रिय
त्रिषु सामुद्रिको मनुष्योब्धिजातो तरो नौः समुद्रिका ५७ क्लीबेर्धनावं नावोर्धे तीतनौकेतिनु त्रि
षु त्रिष्वागाधात्प्रसन्नोच्छः कलुषोनच्छ आविलः ५८ निम्नं गभीरं गंभीरमुत्तानं तद्विपर्य
ये अगाधमतलस्पर्शे कैवर्ते दाशधीवरौ ५९ आनायः पुंसि जालं स्याच्छणसूत्रं पवित्रकं
मत्स्याधानी कुवेणी स्याद्वडिशं मत्स्यवेधनं ६० पृथुरोमा झषो मत्स्यो मीनो वैसारिणोण्ड
जः विसारः शकुली चाथ गडकः शकुलार्भकः ६१ सहस्रदंष्ट्रः पाठीन उलूपी शिशुकः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ०
१२ समौ नलमीनश्चिलिचिमः प्रोष्ठी तु सफली द्वयोः ६२ क्षुद्रांडमत्स्यसंघातः पोताधानमथो
झषाः रोहितो मद्गुरः सालो राजीवः शकुलस्तिमिः ६३ तिमिंगिलादयश्चाथ यादांसि जल
जंतवः तद्भेदाः शिशुमारोद्रशंकवो मकरादयः ६४ स्यात्कुलीरः कर्कटकः कूर्मे कमठक
च्छपौ ग्राहोवहारो नक्रस्तु कुंभीरोथ महीलता ६५ गंडूपदः किंचुलुको निहाका गोधिका
समे रक्तपा तु जलौकायां स्त्रियां भूम्नि जलौकसः ६६ मुक्तास्फोटः स्त्रियां शुक्तिः शंखः
स्यात्कंबुरस्त्रियौ क्षुद्रशंखाः शंखनखाः शंबूका जलशुक्तयः ६७ भेके मंडूकवर्षाभू अ०
शालूरप्लवदर्दुराः शिली गंडूपदी भेकी वर्षाभ्वी कमठी डुलिः ६८ मद्गुरस्य प्रिया शृं १२

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गौडुर्नामादीर्घकोषिका जलाशयाजलाधारास्तत्रागाधजलोह्रदः ९ आहावस्तुनिपा
नंस्यादुपकूपजलाशये पुंस्येवांधुःप्रहीःकूपःउदपानंतुपुंसिवा १० नेमिस्त्रिकास्यवी
णाहोमुखबंधनमस्ययत् पुष्करिण्यांतुखातंस्यादखातंदेवखातके ११ पद्माकरस्त
डागोस्त्रीकासारःसरसीसरः वेशंतःपल्वलंचाल्पसरोवापीतुदीर्घिका १२ खेयंतु
परिखाधारस्त्वंभसांयत्रधारणं. स्यादालवालमावालमावापोथनदीसरित् १३
तरंगिणीशैवलिनीतटिनीह्रादिनीधुनी स्रोतस्वतीद्वीपवतीस्रवंतीनिम्नगापगा १४
गंगाविष्णुपदीजह्नुतनयासुरनिम्नगा भागीरथीत्रिपथगात्रिस्रोताभीष्मसूरपि १५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ॰ कालिंदीसूर्यतनयायमुनाशमनस्वसा रेवातुनर्मदासोमोद्भवामेकलकन्यका
२१ ७६ करतोयासदानीराबाहुदाशैतवाहिनी शतद्रुस्तुशतद्रुःस्याद्विपाशातुवि
पाट्स्त्रियां ७७ शोणोहिरण्यवाहुःस्यात्कुल्याल्पाकृत्रिमासरित् शरावतीवे
त्रवतीचंद्रभागासरस्वती ७८ कावेरीसरितोन्याश्चसंभेदःसिंधुसंगमः द्वयोः
प्रणालीपयसःपदव्यांत्रिषुतूत्तरौ ७९ देविकायांसरय्वांचभवेदाविकसारवौ॰
सौगंधिकंतुकल्हारंहल्लकंरक्तसंध्यकं ८० स्यादुत्पलंकुवलयमथनीलांबुजं गुरुः
न्मच इंदीवरंचनीलेस्मिन्सितेकुमुदकैरवे ८१ शालूकमेषांकंदःस्याद्वारिप २१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

णीतुकुंभिका जलनीलीतुशैवालंशैवलोथकुमुद्वती ८२ कुमुदीन्यांनलीन्यांतुविसिनी
पद्मिनीमुखाः वापुंसिपद्मंनलिनमरविंदमहोत्पलं ८३ सहस्रपत्रंकमलंशतप
त्रंकुशेशयं पंकेरुहंतामरसंसारसंसरसीरुहम् ८४ विसप्रसूनराजीवपुष्करां
भोरुहाणिव पुण्डरीकंसिताम्भोजमथरक्तसरोरुहे ८५ रक्तोत्पलंकोकनदंनाला
नालमथास्त्रियां मृणालंविसमब्जादिकदंवेषण्डमस्त्रियां ८६ करहाटःशिफाकंदः
किंजल्कःकेशरोस्त्रियां संवर्तिकानवदलंबीजकोषोवराटकः ८७ अंभोलतावारिविंदु
र्नलिनीविंदुसंभवा ८८ इतिवारिवर्गः १० उक्तंस्वर्व्योमदिक्कालधीशब्दादिसनाट्यकं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ। पातालभोगिनरकंवारिचैषांचसंगतं ८८ इत्यमरसिंहकृतौनामलिंगानुशासने

२१ स्वर्गादिकांडःप्रथमःसांगएवसमर्थितः वर्गाःपृथ्वीपुरक्ष्माभृद्वनौषधिमृगा

दिभिः नृब्रह्मक्षत्रविट्शूद्रैःसांगोपांगैरिहोदिताः १ भूर्भूमिरचलानंतारसावि

श्वंभरास्थिरा धराधरित्रीधरणीःक्षोणीज्याकाश्यपीक्षितिः २ सर्वंसहावसुमतीव

सुधोर्वीवसुंधरा गोत्राकुःपृथिवीपृथ्वीक्ष्मावनिर्मेदिनीमही ३ मृन्मृत्तिकाप्रश

स्तातुमृत्सामृत्स्नाचमृत्तिका उर्वरासर्वसस्याढ्यास्यादूषःक्षारमृत्तिका ४ ऊष उ.

वानूषरोद्वावप्यन्यलिंगौस्थलंस्थली समा [illegible] २१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नोमरुधन्वानौ द्वे खिलाप्रहते समे ५ त्रिष्वथो जगती लोकः पिष्टपं भुवनं जगत् लोकोयं भा
रतं वर्षं शरावत्यास्तु योवधेः ६ देशः प्राग्दक्षिणः प्राच्य उदीच्यः पश्चिमोत्तरः प्रत्यंतो म्लेछ
देशः स्यान्मध्यदेशस्तु मध्यमः ७ आर्य्यावर्त्तः पुण्यभूमिर्मध्यं विंध्यहिमालयोः नीवृज्जनप
दो देशविषयौ तूपवर्त्तनं ८ त्रिष्वागोष्ठान्नडप्राये नड्वान्नड्वल इत्यपि कुमुद्वान्कुमुदप्रा
ये वेतस्वान्बहुवेतसे ९ शाद्वलः शादहरिते सजंबाले तु पंकिलः जलप्रायमनूपं स्यात् पुं
सि कच्छस्तथाविधः १० स्त्री शर्करा शर्करिलः शार्करः शर्करावति देश एवादिमावेवमुन्नेयाः
सिकतावति ११ देशो नद्यंबुवृष्ट्यंबुसंपन्नव्रीहिपालितः स्यान्नदीमातृको देवमातृकश्च य

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अमरः धान्यकम् १५ सुराज्ञिदेशेराजन्वान्स्यात्ततोन्यत्रराजवान् गोष्ठंगोस्थानकंतत्तुगौष्ठीनंभूतपू
२२ र्वकं १६ पर्यंतभूःपरिसरःसेतुरालौस्त्रियांपुमान् वामलूरश्चनाकुश्चवल्मीकंपुंनपुंस
कं १७ अयनंवर्त्ममार्गाध्वपंथानःपदवीसृतिः सरणिःपद्धतिःपद्यावर्त्मन्येकपदीति
च १८ अतिपंथाःसुपंथाश्चसत्पथश्चार्चितेध्वनि व्यध्वोदुरध्वोविपथःकदध्वाःकापथः
समाः १९ अपंथास्त्वपथंतुल्येशृंगाटकचतुष्पथे प्रांतरंदूरशून्योध्वाःकांतारंवर्त्मदु
र्गमम् २० गव्यूतिस्त्रीक्रोशयुगंनल्वकिष्कुचतुःशतं घंटापथःसंसरणंतत्पुरस्योप ...नःकां
निष्करम् २१ [illegible] ९ः पूःस्त्रीपुरीनगर्यौवापत्तनंपुटभेदनं स्थानीयं २२

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निगमोन्यंत्तुयन्मूलनगरात्पुरं १९ तच्छाखानगरंवेशोवेश्याजनसमाश्रयेः आपणस्तुनि
षद्यायांविपणिःपण्यवीथिका २० रथ्याप्रतोलीविशिखास्याच्चयोवप्रमस्त्रियां प्राका
रोवरणःशालःप्राचीरंप्रांततोवृतिः २१ भित्तिःस्त्रीकुड्यमेडूकंयदंतर्न्यस्तकीकसं गृहं
गेहोदवसितंवेश्मसद्मनिकेतनं २२ निशांतपस्त्यंसदनंभवनागारमंदिरं गृहाःपुं
सिचभूम्न्येवनिकाय्यनिलयालयाः २३ वासःकूटीद्वयोःशालासभासंजवनंत्विदं चतुः
शालंमुनीनांतुपर्णशालोटजोस्त्रियां२४ चैत्यमायतनंतुल्येवाजिशालातुमंदुरा आवेशनं
शिल्पशालाप्रपापानीयशालिका २५ मठश्छात्रादिनिलयोगंजातुमदिरागृहं गर्भा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम
२२

गारं वासगृहमरिष्टं सूतिकागृहं २६ वातायनं गवाक्षः स्यान्मण्डपोऽस्त्री जनाश्रयः हर्म्यादि
धनिनां वासः प्रासादो देवभूभुजां २७ सौधोऽस्त्री राजसदनमुपकार्योपकारिका स्वस्ति
कः सर्वतोभद्र नंद्यावर्तादयोऽपि च २८ विच्छंदकः प्रभेदा हि भवंतीश्वरसद्मनां स्त्र्या
गारं भूभुजामंतःपुरं स्यादवरोधनं २९ शुद्धांतश्चावरोधश्च स्यादट्टः क्षौममस्त्रियां
प्रघाणप्रघणालिंदा बहिर्द्वारप्रकोष्ठके ३० गृहावग्रहणी देहल्यंगणं चत्वराजिरे
अधस्ताद्दारुणि शिला नासा दारूपरि स्थितं ३१ प्रच्छन्नमंतर्द्वारं स्यात्पक्षद्वारं तु पक्ष राम:
कः वलीकनीध्रे पटलप्रांतेऽथ पटलं छदिः ३२ गोपानसी तु वलभीछादने वक्रदारुणि २३

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कपोतपालिकायांतुविटंकंपुंनपुंसकं ३३ स्त्रीद्वार्द्वारंप्रतीहारःस्याद्वितर्दिस्तुवेदिका तो
रणोस्त्रीवहिर्द्वारंपुरद्वारंतुगोपुरं ३४ कूटंपूर्द्वारियद्धस्तिनखस्तस्मिन्नथत्रिषु कपाटम
ररंतुल्येतद्विष्कंभेर्गलंननाः ३५ आरोहणंस्यात्सोपानंनिश्रेणिस्त्वधिरोहिणी सम्मार्जनी
शोध नीस्यात्संकरोवकरस्तथा ३६ क्षिप्तेमुखंनिःशरणंसंनिवेशोनिकर्षणं समौसंवसथ
ग्रामौवेश्मभूर्वास्तुरस्त्रियां ३७ ग्रामांतउपशल्यंस्यात्सीमसीमेस्त्रियामुभे घोषआभीरप
ल्लीस्यात्पक्कणःशवरालयः ३८ इतिपुरवर्गः २ महीध्रेशिखरिक्ष्माभृदहार्यधरपर्वताः
अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः ३९ लोकालोकश्चक्रवाडस्त्रिकूटस्त्रिककुत्समौ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



अस्तस्तु चरमक्ष्माभृदुदयः पूर्वपर्वतः ४० हिमवान्निषधो विंध्यो माल्यवान् पारियात्रकः
सह्यो मलय मैनाकः कैलाशः सानुमानपि ४१ क्रौंचो मंदर ईशानः किंशुको विक्षशेखरः
गंधमादनमन्ये च हेमकूटादयो नगाः ४२ पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृ
षत् कूटोस्त्री शिखरं शृंगं प्रपातस्तु तटो भृगुः ४३ कटकोस्त्री नितंबोद्रेः स्नुः प्रस्थः सा
नुरस्त्रियां उत्सः प्रस्रवणं वारिप्रवाहे निर्झरो झरः ४४ दरी तु कंदरो वा स्त्री देवखातबि
ले गुहा गह्वरं गंडशैलास्तु च्युताः स्थूलोपला गिरेः ४५ खनिः स्त्रियामाकरः स्यात् पा
दाः प्रत्यंतपर्वताः उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका ४६ धातुर्मनःशिलाद्यद्रेर्गैरि



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रिकंतुविशेषतः निकुंजकुंजौवाक्लीवेलतादिपिहितोदरे ४७ इतिशैलवर्गः ३
अटव्यरण्यंविपिनंगहनंकाननंवनं महारण्यमरण्यानीगृहारामास्तुनिष्कुटाः ४८
आरामंस्यादुपवनंकृत्रिमंवनमेवयत् अमात्यगणिकागेहोपवनेवृक्षवाटिका ४९
पुमानाक्रीडउद्यानंराज्ञःसाधारणंवनं स्यादेतदेवप्रमदवनमंतःपुरोचितं ५०
वीथ्यालिरावलिःपंक्तिःश्रेणीरेखास्तुराजयः वन्यावनसमूहेस्यादंकुरोभिनवोद्भिदि
५१ वृक्षोमहीरुहःशाखीविटपीपादपस्तरुः अनोकहःकुटःशालःपलाशीद्रुद्रुमागमाः
५२ वानस्पत्यःफलैःपुष्पात्तैरपुष्पाद्वनस्पतिः ओषध्यःफलपाकांतास्यादवंध्यःफले

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अमः ग्रहीः ५३ वंध्योऽफलोवकेशीच फलवान्फलिनःफली प्रफुल्लोत्फुल्लसंफुल्लव्याकोश
२५ विकचस्फुटाः ५४ फुल्लश्चैतेविकसितेस्युरवंध्यादयस्त्रिषु स्थाणुर्वानाध्रुवःशंकुर्ह्रस्व
शाखाःशिफःक्षुपः ५५ अप्रकांडेस्तंबगुल्मौ वल्लीतुव्रततिर्लता लताप्रतानिनीवी
रुद्गुल्मिन्युलपइत्यपि ५६ नगाद्यारोहउच्छ्रायउत्सेधश्चोच्छ्रयश्चसः अस्त्रीप्रकांडःस्कं
धःस्यान्मूलाच्छाखावधेस्तरोः ५७ समेशाखालतेस्कंधशाखाशालेशिफाजटे शाखाशिफा
वरोहःस्यान्मूलाच्चाग्रंगतालता ५८ शिरोग्रंशिखरंवानामूलंबुध्नोंघ्रिनामकः सारोमज्जा ाम:
समौत्वक्स्त्रीवल्कंवल्कलमस्त्रियां ५९ काष्ठंदार्विन्धनंत्वेधइध्ममेधःसमित्स्त्रियाम् २६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निष्कुहः कोटरं वा ना वल्लरी मंजरिः स्त्रियां ६० पत्रं पलाशं छदनं दलं पर्णं छदः पुमान् प
ल्लवोऽस्त्री किशलयं विस्तारो विटपोऽस्त्रियाम् ६१ वृक्षादीनां फलं शस्यं वृंतं प्रसवबंधनम्
आमे फले शलाटुः स्याच्छुष्के वानमुभौ त्रिषु ६२ क्षारको जारकं क्लीबे कलिका कोरकः पुमान्
स्याद्गुच्छकस्तवकः कुड्मलो मुकुलोऽस्त्रियां ६३ स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमं
मकरंदः पुष्परसः परागः सुमनोरजः ६४ द्विहीनं प्रसवे सर्वं हरीतक्यादयः स्त्रियां ~~स्त्रि~~
~~यः सुमनसः पुष्पं प्रसूनं कुसुमं सुमं~~ ~~६३~~ ~~मकरंदः पुष्परसः परागः सुमनोरजः~~ ~~द्विहीनं~~
~~प्रसवे सर्वं हरीतक्यादयः स्त्रियां~~ ६५ आश्वत्थवैणवप्लाक्षनैयग्रोधैंगुदं फले बार्हतं च फ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ· ३६

लेजंबाजंबूःस्त्रीजंबुजांबवं ६७ पुष्पेजातीप्रभृतयःस्वलिंगाव्रीहयःफले विदार्याद्या
क्तमूलेपिपुष्पेक्लीबेपिपाटला ६८ बोधिद्रुमश्चलदलःपिप्पलःकुंजराशनः अश्वत्थेथ
कपित्थेस्युर्दधित्थग्राहिमन्मथाः ६९ तस्मिन्दधिफलःपुष्पफलदंतशठावपि उडुंबरो
जंतुफलोयज्ञांगोहेमदुग्धकः ७० कोविदारेचमरिकःकुद्दालोयुगपत्रकः सप्तपर्णोविशाल
त्वक्शारदोविषमच्छदः ७१ आरग्वधेराजवृक्षःशंपाकचतुरंगुलाः आरेवतव्याधिघातकृ
तमालसुवर्णका ७२ स्युर्जंबीरेदंतशठजंभजंभीरजंभलाः वरुणोवरणःसेतुस्तिक्तशाकः रामः
कुमारकः ७३ पुंनागेपुरुषस्तुंगःकेशरोदेववल्लभः पारिभद्रेनिंबतरुर्मन्दारःपारिजा ३६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

पलाशे किंशुकः पर्णो वातपोथोऽथ वेतसे रथाभ्रपुष्पविदुरशीतवानीलवंजुला ७३

CC-0. Digitized by eGangotri and MIDF- Delhi

तकः ७४ तिनिशे स्यंदनो नेमी रथद्रुरतिमुक्तकः वंजुलश्चित्रकृच्चाथ द्वौ पीतनकपीतनौ ७५
आम्रातके मधूके तु गुडपुष्पमधुद्रुमौ वानप्रस्थमधुष्ठीलौ जलजेत्र मधूलकः ७६ पी
लौ गुडफलस्त्रंसी तस्मिंस्तु गिरिसंभवे आक्षोडकर्परालौ द्वावंकोठे तु निकोचकः ७७ द्वौ
परिव्याधविदुलौ नादेयी चांबुवेतसे शोभांजने शिग्रुतीक्ष्णगंधकाक्षीरमोचकाः ७८
रक्तोसौ मधुशिग्रुः स्यादरिष्टः फेनिलः समौ विल्वे शांडिल्यशैलूषौ मालूरश्रीफलावपि ७९
प्लक्षो जटी पर्कटी स्यान्न्यग्रोधो बहुपाद्वटः गालवः शाबरो लोध्रस्तिरीटस्तिल्वमार्जनौ ८०
आम्रश्चूतो रसालोसौ सहकारोतिसौरभः कुंभोलूखलकं क्लीवे कौशिको गुग्गुलुः पुरः ८१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ. ३६ लेजंबाजंबूः स्त्रीजंतुजांबवं ६७ पुष्पेजातीप्रभृतयः स्वलिंगाब्रीहयःफले विदार्याद्या
स्तुमूलेपिपुष्पेक्लीबेपिपाटला ६८ बोधिद्रुमश्चलदलःपिप्पलःकुंजराशनः अश्वत्थेथ
कपित्थेस्युर्दधित्थग्राहिमन्मथाः ६९ तस्मिन्दधिफलःपुष्पफलदंतशठावपि उदुंबरे
जंतुफलोयज्ञांगोहेमदुग्धकः ७० कोविदारेचमरिकःकुद्दालोयुगपत्रकः सप्तपर्णोविशाल
त्वक्शारदोविषमच्छदः ७१ आरग्वधेराजवृक्षःशंपाकचतुरंगुलाः आरेवतव्याधिघातकृ
तमालसुवर्णका ७२ स्युर्जंबीरेदंतशठजंभजंभीरजंभलाः वरुणोवरणःसेतुस्तिक्तशाकः रामः
कुमारकः ७३ पुंनागेपुरुषस्तुंगःकेशरोदेववल्लभः पारिभद्रेनिंबतरुर्मन्दारःपारिजा ३६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

पलाशे किंसुकपर्णौ वातपोथोथ वेतसे रथाभ्रपुष्पं विदुरशीतवानीलवंजुला ७८

CC-0. Digitized by eGangotri and MIDH- Delhi

तकः ७४ तिनिसे स्यंदनो नेमी रथद्रुरतिमुक्तकः वंजुलश्चित्रकृच्चाथ द्वौ पीतनकपीतनौ ७५
आम्रातके मधूके तु गुडपुष्पमधुद्रुमौ वानप्रस्थमधुष्ठीलौ जलजेत्र मधूलकः ७६ पी
लौ गुडफलस्रंसी तस्मिंस्तु गिरिसंभवे आक्षोडकर्परालौ द्वावंकोठे तु निकोचकः ७७ द्वौ
परिव्याधविदुलौ नादेयी चांबुवेतसे शोभांजने शिग्रुतीक्ष्णगंधकाक्षीरमोचकाः ७८
रक्तोसौ मधुशिग्रुः स्यादरिष्टः फेनिलः समौ विल्वे शाण्डिल्यशैलूषौ मालूरश्रीफलावपि ७९
प्लक्षो जटी पर्कटी स्यान्न्यग्रोधो बहुपाद्वटः गालवः शाबरो लोध्रस्तिरीटस्तिल्वमार्जनौ ८०
आम्रश्चूतो रसालोसौ सहकारोतिसौरभः कुंभोलूखलकं क्लीबे कौशिको गुग्गुलुः पुरः ८१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



शेलुःश्लेष्मांतकःशीतउद्दालोबहुवारकः राजादनंपियालःस्यात्सन्नकद्रुर्धनुःपटः ८२
गंभारीसर्वतोभद्राकाश्मरीमधुपर्णिका। श्रीपर्णीभद्रपर्णीचकाश्मर्यश्चाप्यथद्वयोः
८३ कर्कन्धुर्बदरीकोलीकोलंकुवलफेनिले सौवीरंबदरंघोंटाप्यथस्यात्स्वादुकण्टकः ८४
विकंकतःस्रुवावृक्षोग्रंथिलोव्याघ्रपादपि ऐरावतोनागरंगोनादेयीभूमिजंबुका ८५ तिंदु
कःस्फूर्जकःकालस्कंधश्चशितिसारके काकेंदुःकुलकःकाकपीलुकःकाकतिंदुकः ८६ गो
लीढोझाटलोघण्टापाटलिर्मोक्षमुष्कको तिलकःक्षुरकःश्रीमान्समौपिचुलझावुको ८७
श्रीपर्णिकाकुमुदिकाकुंभीकैटर्यकट्फलो क्रमुकःपट्टिकाख्यःस्यात्पट्टीलाक्षाप्रसादनः ८८



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तूदस्तुयूपः क्रमुको ब्रह्मण्यो ब्रह्मदारु च तूलं च नीपप्रियकः कदंबास्तु हरिप्रिये ८९ वीरवृक्षो
रुष्करोग्निमुखी भल्लातकी त्रिषु गर्दभाण्डे कंदरालकपीतनसुपार्श्वकाः ९० प्लक्षश्च तिंतिडी
चिंचाम्लिकाथो पीतनशालके सर्जकासनबंधूकपुष्पप्रियकजीवकाः ९१ सालेतु सर्जकार्श्या
श्वकर्णकाः सस्यसंवरः नदीसर्जो वीरतरुरिंद्रद्रुः ककुभोर्जुनः ९२ राजादनः फलाध्यक्षः क्षी
रिकायामथ द्वयोः इंगुदी तापसतरुर्भूर्जे चर्मिमृदुत्वचौ ९३ पिच्छिला पूरणी मोचा स्थिरा
युः शाल्मलीर्द्वयोः पिच्छा तु शाल्मलीवेष्टे रोचनः कूटशाल्मलिः ९४ चिरविल्वो नक्तमालः क
रजश्च करंजके प्रकीर्यः पूतिकरजः पूतिकः कलिकालकः ९५ करंजभेदाः षड्ग्रंथा मर्कट्यंगार

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम: वह्वरी रोहीरोहितकः प्लीहशत्रुर्दाडिमपुष्पकः ९६ गायत्रीबालतनयः खदिरो दंतधावनः अ
२८ रिमेदो विट्खदिरे कदिरः खादिरे सिते ९७ सोमवल्कोप्यथव्याघ्रपुच्छगंधर्वहस्तकौ एरण्ड
उरुबूकश्च रुचकश्चित्रकश्च सः ९८ चंचुः पंचांगुलो मंडवर्द्धमानव्यडंबकाः अल्पाशमी श
मीरः स्याच्छमीशक्तुफलाशिवा ९९ पिण्डीतकोमरुवकः श्वसनः करहाटकः शल्यश्च मदनेश
क्रपादपः पारिभद्रकः १०० भद्रदारुद्रुकिलिमंपीतदारुचदारुच पूतिकाष्ठंचसप्तस्युर्देव
दारुण्यथद्वयोः १०१ पाटलिः पाटलामोघाकाचस्थालीफलेरुहा कृष्णवृंताकुबेराक्षीश्या रम:
मातुमहिलाह्वया २ लतागोवंदनीगुंद्राप्रियंगुः फलिनीफली विष्वक्सेनागंधफलीकारं २८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भाप्रियकश्चसा ३ मराद्ककपर्णपत्रोर्णानटकट्वंगटुंटुका श्योनाकशुकनासर्क्षदीर्घवृंतकुं
टंनटा ४ शोणकश्चारलौतिष्यफलात्वामलकीत्रिषु अमृताचवयःस्थाचत्रिलिंगस्तुवि
भीतकः ५ अक्षस्तुषःकर्षफलोभूतवासःकलिद्रुमः अभयात्वव्यथापथ्यावयस्थापू
तनामृता ६ हरीतकीहैमवतीचेतकीश्रेयसीशिवा पीतद्रुःसरलःपूतिकाष्ठंचाथद्रुमोत्प
लः ७ कर्णिकारःपरिव्याधोलकुचोलिकुचोडहुः पनसःकण्टकिफलोनिचुलोहिज्जलोंज
८ काकोदुंबरिकाफल्गुर्मलयूर्जघनेफला अरिष्टःसर्वतोभद्रहिंगुनिर्यासमालका ९
पिचुमंदश्चनिम्बेथपिच्छिलागुरुशिंशपाः कपिलाभस्मगर्भासाशिरीषस्तुकपीतनः १०

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

अम: ३९

भंडीलोप्यथचांप्येयश्चंपकोहेमपुष्पकः एतस्यकलिकागंधफलीस्यादथकेशरे ११
वकुलोवंजुलोशोकेसमौकरकदाडिमौ चांपेयःकेशरोनागकेशरःकांचनाह्वयः १२
जयाजयंतीतर्कारीनादेयीवैजयंतिका श्रीपर्णमग्निमंथःस्यात्कणिकागणिकारिका
१३ जयाथकुटजःशक्रोवत्सकोगिरिमल्लिका एतस्यैवकलिंगेन्द्रयवभद्रयवंफले १४
कृष्णपाकफलाविग्नसुषेणाःकरमर्दके कालस्कंधस्तमालःस्यात्तापिच्छोप्यथसिंदुके १५
सिंदुवारेन्द्रसुरसौनिर्गुंडीन्द्राणिकेत्यपि वेणीखरागरीदेवताडोजीमूतइत्यपि १६
श्रीहस्तिनीतुभूरुंडीतृणशून्यंतुमल्लिकाः भूपदीशीतभीरुश्चसैवास्फोटावनोद्भवा १७

राम: ३९

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रोकालिकाम्बुवहानिर्गुण्डीनीलिकात्वसा सिताऽसौश्वेतसुरसाभूतवेश्यथमागधी
१८ गणिकायूथिकांवष्ठासापीताहेमपुष्पिका अतिमुक्तःपुंड्रकःस्याद्वासंतीमाध
वीलता १९ सुमनामालतीजातीसप्तलानवमालिका माध्यंकुन्दंरक्तकस्तुवंधूकोवंधु
जीवकः २० सहाकुमारीतरणिरम्लानस्तुमहासहा तत्रशोणेकुरवकस्तत्रपीतेकु
रंटकः २१ नीलाझिण्टीद्वयोर्वाणादासीचार्त्तगलश्चसा सैरेयकस्तुझिण्टीस्यात्तस्मिन्
कुरवकोऽरुणो २२ पीताकुरंटकोझिण्टीतस्मिन्सहचरीद्वयोः ओड्रपुष्पंजपापुष्पंव
ज्रपुष्पंतिलस्ययत् २३ प्रतीहासशतप्रासचंडातहयमारकाः करवीरेकरीरेतुक्रक

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम रग्रंथिलावुभौ २४ उन्मत्तः कितवो धूर्तो धत्तूरः कनकाह्वयः मातुलो मदनश्चास्य फले मातु
३१ लपुत्रकः २५ फलपूरो बीजपूरो रुचको मातुलुंगके समीरणो मरुवकः प्रस्थपुष्पः फणि
ज्झकः २६ जंबीरोप्यथ पर्णासे कठिंजरकुठेरकौ सितेर्जकोत्र पाठी तु चित्रको वह्निसं
ज्ञकः २७ अर्काह्ववसुकास्फोटगणरूपविकीरणाः मंदारश्चार्कपर्णोत्र शुक्लेलर्कप्र
तापसौ २८ शिवमल्ली पाशुपत एकाष्ठीलो वको वसुः वंदा वृक्षादनी वृक्षरुहा जीवंति
केत्यपि २९ वत्सादनी छिन्नरुहा गुडूची तंत्रिकामृता जीवंतिका सोमवल्ली विशल्या मधु गमः
पर्ण्यपि ३० मूर्वा देवी मधुरसा मोरटा तेजनी स्रवा मधूलिका धनुःश्रेणी गोकर्णी पीलु ३१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पर्णपि २१ पाठांवष्ठाविद्धकर्णीस्थापनीश्रेयसीरसा एकाष्ठीलापापचेलीप्राचीनावन
तिक्तिका २२ कटुःकटंभराशोकारोहिणीकटुरोहिणी मत्स्यपित्ताकृष्णभेदीचक्रांगीशकु
लादनी २३ आत्मगुप्ताजडाव्यंडाकंडुराप्रावृषायणी ऋष्यप्रोक्ताशूकशिंबिःकपिक
च्छुश्चमर्कटी २४ चित्रोपचित्रान्यग्रोधीद्रवंतीशंबरीवृषा प्रत्यक्श्रेणीसुतश्रेणीरंडामू
षिकपर्णपि २५ अपामार्गःशैखरिकोधामार्गवमयूरको प्रत्यक्पर्णीकीशपर्णीकिणि
हीखरमंजरी २६ हंजिकाब्राह्मणीपद्माभार्गीब्राह्मणयष्टिका अंगारवल्लीबालेयशाक
वर्वरवर्द्धकाः २७ मंजिष्ठाविकसाजिंगीसमंगाकालमेषिका मंडूकपर्णीभंडीरीभंडी

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

अ
३१

योजनवल्ल्यपि ३८ यासो यवासो दुःस्पर्शो धन्वयासः कुनाशकः रोदनी कच्छुरानंता समुद्रांता दुरा-
लभा ३९ पृश्निपर्णी पृथक्पर्णी चित्रपर्ण्यंघ्रिवल्लिका क्रोष्टुविन्ना सिंहपुच्छी कलशिर्धाव-
नी गुहा ४० निदिग्धिका स्पृशी व्याघ्री बृहती कंटकारिका प्रचोदनी कुली क्षुद्रा दुःस्पर्शा रा-
ष्ट्रिकेत्यपि ४१ नीली काला क्लीतकिका ग्रामीणा मधुपर्णिका रंजनी श्रीफली तुत्था द्रोणी
दोला च नीलिनी ४२ अवल्गुजः सोमराजी सुवल्लिः सोमवल्लिका कालमेषी कृष्णफला वाकुची पू-
तिफल्यपि ४३ कणोपकुल्या वैदेही मागधी चपला कणा उषणा पिप्पली शौंडी कोला थ क- राम
रिपिप्पली ४४ कपिवल्ली कोलवल्ली श्रेयसी वशिरः पुमान् चव्यं तु चविका काकचिंची गुंजे तु कृ- ३१

CC-0. Digitized by eGangotri and MIDF- Delhi
Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सला ५५ पलंकषा त्विक्षुगंधा स्वदंष्ट्रा स्वादुकंटकः गोकंटको गोक्षुरको वनशृंगाट इत्यपि
५६ विश्वाविषाप्रतिविषातिविषोपविषारुणा शृंगीमहौषधं चाथ क्षीरावी दुग्धिकेतसमे ५७
शतमूली वऋसुताभीरुरिंदीवरीवरी ऋष्यप्रोक्ताभीरुपत्रीनारायण्यप्शतावरी ५८ महे
रूरथ पीतद्रुः कालेयकहरिद्रवः दार्वीपचंपचा दारुहरिद्रापर्जनीत्यपि ५९ वचोग्रगंधा ष
ड्ग्रंथा गोलोमी शतपर्विका शुक्ला हैमवती वैद्यमातृसिंह्यौतु वासका ६० वृषोटरूषसिंहा
स्यो वासको वाजिदंतकः आस्फोता गिरिकर्णी स्याद्विष्णुक्रांता पराजिता ६१ इक्षुगंधातुकां
डेक्षुकोकिलाक्षेक्षुरः क्षुराः शालेयस्याच्छीतशिवश्छत्रा मधुरिका मिसिः ६२ मिश्रेयाप्य

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अः ३३

पसीञंदोवज्रद्रुः स्नुक्स्नुहीगुडा समंतदुग्धाथोवेल्लममोघाचित्रतंडुला ९३ तंडुल
श्चक्रिमिघ्नश्चविडंगंपुंनपुंसकं बलावाट्यालकोघंटारवास्तुशनपुष्पिका ९४
मृद्वीकागोस्तनीद्राक्षास्वाद्वीमधुरसेतिच सर्वानुभूतिःसरलात्रिपुटात्रिवृतात्रिवृत्
९५ त्रिभंडीरेचनीश्यामापालिंधीतुसुषेणिका कालामसूरविदलार्द्धचंद्राकालमेषि
का ९६ मधुकंक्लीतकंयष्टीमधुकामधुयष्टिका विदारीक्षीरशुक्लेक्षुगंधाक्रोष्टी
वयासिता ९७ अन्याक्षीरविदारीस्यान्महाश्वेतर्क्षगंधिका लांगलीशारदीतोयपि
प्पलीशकुलादनी ९८ खरश्वाकारवीदीप्योमयूरोलोचमस्तकः गोपीश्यामाशारिवास्यादनं

अः ३३

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नोत्पलसारिवा ७८ योग्यमृद्धिःसिद्धिलक्ष्म्यौवृद्धेरप्याह्वयाइमे कदलीवारणबूसारंभामो
चांशुमत्फला ७९ काष्ठीलामुद्गपर्णीतुकाकमुद्गासहेत्यपि वार्त्ताकीहिंगुलीसिंहीभंटा
कीदुःप्रधर्षिणी ८० नाकुलीसुरसारास्नासुगंधागंधनाकुली नकुलेष्टाभुजंगाक्षी
छत्राकीसुवहाचसा ८१ विदारीगंधांशुमतीशालपर्णीस्थिराध्रुवा तुण्डिकेरीसमु
द्रान्ताकर्पासीवदरेतिच ८२ भारद्वाजीतुसावन्याशृंगीतुऋषभोवृषः गांगेरुकीना
गवलाझषाह्रस्वगवेधुका ८३ धामार्गवोघोषकःस्यान्महाजालीसपीतकः ज्यो
त्स्नीपटोलिकाजालीनादेयीभूमिजंबुका ८४ स्याल्लांगलिक्यग्निशिखाकाकांगीकाक

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



नासिका गोधापदीतुसुवहामुशलीतालमूलिका ७५ अजशृंगीविषाणीस्याद्गोजिह्वादार्वि
केसमे तांबूलवल्लीतांबूलीनागवल्ल्यप्यथद्विजाः ७६ हरेणूरेणुकाकौंतीकपिलाभस्मगं
धिनी एलवालुकमैलेयंसुगंधिहरिवालुकम् ७७ वालुकंचाथपालंक्यांमुकुंदःकुंदकुंदुरू
बालंह्रीवेरवर्हिष्ठोदीच्यंकेशांबुनामच ७८ कालानुसार्यवृद्धाश्मपुष्पशीतशिवानितु शै
लेयंतालपर्णीतुदैत्यागंधकुटीमुरा ७९ गंधिनीगजभक्ष्यातुसुवहासुरभीरसा महेर
णाकुंदुरुकीसल्लकीह्लादिनीतिच ८० अग्निज्वालासुभिक्षातुधातकीधातुपुष्पिका
पृथ्वीकाचंद्रवालैलानिष्कुटिर्बहुलाथसा ८१ सूक्ष्मोपकुंचिकातुत्थाकोरंगीत्रिपुटात्रुटिः



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

व्याधिःकुष्ठंपारिभाव्यंव्याप्यंपाकलमुत्पलं ८२ शंखिनीचोरपुष्पीस्यात्केशिन्यथवितुन्नकः झ
टामलाझटातालीशिवातामलकीतिच ८३ प्रपौंडरीकंपौंडर्य्यमथतुन्नःकुवेरकः कुणिःकच्छः
कांतलकोनंदीवृक्षोथराक्षसी ८४ चंडाधनहरीक्षेमदुष्पत्रगणहासकाः व्याडायुधंव्याघ्र
नखंकरजंचक्रकारकं ८५ सुषिराविद्रुमलताकपोतांघ्रिर्नटीनली धमन्यंजनकेशीचह
नुर्हट्टविलासिनी ८६ शुक्तिःशंखःखुरःकोलदलंनखमथाढकी काक्षीमृत्स्नातुवरिकामृ
त्तालकसुराष्ट्रजे ८७ कुटंनटंदशपुरंवालेयंपरिपेलवं प्लवगोपुरगोनर्दकैवर्तीमुस्त
कानिच ८८ ग्रंथिपर्णंशुकंवर्हिःपुष्पंस्थौणेयकुक्कुरे मरुन्मालातुपिशुनास्पृक्कादेवी

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम· लतालघुः ८९ समङ्गांतावधूःकोटिवर्षालंकोपिकेत्यपि तपस्विनीजटामांसीजटिलालो
३४ मसामिशी ९० त्वक्पत्रंमृत्कटंभृंगंत्वचंचोचंवरांगकं कर्पूरकोद्राविडकःकाल्पकोवेधमु
ख्यकः ९१ ओषध्योजातिमात्रेस्युरजातौसर्वमौषधं शाकाख्यंपत्रपुष्पादितंडुलीयो
ल्पमारिषः ९२ विशल्याग्निशिखानंताफलिनीशक्रपुष्प्यपि स्यादृक्षगंधाछगलान्त्र्यावे
गीवृद्धदारकः ९३ जुंगोब्राह्मीतुमत्स्याक्षीवयःस्थासोमवल्लरी पटुपर्णीहैमवतीस्व
र्णक्षीरीहिमावती ९४ हयपुछीतुकांबोजीमाषपर्णीमहासहा तुण्डिकेरीरक्तफला स्म:
बिंबिकापीलुपर्ण्यपि ९५ बर्बराकबरीतुंगीखरपुष्पाजगंधिका एलापर्णीतुसुवहारा ३४

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्वाऽम्लरसाश्मसा ९६ चांगेरीचुक्रिका दंतशठांबष्ठाम्ललोनिका सहस्रवेधिचुक्रोम्लवत
शःशतवेध्यपि ९७ नमस्कारीगंडकारीसमंगाखदिरीत्यपि जीवंतीजीवनीजीवाजी
वनीयामधुस्रवा ९८ कूर्चशीर्षोमधुरकः शृंगह्रस्वांगजीवकाः किराततिक्तोभूनिंबो
नार्यतिक्तोथसप्तला ९९ विमलासातलाभूतिफेणाचर्मकषेत्यपि वायसोलीस्वादुरसा
वयस्थाथमकूलकः २०० निकुंभोदंतिकाप्रत्यक्श्रेण्युडुंबरपर्ण्यपि अजमोदातूग्रगं
धाब्रह्मदर्भायमानिका १ मूलेपौष्करकाश्मीरपद्मपत्राणिपौष्करे अव्यथातिचरापद्मा
चारटीपद्मचारिणी २ कांपिल्लःकर्कशश्चंद्रोरक्तांगोरोचनीत्यपि प्रपुन्नाडस्त्वेडगजोद

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

अम॰ द्रुघ्नश्चक्रमर्द्दकः २ पद्माट उरणाख्यश्च पलांडुस्तु सुकंदकः लतार्कदुद्रुमौ तत्र हरितेथ म
३५ हौषधं ३ लसुनं गृंजनारिष्टमहाकंदरसोनकाः पुनर्न्नवा तु शोथघ्नी वितुंनं सुनिषण्ण
कं ४ स्याद्वातकः शीतलोपराजिता सनपर्ण्यपि पारावतांघ्रिः कटभी पिण्या ज्योति
ष्मतीलता ६ वार्षिकं त्रायमाणा स्यात्त्रायंती वलभद्रिका विष्वक्सेनप्रिया गृष्टिर्वारा
हीवदरेत्यपि ७ मार्कवो भृंगराजः स्यात्काकमाची तु वायसी शतपुष्पा सितछत्राति
छत्रा मधुरा मिसिः ८ अवाक्पुष्पी कारवी च सरणा तु प्रसारिणी तस्यां कटंभरा राज रामः
बला भद्रबलेति च ९ जनी जतूका रजनी जतुकृच्चक्रवर्त्तिनी संस्पर्शाथ शटी गंधमूली ३५

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्रंथिकेत्वपि १० कर्चूरोपिपलाशोपि कारवेल्लः कठिल्लकः सुषवीचाथकुलकंपटोलस्ति-
क्तकः पटुः ११ कूष्माण्डकस्तुकर्कारुरुर्वारुः कर्कटीस्त्रियौ इक्ष्वाकुः कटुतुंबीस्यात्तुंब्य-
लाबूरुभेसमे १२ चित्रागवाक्षीगोडुंबाविशालात्विंद्रवारुणी अर्शोघ्नः सूरणः कंदोग-
ण्डीरस्तुसमष्ठिला १३ कलंबुरुपोदिकास्त्रीतुमूलकंहिलमोचिका वास्तुकंशाकभेदाः स्युर्दू-
र्वातुशतपर्विका १४ सहस्रवीर्याभार्गव्यौरुहानंताथसासिता गोलोमीशतवीर्याच
गंडालीशकुलाक्षकः १५ कुरुविंदोमेघनामामुस्तामुस्तकमस्त्रियां स्याद्भद्रमुस्तकोगु-
न्द्राचूडालाचक्रलोच्चटा १६ वंशेत्वक्सारकर्मारत्वचिसारतृणध्वजाः शतपर्वायवफलो

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

अम॰ ३६ वेणुमस्करतेजनाः १७ वेणवः कीचकास्ते स्युर्ये स्वनंत्यनिलोद्धताः ग्रंथिर्ना पर्वपरुषी गुं
द्रस्तेजनकः शरः १८ नडस्तु धमनः पोतगलोथ काशमस्त्रियां इक्षुगंधा पोतगलः पुंसि
भूम्नि तु बल्वजाः १९ रसाल इक्षुस्तद्भेदाः पुंड्रकांतारकादयः स्याद्वीरणं वीरतरम्मू
लेस्योशीरमस्त्रियां २० अभयं नलदं सेव्यममृणालं जलाशयं लामज्जकं लघुलय
मवदाहेष्टकापथे २१ मंजादयस्तृणं गर्मुत् श्यामाकप्रमुखा अपि अस्त्री कुशं कुथो
दर्भः पवित्रमथ कत्तृणं २२ पौरसौगंधिकध्यामदेवजग्धकरोहिषं छत्रातिछत्र अम॰
पालघ्नौ मालातृणकभूस्तृणे २३ शष्पं बालतृणं घासो यवसं तृणमर्जुनं तृणानां ३६

CC-0. Digitized by eGangotri and MIDF- Delhi
Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संहतिस्तृण्यानड्यातुनडसंहतिः २४ तृणराजाह्वयस्तालोनारिकेलस्तुलांगली घोण्टा
तु पूगः क्रमुकोगुवाकः खपुरोस्यतु २५ फलमुद्वेगमेतेच हिंतालसहितास्त्रयः खर्जूरः
केतकीतालीखर्जूरीचतृणद्रुमाः २६ इतिवनौषधिवर्गः ४ सिंहोमृगेंद्रः पंचा
स्योहर्य्यक्षः केशरीहरिः शार्दूलद्वीपिनौव्याघ्रेतरक्षुस्तुमृगादनः २७ वराहःसूकरोघृ
ष्टिः कोलः पोत्रीकिरिःकिटिः दंष्ट्रीघोणीस्तब्धरोमाक्रोडोभूदारइत्यपि २८ कपिःप्लवं
गः प्लवगः शाखामृगवलीमुखाः मर्कटोवानरः कीशोवनौकाअथभल्लुके २९ ऋ
क्षाच्छभल्लभाल्लूकागंडकेखड्गखड्गिनौ लुलापोमहिषोवाहद्विषत्कासरसेरिभाः ३०

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम: ३७

स्त्रियांशिवाभूरिमायगोमायुमृगधूर्त्तकाः शृगालवंचकक्रोष्टुफेरुफेरवजंबुकाः ३१ ओतु
र्विडालोमार्जारोवृषदंशकआखुभुक् त्रयोगौधेरगौधारगौधेयागोधिकात्मजे ३२ श्वा
वित्तुशल्यस्तल्लोम्निशललीशललंशलं वातप्रमीर्वातमृगःकोकस्त्वीहामृगोवृकः ३३
मृगेकुरंगवातायुहरिणाजिनयोनयः ऐणेयमेण्याश्चर्माद्यमेणस्यैणमुभेत्रिषु ३४
कदलीकंदलीचीनश्चमूरुप्रियकावपि समूरुश्चेतिहरिणाअमीअजिनयोनयः ३५
कृष्णसाररुरुन्यंकुरंकुशंवररौहिषाः गोकर्णपृषतैणर्श्यरोहिताश्चमरोमृगाः ३६
गंधर्वःशरभोरामःसृमरोगवयःशशः इत्यादयोमृगेंद्राद्यागवाद्याःपशुजातयः ३७

राम: ३७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उंदुरुमूषिको प्याखुर्गिरिका बालमूषिका छुछुंदरी गंधमुखी दीर्घजुराजादिवाधकाः ३८
शरटः कृकलासः स्यान्मुशली गृहगोधिका लूता स्त्री तंतुवायोर्णनाभमर्कटकाः समाः ३९
नीलांगुस्तु कृमिः कर्णजलौकाः शतपद्युभे वृश्चिकः शूककीटः स्यादलिद्रोणौ तु वृश्चिके ४०
पारावतः कलरवः कपोतोथ शशादनः पत्री श्येन उलूकस्तु वायसारातिपेचकौ ४१ व्याघ्रा
टः स्याद्भरद्वाजः खंजरीटस्तु खंजनः लोहपृष्ठस्तु कंकः स्यादथ चाषः किकीदिविः ४२ कलिं
गभृंगधूम्याटा अथ स्याच्छत्रपत्रकः दार्वाघाटोथ सारंगस्तोककश्चातकः समाः ४३ कृक
वाकुस्ताम्रचूडः कुक्कुटश्चरणायुधः चटकः कलविंकः स्यात्तस्य स्त्री चटका तयोः ४४ पुमप

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम पत्येवाटकैरस्त्वपत्येव टकैवहि कर्करेटुः करेटुः स्यात्कृकणक्रकरौ समौ ४५ वनःप्रियः परभृतः
३८ कोकिलः पिक इत्यपि काके तु करटारिष्टः बलिपुष्टसकृत्प्रजाः ४६ ध्वांक्षात्मघोषपरभृद्बलिभु
ग्वायसा अपि द्रोणकाकस्तु काकोलो दात्यूहः कालकण्ठकः ४७ आतायिचिल्लौ दाक्षाय्यगृध्रौ
कीरशुकौ समौ क्रुङ्क्रौञ्चोथ बकः कंकः पुष्कराह्वस्तु सारसः ४८ कोकश्चक्रश्चक्रवाको रथां
गाह्वयनामकः कादंबः कलहंसः स्यादुत्क्रोशकुररौ समौ ४९ हंसास्तु श्वेतगरुतश्चक्रां
गा मानसौकसः राजहंसास्तु ते चंचुचरणैर्लोहितैः सिताः ५० मलिनैर्मल्लिकाख्यास्ते धार्त राम:
राष्ट्राः सितेतरैः शरारिराटिराडिश्च बलाका बिशकण्ठिका ५१ हंसस्य योषिद्वरटा सारसस्य ३८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तुलक्ष्मणा जतुकाजिनपत्रास्यात्परोष्णीतैलपायिका: ५२ वर्वणामक्षिकानीलासरघाम
धुमक्षिका पतंगिकापुत्तिकास्याद्दंशस्तुवनमक्षिका ५३ दंशीतज्जातिरल्पास्याद्गंधोलीव
रटाद्वयो: भृंगारीझीरुकाचीरीझिल्लिकाचसमाइमा ५४ समौपतंगशलभौखद्योतोज्यो
तिरिंगण: मधुव्रतोमधुकरोमधुलिण्मधुपालिन: ५५ द्विरेफपुष्पलिड्भृंगषट्पदभ्र
मरालय: मयूरोवर्हिणोवर्हीनीलकंठोभुजंगभुक् ५६ शिखावल:शिखीकेकीमेघनादा
नुलास्यपि केकावाणीमयूरस्यसमौचंद्रकमेचकौ ५७ शिखाचूडाशिखंडस्तुपिच्छवर्हेन
पुंसके खगेविहंगविहगविहंगमाविहायस: ५८ शकुंतिपक्षिशकुनिशकुंतशकुनाद्वि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

जाः पतत्रिपत्रिपतगपतत्पत्ररथाण्डजाः ५९ नगौकोवाजिविकिरविविष्किरपतत्रयः नी
अ॰ डोद्भवा गरुत्मंतः पित्संतो नभसंगमाः ६० तेषां विशेषा हारीतो मद्गुः कारण्डवः प्लवः तित्ति
७९ रिः कुक्कुभो लावो जीवंजीवश्चकोरकः ६१ कोयष्टिकष्टिट्टिभको वर्तको वर्तिकादयः गरुत्
पक्षच्छदाः पत्रं पतत्रं च तनूरुहं ६२ स्त्री पक्षतिः पक्षमूलं चंचुस्त्रोटिरुभे स्त्रियौ प्रडीनो
ड्डीनसंडीनान्येताः खगगतिक्रियाः ६३ पेशीकोषो द्विहीनेण्डं कुलायो नीडमस्त्रियाम्
पोतः पाकोर्भको डिंभः पृथुकः शावकः शिशुः ६४ स्त्रीपुंसौ मिथुनं द्वंद्वं युग्मं तु युगलं यु रामः
गं समूहनिवहः व्यूहसंदोहविसरव्रजाः ६५ स्तोमौघनिकरव्रातवारसंघातसंचयाः ७९

CC-0. Digitized by eGangotri and MIDF- Delhi
Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समुदायःसमुदयःसमवायश्चयोगणाः ६६ स्त्रियांतुसंहतिर्वृंदंनिकुरुंबंकदंबकं वृंदभे
दाःसमैर्वर्गःसंघसार्थौतुजंतुभिः ६७ सजातीयैःकुलंयूथंतिरश्चांपुंनपुंसकं पशूनांस
मजोन्येषांसमाजोथसधर्मिणां ६८ स्यान्निकायःपुंजराशीतूत्करःकूटमस्त्रियां कापो
तशौकमायूरतैत्तिरादीनितद्गणे ६९ गृहासक्ताःपक्षिमृगाश्छेकास्तेगृह्यकाश्चते
इतिसिंहादिवर्गः ५ मनुष्यामानुषामर्त्यामनुजामानवानराः ६८ स्युःपुमांसःपंचज
नाःपुरुषाःपूरुषानरः स्त्रीयोषिदबलायोषानारीसीमंतिनीवधूः ६९ प्रतीपदर्शिनी
वामावनितामहिलातथा विशेषास्त्वंगनाभीरुःकामिनीवामलोचना ७० प्रमदामानि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम॰ नीकांताललनाचनितंबिनी सुंदरीरमणीरामाकोपनासैवभाविनी ७१ वरारोहामत्तकाशि
४१ न्युत्तमावरवर्णिनी कृताभिषेकामहिषीभोगिन्योन्यानृपस्त्रियः ७२ पत्नीपाणिगृहीतीचद्वि
तीयासहधर्मिणी भार्याजायाथपुंभूम्निदाराःस्यात्तुकुटुंबिनी ७३ पुरंध्रीसुचरित्रातुसती
साध्वीपतिव्रता कृतसापत्निकाध्यूढाधिविन्नाथस्वयंवरा ७४ पतिंवराचवर्याथकुलस्त्रीकु
लपालिका कन्याकुमारीगौरीतुनग्निकानागतार्तवा ७५ स्यान्मध्यमादृष्टरजास्तरुणीयुव रामः
तिःसमे समाःस्नुषाजनीवध्वश्चिरिंटीतुसुवासिनी ७६ इच्छावतीकामुकास्याद्वृषस्यंती ४१
तुकामुकी कांतार्थिनीतुयायातिसंकेतंसाभिसारिका ७७ पुंश्चलीधर्षिणीबंधक्यसती

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



कुलटेत्वरी स्वैरिणी पांशुला च स्यादशिश्वी शिशुना विना ७८ अवीरा निष्पतिसुता विश्वस्ता
विधवे समे आलिः सखी वयस्याथ पतिवत्नी सभर्तृका ७९ वृद्धा पलिक्नी प्राज्ञी तु प्रज्ञा प्र-
ज्ञा तु धीमती शूद्री शूद्रस्य भार्या स्याच्छूद्रा तज्जातिरेव च ८० आभीरी तु महाशूद्री जाति-
पुंयोगयोः समा आर्याणी स्वयमर्या स्यात् क्षत्रिया क्षत्रियाण्यपि ८१ उपाध्यायाप्यु-
पाध्यायी स्यादाचार्यापि च स्वतः आचार्याणी तु पुंयोगे स्यादर्या क्षत्रियी तथा ८२
उपाध्यायानुपाध्यायी पोटा स्त्रीपुंसलक्षणा ॥ वीरपत्नी वीरभार्या वीरमाता तु वीरसूः ८३
जातापत्या प्रजाता च प्रसूता च प्रसूतिका स्त्री नग्निका कोटवी स्याद्दूती संचारिके समे ८४

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम.
४१

कात्यायन्यर्द्धवृद्धा या काषायवसनाधवा॥ सैरंध्री परवेश्मस्था स्ववशा शिल्पकारिका ८५
असिक्नी स्यादवृद्धा या प्रेष्यान्तःपुरचारिणी वारस्त्री गणिका वेश्या रूपाजीवाथ सा जनैः ८६
सत्कृता वारमुख्या स्यात्कुट्टनी शंभली समे विप्रश्निका त्वीक्षणिका दैवज्ञाथ रजस्वला ८७
स्त्रीधर्मिण्यवीरात्रेयी मलिनी पुष्पवत्यपि ऋतुमत्यप्युदक्यापि स्याद्रजः पुष्पमार्त्तवम् ८८
श्रद्धालुर्दोहदवती निष्कला विगतार्त्तवा आपन्नसत्वा स्याद्गुर्विण्यन्तर्वत्नी वगर्भिणी ८९
गणिकादेस्तु गाणिक्यं गार्भिणं यौवनं गणे पुनर्भूर्दिधिषूरूढा द्विस्तस्या दिधिषुः पतिः ९०
स तु द्विजोऽग्रेदिधिषूः सैव यस्य कुटुम्बिनी कानीनः कन्यकाजातः सुतोथ सुभगासुतः ९१

रा.म.
४१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सौभागिनेयः स्यात्पारस्त्रैणेयस्तु परस्त्रियाः पैतृष्वस्रेयः स्यात्पैतृष्वस्रीयश्च पितृष्वसुः २२
सुतौ मातृष्वसुश्चैव वैमात्रेयो विमातृजः अथ बांधकिनेयः स्याद्बंधुलश्चासतीसुतः २३
कौलटेयः कौलटेरो भिक्षुकी तु सती यदि तदा कौलटिनेयोऽस्याः कौलटेयोपि चात्मजः २४
आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी आहुर्दुहितरं सर्वेऽपत्यं तोकं तयोः समे २५
स्वजाते त्वौरसौरस्यौ तातस्तु जनकः पिता जनयित्री प्रसूर्माता जननी भगिनी स्वसा २६
ननंदा तु स्वसा पत्युर्नप्त्री पौत्री सुतात्मजा भार्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परं २७
प्रजावती भ्रातृजाया मातुलानी तु मातुली पतिपत्न्योः प्रसूः श्वश्रूः श्वशुरस्तु पिता तयोः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम: २७ पितृभ्राता पितृव्यः स्यान्मातुर्भ्राता तु मातुलः श्यालाः स्युर्भ्रातरः पत्न्याः स्वामिनो देवृदे
४३ वरौ २८ स्वस्रीयो भागिनेयः स्याज्जामाता दुहितुः पतिः पितामहः पितृपिता तत्पिता प्र
पितामहः २९ मातुर्मातामहाद्येवं सपिंडास्तु सनाभयः समानोदर्यसोदर्यसगर्भ्य
सहजाः समाः ३०० स्वगोत्रबांधवज्ञातिबंधुस्वस्वजनाः समाः ज्ञातेयं बंधुता तेषां क्र
माद्भावसमूहयोः १ धवः प्रियः पतिर्भर्त्ता जारस्तूपपतिः समौ अमृते जारजः कुं
प्रसूज डो मृते भर्त्तरि गोलकः २ भ्रात्रीयो भ्रातृजो भ्रातृभगिन्यौ भ्रातरावुभौ मातापितरौ एम:
नयितारौ पितरौ मातरपितरौ [illegible]जनयितारौ २ श्वश्रूश्वशुरौ श्वशुरौ पुत्रौ पुत्रश्च दुहिता च ४३

प्रसू [illegible]

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दंपती जंपती जायापती भार्य्यापती च तौ ४ गर्भाशयो जरायुः स्यादुल्बं च कललोऽस्त्रियां
सूतिमासो वैजननो गर्भो भ्रूण इमौ समौ ५ तृतीयाप्रकृतिः शण्ढः पंडः क्लीबं नपुंसकं
शिशुत्वं शैशवं बाल्यं तारुण्यं यौवनं समे ६ स्यात्स्थाविरं तु वृद्धत्वं वृद्धसंघेऽपि वार्द्धकं
पलितं जरसा शौक्ल्यं केशादौ विस्रसा जरा ७ स्यादुत्तानशया डिंभा स्तनपा च स्तनंधयी
बालस्तु स्यान्माणवको वयस्थस्तरुणो युवा ८ प्रवयाः स्थविरो वृद्धो जीनो जीर्णो जरन्न
पि वर्षीयान् दशमी ज्यायान् पूर्वजस्त्वग्रियोऽग्रजः ९ जघन्यजे स्युः कनिष्ठयवीयोवरजा
नुजाः अमांसो दुर्वलश्छातो वलवान्मांसलोंऽसलः १० तुंदिलस्तुंदिकस्तुंदी बृहत्कुक्षि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम॰ पिचिंडिलः अवटीटोवनाटश्चावभ्रटोनतनासिके ११ केशवःकेशिकःकेशीवलिनोवलिभः
४५ समौ विकलांगस्त्वपोगंडःखर्वोह्रस्वश्चवामनः १२ खरणाःस्यात्खरणसोविग्रस्तुगत
नासिके खुरणाःस्यात्खुरणसःप्रज्ञःप्रगतजानुकः १३ ऊर्ध्वज्ञुरूर्ध्वजानुःस्यात्संज्ञुःसंह
तजानुकः स्यादेडेवधिरःकुब्जेगडुलःकुकरेकुणिः १४ पृश्निरल्पतनौश्रोणःपंगौमुंड
स्तुमुंडितः वलिरःकेकरेखोडेखंजस्त्रिषुजरावराः १५ जडुलःकालकःपिप्लुस्तिलकस्तिलका
लकः अनामयंस्यादारोग्यंचिकित्सारुक्प्रतिक्रिया १६ भेषजौषधभैषज्यान्यगदोजायुरि राम:
त्यपि स्त्रीरुग्रुजाचोपतापरोगव्याधिगदामयाः १७ क्षयःशोषश्चयक्ष्माचप्रतिश्यायस्तुपी ४५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नसः स्त्री क्षुत्क्षुतं क्षवः पुंसि कासः क्षवथुः पुमान् १८ शोफस्तु श्वयथुः शोथः पादस्फोटो
विपादिका किलासं सिध्मकच्छ्वां तु पामपामा विचर्चिका १९ कण्डूः खर्जूश्च कण्डूया विस्फो
टः पिटकस्त्रिषु व्रणोऽस्त्रियामीर्ममरुः क्लीबे नाडीव्रणः पुमान् २० कोठो मण्डलकं कु
ष्ठं श्वित्रे दुर्नामकार्शसी आनाहस्तु विबंधः स्याद्ग्रहणीरुक्प्रवाहिका २१ प्रच्छर्दिका
वमिश्च स्त्री पुमांस्तु वमथुः समाः व्याधिभेदा विद्रधिः स्त्री ज्वरमेहभगंदराः २२ अश्मरी
मूत्रकृच्छ्रं स्यात्पूर्वे शुक्रावधेस्त्रिषु रोगहार्यगदंकारो भिषग्वैद्यौ चिकित्सके २३ वार्तो
निरामयः कल्य उल्लाघो निर्गतो गदात् ग्लानग्लास्नू आमयावी विकृतो व्याधितोऽपटुः ४
आ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



आतुरोभ्यमितोभ्यांतः समौ पामनकच्छुरौ दद्रुणो दद्रुरोगी स्यादर्शोरोगयुतोर्शसः २५
वातकी वातरोगी स्यात्सातिसारोतिसारकी स्युः क्लिन्नाक्षे चुल्लचिल्लपिल्लाः क्लिन्नेक्ष्णि चाप्य
मी २६ उन्मत्त उन्मादवति श्लेष्मलः श्लेष्मलः कफी न्युब्जो भुग्ने रुजा वृद्धनाभौ तुण्डिलतुंडि
भौ २७ किलासी सिध्मलोंधोदृक् मूर्छाले मूर्तमूर्छितौ शुक्रं तेजोरेतसी च बीजवीर्येन्द्रि
याणि च २८ मायुः पित्तं कफः श्लेष्मा स्त्रियां तु त्वगसृग्धरा पिशितं तरसं मांसं पललं क्रव्यमा
मिषं २९ उत्तप्तं शुष्कमांसं स्यात्तद्वल्लूरं त्रिलिंगकं रुधिरेसृग्लोहितास्ररक्तक्षतजशोणि
तं ३० बुक्काग्रमांसं हृदयं हृन्मेदस्तु वपा वसा पश्चाद्ग्रीवाशिरा मन्या नाडी तु धमनिः



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शिरा ३१ तिलकं क्लोम मस्तिष्कं गोर्दं किट्टं मलोऽस्त्रियां अंत्रं पुरीतं गुल्मस्तु प्लीहा पुंस्यथ वस्नसा
३२ स्नायुः स्त्रियां कालखंड यकृती तु समे इमे सृणिका स्यंदिनी लाला दूषिका नेत्रयोर्मलं ३३
मूत्रं प्रस्रावमुच्चारावस्करौ शमलं शकृत् पुरीषं गूथं वर्चस्कमस्त्री विष्ठाविषौ स्त्रियाम् ३४
स्यात्कर्परः कपालोऽस्त्री कीकसं कुल्यमस्थि च स्याच्छरीरास्थ्नि कंकालः पृष्ठास्थ्नि तु कशेरुका ३५
शिरोस्थनि करोटिः स्त्री पार्श्वास्थनि तु पर्शुका अंगं प्रतीकोऽवयवोऽपघनोऽथ कलेवरं ३६
गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः कायो देहः क्लीबपुंसोः स्त्रियां मूर्तिस्तनुस्तनूः ३७
पादाग्रं प्रपदं पादः पदंघ्रिश्चरणोऽस्त्रियां तद्ग्रंथी घुटिके गुल्फौ पुमान्पार्ष्णिरधस्तयोः ३८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम जंघातु प्रसृता जानूरुपर्वाष्ठीवदस्त्रियां सक्थि क्लीबे पुमानूरुस्तत्संधिः पुंसि वंक्षणौ ३९
४५ गुदंत्वपानंपायुर्नावस्तिर्नाभेरधोद्वयोः कटोनाश्रोणिफलकंकटिःश्रोणिःककुद्मती ४०
पश्चान्नितंबःस्त्रीकट्याःक्लीबेतुजघनंपुरः कूपकौतुनितंबस्थौद्वयहीनेकुकुंदरे ४१
स्त्रियांस्फिचौकटिप्रोथावुपस्थोवक्ष्यमाणयोः भगयोनिर्द्वयोःशिश्नोमेढ्रोमेहनशेफ
सी ४२ मुष्कोऽण्डकोषोवृषणः पृष्ठवंशाधरेत्रिकं पिचिंडकुक्षीजठरोदरंतुंदंकुचौस्त
नौ ४३ चूचुकंतुकुचाग्रंस्यान्ननाक्रोडंभुजांतरं उरोवत्संचवक्षश्चपृष्ठंतुचरमंतनोः ४४ रामः
स्कंधोभुजशिरोंऽसोऽस्त्रीसंधीतस्यैवजत्रुणी बाहुमूलेउभेकक्षौपार्श्वमस्त्रीतयोरधः ४५ ४५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मध्यमंचावलग्नंच मध्योस्त्री द्वौपरौ द्वयोः भुजबाहू प्रकोष्ठो दोः स्यात्कफोणिस्तु कूर्परः ४६
अस्योपरि प्रगंडः स्यात्प्रकोष्ठस्तस्य चाप्यधः मणिबंधादाकनिष्ठं करस्य करभो बहिः
४७ पंचशाखः शयः पाणिस्तर्जनी स्यात्प्रदेशिनी अंगुल्यः करशाखाः स्युः पुंस्यंगुष्ठः प्रदे
शिनी ४८ मध्यमानामिका चापि कनिष्ठा चेति ताः क्रमात् पुनर्भवः कररुहो नखोस्त्री
नखरोस्त्रियां ४९ प्रादेशतालगोकर्णास्तर्जन्यादियुते तते अंगुष्ठे सकनिष्ठे स्याद्वि
तस्तिर्द्वादशांगुलः ५० पाणौ चपेटप्रतलप्रहस्ता विस्तृतांगुलौ द्वौ संहतौ संहतल
प्रतलौ वामदक्षिणौ ५१ पाणिर्निकुब्जः प्रसृतिस्तौ युतावंजलिः पुमान् प्रकोष्ठे

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF, Delhi

अम·
५६

विस्तृतकरो हस्तो मुष्ट्या तु बद्धया ५२ सरत्निः स्यादरत्निस्तु निष्कनिष्ठेन मुष्टिना व्यामो
बाह्वोः सकरयोस्ततयोस्तिर्यगंतरं ५३ ऊर्द्धविस्तृतदोःपाणिर्नृमाने पौरुषं त्रिषु क
ण्ठो गलोथ ग्रीवायां शिरोधिः कंधरेत्यपि ५४ कंबुग्रीवा त्रिरेखा सावटुर्घाटा कृकाटि
का वक्त्रास्ये वदनं तुण्डमाननं लपनं मुख ५५ क्लीबे घ्राणं गंधवहा घोणा नासा च
नासिका ओष्ठाधरौ तु रदनच्छदौ दशनवाससी ५६ अधस्ताच्चिबुकं गंडौ कपोलौ त
त्परा हनुः रदना दशना दंता रदास्तालु तु काकुदं ५७ रसज्ञा रसना जिह्वा प्रांतावोष्ठ अमः
स्य सृक्कणी ललाटमलिकं गोधिरूर्द्ध्वे दृग्भ्यां भ्रुवौ स्त्रियौ ५८ कूर्चमस्त्री भ्रुवोर्मध्यं ता ५६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रकाक्ष्णः कनीनिका लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी ८९ दृग्दृष्टी चास्रु ने
त्राम्बु रोदनं चास्रमश्रु च अपाङ्गौ नेत्रयोरन्तौ कटाक्षोऽपाङ्गदर्शने ९० कर्णशब्द
ग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः उत्तमाङ्गं शिरः शीर्षं मूर्द्धा ना मस्तकोऽस्त्रियां ९१
7 चिकुरः कुन्तलो वालः कचः केशः शिरोरुहे तद्वृन्दे कैशिकं कैश्यमलकाश्चूर्णकुन्तलाः ९२
ते ललाटे भ्रमरकाः काकपक्षः शिखण्डकः कबरी केशवेशोऽथ धम्मिल्लः संयताः कचाः ९३
शिखा चूडा केशपाशी व्रतिनस्तु सटा जटा वेणिः प्रवेणिः शीर्षण्यशिरस्यौ विशदे कचे
९४ पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे ॥ तनूरुहं रोम लोम तद्वृद्धौ श्मश्रु पुंमुखे

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

अम·
४७

CC-0. Digitized by eGangotri and MIDF- Delhi

६५ आकल्पवेशौनेपथ्यंप्रतिकर्मप्रसाधनं दशैतेत्रिष्वलंकर्त्तालंकरिष्णुश्चमंडितः
६६ प्रसाधितोलंकृतश्चभूषितश्चपरिष्कृतः विभ्राड्भ्राजिष्णुरोचिष्णुभूषातुस्या
दलंक्रिया ६७ अलंकारस्त्वाभरणंपरिष्कारोविभूषणं मंडनंचाथमुकुटंकिरीटं
पुंनपुंसकं ६८ चूडामणिःशिरोरत्नंतरलोहारमध्यगः बालपाश्यापारितथ्याप
त्रपाश्याललाटिका ६९ कर्णिकातालपत्रंस्यात्कुंडलंकर्णवेष्टनं ग्रैवेयकंकंठ
भूषालंबनंस्याल्ललंतिका ७० स्वर्णैःप्रालंबिकाथोरःसूत्रिकामौक्तिकैःकृता हा
रोमुक्तावलीदेवछंदोसौशतयष्टिका ७१ हारभेदायष्टिभेदाद्गुच्छगुच्छार्द्धगोस्तनाः

रामः
४७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अर्द्धहारो माणवक एकावल्येकयष्टिका ७२ सैव नक्षत्रमाला स्यात्सप्तविंशतिमौक्ति
कैः आवापकः पारिहार्यः कटकं वलयोऽस्त्रियां ७३ केयूरमंगदं तुल्ये अंगुलीयकमू
र्मिका साक्षरांगुलिमुद्रा स्यात्कंकणं करभूषणम् ७४ स्त्रीकट्यां मेखला कांची सप्त
की रसना तथा क्लीबे सारसनं चाथ पुंस्कट्यां शृंखलं त्रिषु ७५ पादांगदं तुलाकोटि
र्मंजीरो नूपुरोऽस्त्रियां हंसकः पादकटकः किंकिणी क्षुद्रघंटिका ७६ त्वक्फलकृमि
रोमाणि वस्त्रयोनिर्दश त्रिषु वाल्कं क्षौमादि फालं तु कार्पासं बादरं च तत् ७७ कौशे
यं कृमिकोशोत्थं रांकवं मृगरोमजं अनाहतं निःप्रवाणि तंत्रकं च नवांबरे ७८ तस्या

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

अ॰
४८

दुद्गमनीयंयद्धौतयोर्वस्त्रयोर्युगं पत्रोर्णंधौतकौशेयंबहुमूल्यंमहाधनं ७८ क्षौमं
दुकूलंस्याद्द्वेतुनिवीतंप्रावृतंत्रिषु स्त्रियांबहुत्वेवस्त्रस्यदशाःस्युर्वस्तयोर्द्वयो ७९
दैर्घ्यमायामआरोहःपरिणाहोविशालता पटच्चरंजीर्णवस्त्रंसमौनक्तककर्पटौ ८०
वस्त्रमाच्छादनंवासश्चेलंवसनमंशुकं सुचेलकःपटोस्त्रीस्याद्वराशिःस्थूलशाटकः ८१
२ निचोलःप्रच्छदपटःसमौरल्लककंबलौ। अंतरीयोपसंव्यानपरिधानान्यधोंशु
के ८२ द्वौप्रावारोत्तरासंगौसमौबृहतिकातथा संव्यानमुत्तरीयंचचोलःकूर्पास राम॰
कोऽस्त्रियां ८३ नीशारःस्यात्प्रावरणोहिमानिलनिवारणे अर्द्धोरुकंवरस्त्रीणांस्या ४८

CC-0. Digitized by eGangotri and MIDF- Delhi
Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

चंडातकमंशुकं ८५ स्यात्त्रिष्वाप्रपदीनंयत्प्राप्नोत्याप्रपदंहियत् अस्त्रीवितानमु
ल्लोचोदुष्याद्यंवस्त्रवेश्मनि ८६ प्रतिसीरायवनिकास्यात्तिरस्करिणीचसा परिकर्मा
ङ्गसंस्कारःस्यान्मार्ष्टिर्मार्जनामृजा ८७ उद्वर्त्तनोत्सादनेद्वेसमेआप्लावआप्लवः स्ना
नंचर्चातुचार्चिक्यंस्थासकोथप्रबोधनं ८८ अनुबोधःपत्रलेखापत्रांगुलिरिमेसमे
तमालपत्रतिलकंचित्रकाणिविशेषकं ८९ द्वितीयंचतुरीयंचनस्त्रियामथकुं
कुमं काश्मीरजन्माग्निशिखवरबाह्लीकपीतनं ९० रक्तसंकोचपिशुनंधीरलोहित
चंदनं लाक्षाराक्षाजतुक्लीबेयावोऽलक्तोद्रुमामयं ९१ लवंगंदेवकुसुमंश्रीसंज्ञम

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



पजायकं कालीयकंच कालानुसार्य्यं वाथ समार्थकं २२ वंसिकागुरुराजार्हलोहकृमिज
जोंगकं कालागुर्वगरुः स्यात्तन्मंगल्यामल्लिगंधियत् २३ यक्षधूपः सर्ज्जरसो रालसर्व्व
रसावपि वहुरूपोप्यथवृकधूपकृत्रिमधूपको २४ तुरुष्कः पिण्डकः सिह्लो यावनो
प्यतिपायसः श्रीवासो वृकधूपोपि श्रीपिष्टसरलद्रवौ २५ मृगनाभिर्मृगमदः कस्तूरी
वाथ कोलकं कक्कोलकं कोलफलमथ कर्पूरमस्त्रियां २६ घनसारश्चंद्रसंज्ञः सिताभ्रो
हिमवालुका गंधसारो मलयजो भद्रश्रीश्चंदनोस्त्रियां २७ तैलपर्णिकगोशीर्षे हरिचं
दनमस्त्रियां तिलपर्णी तु पत्रांगं रंजनं रक्तचंदनं २८ कुचंदनं चाथ जातीकोषजातीफ



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लेसमे कर्पूरागुरुकस्तूरीकक्कोलैर्यक्षकर्दमः २२ गात्रानुलेपनी वर्त्तिर्वर्णकं स्याद्विलेपनं
चूर्णानि वासयोगाः स्युर्भावितं वासितं त्रिषु ४०० संस्कारो गंधमाल्याद्यैर्यः स्यात्तदधिवासनं
माल्यं माला स्रजौ मूर्ध्नि केशमध्ये तु गर्भकः १ प्रभ्रष्टकं शिखालंबि पुरोन्यस्तं ललामकम् प्रालं
बमृजुलंबि स्यात्कण्ठाद्वैकक्षकं तु तत् २ यत्तिर्यक्क्षिप्तमुरसि शिखास्वापीडशेखरौ रचना
स्यात्परिस्पंद आभोगः परिपूर्णता ३ उपधानं तूपवर्हः शय्यायां शयनीयवत् शयनं मं
चपर्य्यंकपल्यंकाः खट्वया समाः ४ गेण्डुकः कंदुको दीपः प्रदीपः पीठमासनं समुद्गकः सं
पुटकः प्रतिग्राहः पतद्ग्रहः ५ प्रसाधनी कंकतिका पिष्टातपटवासकः दर्प्पणो मुकुराद

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



शौं व्यजनं तालवृंतकं ६ इति मनुष्यवर्गः ६ संततिर्गोत्रजननकुलान्यभिजनान्वयौ वं
शोन्ववायः संतानो वर्णाः स्युर्ब्राह्मणादयः ७ राजबीजी राजवंश्यो बीज्यस्तु कुलसंभवः मह
कुलकुलीनार्यसभ्यसज्जनसाधवः ८ ब्रह्मचारी गृही वानप्रस्थो भिक्षुश्चतुष्टये आश्रमो
स्त्री द्विजात्यग्रजन्मभूदेववाडवाः ९ विप्रश्च ब्राह्मणो सौ षट्कर्मा यागादिभिर्वृतः वि
द्वान्विपश्चिद्दोषज्ञः सन्सुधीः कोविदो बुधः १० धीरो मनीषी ज्ञः प्राज्ञः संख्यावान्पण्डि
तः कविः धीमान्सूरिः कृती कृष्टिर्लब्धवर्णो विचक्षणः ११ दूरदर्शी दीर्घदर्शी श्रोत्रिय
च्छांदसौ समौ उपाध्यायोध्यापकः स्यात्सं निषेकादिकृद्गुरुः १२ मंत्रव्याख्याकृदाचार्य आ



Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

देष्टात्वध्वरेव्रती यष्टाचयजमानश्चससोमवतिदीक्षितः १३ इज्याशीलोयायजूकोयज्वातु
विधिनेष्टवान् सगीष्पतिष्ट्यास्थपतिः सोमपीतीतुसोमपाः १४ सर्ववेदाःसयेनेष्टोयागः
सर्वस्वदक्षिणः अनूचानःप्रवचनेसांगेधीतीगुरोस्तुयः १५ लब्धानुज्ञःसमावृत्तःसुत्वात्व
भिषवेकृते छात्रांतेवासिनौशिष्येशैक्षाःप्राथमकल्पिकाः १६ एकब्रह्मव्रताचारामिथः
सब्रह्मचारिणः सतीर्थ्याश्चैकगुरवश्चितवानग्निमग्निचित् १७ पारंपर्योपदेशेस्यादैतिह्य
मितिहाव्ययं उपज्ञाज्ञानमाद्यंस्याज्ज्ञात्वारंभउपक्रमः १८ यज्ञःसवोध्वरोयागःसप्ततंतु
र्मखःक्रतुः पाठोहोमश्चातिथीनांसपर्य्यातर्प्पणंबलिः १९ एतेपंचमहायज्ञाब्रह्मयज्ञा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



अम॰ दिनामकैः समज्यापरिषद्गोष्ठीसभासमितिसंसदः आस्थानीक्लीबमास्थानंस्त्रीनपुंसक
५१ योःसदः प्राग्वंशःप्राग्घविर्गेहात्सदस्याविधिदर्शिनः २१ सभासदःसभास्ताराःसभ्याःसा
माजिकाश्चते अध्वर्यूद्गातृहोतारोयजुःसामर्ग्विदःक्रमात २३ अग्नीध्राद्याधनैर्वार्या
ऋत्विजोयाजकाश्चते वेदिःपरिष्कृताभूमिःसमेस्थंडिलचत्वरे २४ चषालोयूपकट
कःकुंबासुगहनावृतिः यूपाग्रंतर्मनिर्मन्थ्यदारुण्यरणिर्द्वयोः २५ दक्षिणाग्नि
र्गार्हपत्याहवनीयौत्रयोग्नयः अग्नित्रयमिदंत्रेताप्रणीतःसंस्कृतोनलः २६ अम॰
समूह्यःपरिचाय्योपचाय्यावग्नौप्रयोगिणः योगार्हपत्यादानीयदक्षिणा[illegible]ग्निः ५१

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रणीयते २७ तस्मिन्नानाय्योथाग्नायीस्वाहातुहुतभुक्प्रिया ऋक्सामधेनीधाय्याच
यास्यादग्निसमिंधने २८ गायत्रीप्रमुखंछंदोहव्यपाकेचरुःपुमान् आमीक्षासाशृतो
ष्णेयाक्षीरेस्याद्दधियोगतः २९ धवित्रंव्यजनंतद्यद्रचितंमृगचर्मणा पृषदाज्यंसद
ध्याज्यंपरमान्नंतुपायसं ३० हव्यकव्येदैवपैत्रेअन्नेपात्रंस्रुवादिकं ध्रुवोपभृज्जु
हूर्नातुस्रुवोभेदाःस्रुचःस्त्रियः ३१ उपाकृतःपशुरसौयोभिमंत्र्यक्रतौहतः परंप
राकंशमनंप्रोक्षणंचवधार्थकं ३२ वाच्यलिंगाःप्रमीतोपसंपन्नप्रोक्षिताहते सा
न्नाय्यंहविरग्नौतुहुतंत्रिषुवषट्कृतं ३३ दीक्षांतोवभृथोयज्ञेतत्कर्मार्हंतुयज्ञियं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्रिष्वथक्रतुकर्मेष्टंपूर्त्तंखातादिकर्मयत् ३४ अमृतंविघसोयज्ञशेषभोजनशेषयोः त्यागोवि
हापितंदानमुत्सर्जनविसर्जने ३५ विश्राणनंवितरणंस्पर्शनंप्रतिपादनं प्रादेशनंनिर्व
पणमपवर्जनमंहतिः ३६ मृतार्थंतदहर्दानंत्रिषुस्यादौर्द्ध्वदेहिकं पितृदानंनिवापः
स्याछ्राद्धंतत्कर्मशास्त्रतः ३७ अन्वाहार्यंमासिकेंशोष्टमोह्नःकुतपोस्त्रियां पर्य्येष
णापरीष्टिश्चान्वेषणाचगवेषणा ३८ सनिस्त्वध्येषणायाज्ञाभिशस्तिर्याचनार्थना
षट्तुत्रिष्वर्घ्यमर्घार्थेपाद्यंपादायवारिणि ३९ क्रमादातिथ्यातिथेयेअतिथ्यर्थेत्र
साधुनि स्यादावेशिकआगंतुरतिथिर्नागृहागते ४० पूजानमस्यापचितिः सपर्या



Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

र्चार्हणाः समाः वरिवस्या तु शुश्रूषा परिचर्याप्युपासनं ३९ व्रज्याटाट्या पर्यटनं चर्या
त्वीर्यापथस्थितिः उपस्पर्शस्त्वाचमनमथ मौनमभाषणं ४० आनुपूर्वी स्त्रियां वावृत्परिपाटी
अनुक्रमः पर्यायश्चातिपातस्तु स्यात्पर्यय उपात्ययः ४१ नियमो व्रतमस्त्री तच्चोपवासा
दिपुण्यकं उपवस्तं तूपवासः विवेकः पृथगात्मता ४२ स्याद्ब्रह्मवर्चसं वृत्ताध्ययनर्द्धिरथां
जलिः पाठे ब्रह्मांजलिः पाठे विप्रुषो ब्रह्मबिंदवः ४३ ध्यानयोगासने ब्रह्मासनं कल्पे विधि
क्रमौ मुख्यः स्यात्प्रथमः कल्पोनुकल्पस्तु ततोधमः ४४ संस्कारपूर्वं ग्रहणं स्यादुपाकरणं
श्रुतेः समे तु पादग्रहणमभिवादनमित्युभे ४५ भिक्षुः परिव्राट्कर्मन्दी पाराशर्यपि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम:
५२

मस्करी तपस्वी तापसः पारिकांक्षी वाचंयमो मुनिः ४६ तपःक्लेशसहो दांतो वर्णिनो
ब्रह्मचारिणः ऋषयः सत्यवचसः स्नातकस्त्वाप्लुतो व्रती ४८ ये निर्जितेंद्रियग्रामा य
तिनो यतयश्च ते यः स्थण्डिले व्रतवशाच्छेते स्थंडिलशाय्यसौ ४९ स्थांडिलश्चाथ वि
रजस्तमसः स्युर्द्वयातिगाः पवित्रः प्रयतः पूतः पाषंडाः सर्वलिंगिनः ५० पालाशो
दण्डआषाढो व्रते रांभस्तु वैणवः अस्त्री कमण्डलुः कुंडी व्रतिनामासनं वृषी ५१
अजिनं चर्म कृत्तिः स्त्री भैक्षं भिक्षाकदंबकं स्वाध्यायः स्याज्जपः सुत्याभिषवः सवनं च सा ५२
सर्वैनसामपध्वंसि जप्यं त्रिष्वघमर्षणं दर्शश्च पौर्णमासश्च यागौ पक्षान्तयोः पृथक्

अम:
५२

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

५३ शरीरसाधनापेक्ष्यंनित्यंयत्कर्मतद्यमः नियमस्तुसयत्कर्मानित्यमागंतुसाधनं ५४
उपवीतंयज्ञसूत्रंप्रोद्धृतेदक्षिणेकरे प्राचीनावीतमन्यस्मिन्निवीतंकंठलंबितं ५५
अंगुल्यग्रेतीर्थंदैवंस्वल्पांगुल्योर्मूलेकायं मध्येंगुष्ठांगुल्योपैत्र्यंमूलेत्वंगुष्ठस्यब्राह्मं
५६ स्याद्ब्रह्मभूयंब्रह्मत्वंब्रह्मसायुज्यमित्यपि देवभूयादिकंतद्वत्कृच्छ्रंसांतपना
दिकं ५७ संन्यासवत्यनशनेपुमान्प्रायोथवीरहा नष्टाग्निःकुहनालोभान्मिथ्ये
र्यापथकल्पना ५८ व्रात्यःसंस्कारहीनःस्यादस्वाध्यायोनिराकृतिः धर्मध्वजीलिंग
वृत्तीरवकीर्णीक्षतव्रतः ५९ सुप्तेयस्मिन्नस्तमेतिसुप्तेयस्मिन्नुदेतिच अंशुमा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम. ५४ नभिनिर्मुक्ताभ्युदितौ तौ यथाक्रमं ६० परिवेत्तानुजोऽनूढे ज्येष्ठे दारपरिग्रहात् परिवि
त्तिस्तु तज्ज्यायान् विवाहोपयमौ समौ ६१ तथा परिणयोद्वाहोपयामाः पाणिपीड
नं व्यवायो ग्राम्यधर्मो मैथुनं निधुवनं रतं ६२ त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः स
मोक्षकैः सबलैस्तैश्चतुर्भद्रं जन्याः स्निग्धा वरस्य ये ६३ इति ब्रह्मवर्गः ७ मूर्धाभिषि
क्तो राजन्यो बाहुजः क्षत्रियो विराट् राजा राट् पार्थिवः क्ष्माभृन्नृपभूपमहीक्षितः ६४
राजा तु प्रणताशेषसामन्तः स्यादधीश्वरः चक्रवर्ती सार्वभौमो नृपोऽन्यो मण्डलेश्वरः ६५ अम: ५५
येनेष्टं राजसूयेन मंडलस्येश्वरश्च यः शास्ति यश्चाज्ञया राज्ञः स सम्राडथ राजकं ६६

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राजन्यकं च नृपतिक्षत्रियाणां गणे क्रमात् मंत्री धीसचिवोमात्योन्ये कर्मसचिवास्ततः ६७
महामात्राः प्रधानानि पुरोधास्तु पुरोहितः द्रष्टरि व्यवहाराणां प्राड्विवाकाक्षदर्शकौ ६८
प्रतीहारो द्वारपालद्वाःस्थद्वास्थितदर्शकाः रक्षिवर्गस्त्वनीकस्थोथाध्यक्षाधिकृतौ समौ ६९
स्थायुकोधिकृतो ग्रामे गोपो ग्रामेषु भूरिषु भौरिकः कनकाध्यक्षो रूप्याध्यक्षस्तु नैष्किकः ७०
अंतःपुरे त्वधिकृतः स्यादंतर्वंशिको जनः सौविदल्लाः कंचुकिनः स्थापत्याः सौविदाश्च ते
७१ षण्ढो वर्षवरस्तुल्याः सेवकार्थ्यनुजीविनः विषयानंतरो राजा शत्रुर्मित्रमतः परम्
७२ उदासीनः परतरः पार्ष्णिग्राहस्तु पृष्ठतः रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम विद्विषोपहितामित्रदस्युशात्रवशत्रवः अभिघातिपरारातिप्रत्यर्थिपरिपंथिनः ७४
५८ वयस्यः स्निग्धः सवया अथ मित्रं सखा सुहृत् सख्यं साप्तपदीनं स्यादनुरोधोनुवर्त्तनं ७५
यथार्हवर्णः प्रणिधिरपसर्पश्चरः स्पशः चारश्च गूढपुरुषश्चाप्तप्रत्ययितस्त्रिषु ७६
सांवत्सरो ज्योतिषिको दैवज्ञगणकावपि स्युर्मौहूर्त्तिकमौहूर्त्तज्ञानिकार्त्तान्तिका अपि ७७
तांत्रिको ज्ञातसिद्धांतः सत्री गृहपतिः समौ लिपिकरोक्षरचणोक्षरचंचुश्च लेखके ७८
लिखिताक्षरसंस्थाने लिपिर्लिबिरुभे स्त्रियौ स्यात्संदेशहरो दूतो दूत्यं तद्भावकर्मणी ७९ राम
अध्वनीनोध्वगोध्वन्यः पांथः पथिक इत्यपि स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च ८० ५९

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राज्यांगानि प्रकृतयः पौराणां श्रेणयो पि च॥ संधिर्नाविग्रहो यानमासनं द्वैधमाश्रयः ८१
षड्गुणाः शक्तयस्तिस्रः प्रभावोत्साहमंत्रजाः क्षयस्थानं च वृद्धिश्च त्रिवर्गो नीतिवेदिनाम् ८२
स प्रतापः प्रभावश्च यत्तेजः कोषदंडजं भेदो दण्डः साम दानमित्युपायचतुष्टयं ८३
ग्४ साहसं तु दमो दंडः साम सान्त्वमथो समौ भेदोपजापावुपधा धर्माद्यैर्यत्परीक्षणं ८४
पंचत्रिषु षडक्षीणो यस्तृतीयाद्यगोचरः विविक्तविजनछन्ननिःशलाकास्तथा रहः ८५
रहश्चोपांशु चालिंगे रहस्यं तद्भवे त्रिषु समौ विश्रंभविश्वासौ भ्रेषो भ्रंसो यथोचितात् ८६
अभ्रेषन्यायकल्पास्तु देशरूपं समंजसं युक्तमौपयिकं लभ्यं भजमानाभिनीतवत् ८७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम: न्याय्यंचत्रिषुषट् संप्रधारणातुसमर्थनं अववादस्तुनिर्देशोनिदेशःशासनंचसः ८८
५६ शिष्टिराज्ञातुसंस्थातुमर्यादाधारणास्थितिः आगोपराधोमंतुश्चसमेतूद्दानवंधने
८९ द्विपाद्योद्विगुणोदण्डोभागधेयःकरोवलिः घट्टादिदेयंशुल्कोस्त्रीप्राभृतंतुप्रदेशनं ९०
उपायनमुपग्राह्यमुपहारस्तथोपदा यौतकादितुयद्देयंसदायोहरणंचतत् ९१
तत्कालस्तुतदात्वंस्यादुत्तरःकालआयतिः सांदृष्टिकंफलंसद्यउदर्कःफलमुत्तरं ९२
अदृष्टंवह्नितोयादिदृष्टंस्वपरचक्रजं महीभुजामहिभयंस्वपक्षप्रभवंभयं ९३ राम:
प्रक्रियात्वधिकारःस्याच्चामरंतुप्रकीर्णकं नृपासनंयत्तद्भद्रासनंसिंहासनंचतत् ९४ ५६

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हैमं छत्रंत्वातपत्रं राज्ञस्तुनृपलक्ष्मतत् भद्रकुंभः पूर्णकुंभो भृंगारः कनकालुका ९५
निवेशः शिविरं षंढे सज्जनं भूपरक्षणम् हस्त्यश्वरथपादातं सेनांगं स्याच्चतुष्टयं ९६
दंती दंतावलो हस्ती द्विरदोनेकपो द्विपः मतंगजो गजो नागः कुंजरो वारणः करी ९७
इभः स्तंबेरमः पद्मी यूथनाथस्तु यूथपः मदोत्कटो मदकलः कलभः करिशावकः ९८
प्रभिन्नो गर्जितो मत्तः समावुद्भ्रांतनिर्मदौ हास्तिकं गजतावृन्दे करिणी धेनुका वशा ९९
गंडः कटो मदो दानं वमथुः करसीकरः कुंभौ तु पिंडौ शिरसस्तयोर्मध्ये विदुः पुमान् १००
अवग्राहो ललाटं स्यादीषिका त्वक्षिकूटकं अपांगदेशो निर्याणं कर्णमूलं तु चूलिका १०१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



अधःकुंभस्यवाहित्थंप्रतिमानमधोस्ययत् आसनंस्कंधदेशःस्यात्पद्मकंविंदुजा
लकं ४० पक्षभागःपार्श्वभागोदंतभागस्तुयोग्रतः द्वौपूर्वपश्चाज्जंघादिदेशौगात्राव
रेक्रमात् ४१ तोत्रंवेणुकमालानंबंधस्तंभेथशृंखले अंदुकोनिगलोस्त्रीस्यादंकुशोऽ
स्त्रीसृणिःस्त्रियां ४२ दूष्याकक्ष्यावरत्रास्यात्कल्पनासज्जनासमे प्रवेण्यास्तरणंवर्णःप
रिस्तोमःकुथोद्वयोः ४३ वीतंत्वसारंहस्त्यश्वंवारीतुगजबंधनी घोटकेवीतितुरगतुरंग
श्वतुरंगमाः ४४ वाजिवाहार्वगंधर्वहयसैंधवसप्तयः आजानेयाःकुलीनाःस्युर्वि
नीताःसाधुवाहिनः ४५ वनायुजाःपारसीकाःकांबोजाबाह्लिकाहयाः ययुरश्वोश्व



Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मेधीयोजवनस्तुजवाधिकः ८ पृष्ठ्यःस्थौरीसितःकर्कीरथ्योवोढारथस्ययः बालः
किशोरोवाम्यश्वावडवावाडवंगणे ९ त्रिष्वाश्वीनंयदश्वेनदिनेनैकेनगम्यते
कल्यंतुमध्यमश्वानांहेषाह्रेषावनिस्वनः १० निगालस्तुगलोद्देशोवृंदेत्वश्वीय
नाश्ववत् आस्कंदितंधौरितकंरेचितंवल्गितंप्लुतं ११ गतयोमूःपंचधाराघो
णातुप्रोथमस्त्रियां कविकातुखलीनोस्त्रीशफंक्लीबेखुरःपुमान् १२ पुछोस्त्री
लूमलांगूलेवालहस्तश्चवालधीः त्रिषूपावृत्तलुठितौपरावृत्तेमुहुर्भुविः १३
यानेचक्रिणियुद्धार्थेशतांगःस्यंदनोरथः असौपुष्यरथश्चक्रयानंनसमरायय

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम:
५८

त् १४ कर्णीरथः प्रवहनं डयनं च समं त्रयं क्लीबेनः शकटो स्त्री स्याद्गंत्री कंबलिवाह्यकम् १५
शिबिका याप्ययानं स्याद्दोला प्रेंखादिकाः स्त्रियां उभौ तु द्वैपवैयाघ्रौ द्वीपिचर्मावृते रथे
१६ पांडुकंबलसंवीतः स्यंदनः पांडुकंबली रथे कांबलवास्त्राद्याः कंबलादिभिरावृते
१७ त्रिषु द्वैपादयो रथ्या रथकड्या रथव्रजे धूः स्त्री क्लीबे यानमुखं स्याद्रथांगमप
स्करः १८ चक्रं रथांगं तस्यांते नेमिः स्त्री स्यात्प्रधिः पुमान् पिंडिका नाभिरक्षाग्रकी
लके तु द्वयोरणिः १९ रथगुप्तिर्वरूथो ना कूबरस्तु युगंधरः अनुकर्षो दार्वधःस्थं रामः
प्रासंगो ना युगाद्युगः २० सर्वं स्याद्वाहनं यानं युग्यं पत्रं च धोरणं परंपरावाहनं ५८

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यन्त्रदैनीनकमस्त्रियां २१ आधोरणा हस्तिपका हस्त्यारोहा निषादिनः नियंता प्राजिता
यंता सूतः क्षत्ता च सारथिः २२ सव्येष्ठदक्षिणस्थौ च संज्ञा रथकुटुंबिनः रथिनः स्यंद
नारोहा अश्वारोहास्तु सादिनः २३ भटा योधाश्च योद्धारः सेनारक्षास्तु सैनिकाः
सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते २४ बलिनो ये सहस्रेण साहस्रास्ते सहस्रि
णः परिधिस्थः परिचरः सेनानीर्वाहिनीपतिः २५ कंचुको वारबाणोऽस्त्री यत्तु मध्ये
सकंचुकाः बध्नंति तत्सारसनमधिकांगोऽथ शीर्षकं २६ शीर्षण्यं च शिरस्त्रेऽथ तनु
त्रं वर्म दंशनं उरश्छदः कंकटको जगरः कवचोऽस्त्रियां २७ आमुक्तः प्रतिमुक्तश्च

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



पिनद्धश्चापिनद्धवत् संनद्धोवर्मितःसज्जोदंशितोव्यूढकंकटः[२८] त्रिषामुक्तादयोवर्मभृतां
कावचिकंगणे पदातिपत्तिपदगपादातिकपदाजयः २९ पद्गश्चपदिकश्चाथपादा
तंपत्तिसंहतिः शस्त्राजीवेकाण्डपृष्ठायुधीयायुधिकाःसमाः ३० कृतहस्तःसुप्र
योगविशिखःकृतपुंखवत् अपराद्धपृषत्कोसौलक्ष्याद्यश्च्युतसायकः ३१
धन्वीधनुष्मान्धानुष्कोनिषंग्यस्त्रीधनुर्द्धरः स्यात्काण्डवांस्तुकाण्डीरःशाक्तीकःशक्ति
हेतिको ३२ नैस्त्रिंशिकोसिहेतिःस्यात्समौप्रासिककौन्तिकौ चर्मीफलकपाणिः रामः
स्यात्पताकीवैजयन्तिकः ३३ अनुप्लवःसहायश्चानुचरोभिसरःसमाः पुरोगा



Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्रेसरप्रष्ठाग्रतःसरःपुरःसरः ३४ पुरोगमः पुरोगामी मंदगामी तु मंथरः जंघा
लोतिजवस्तुल्यौ जंघाकरिकजांघिकौ ३५ तरस्वी त्वरितो वेगी प्रजवी जवनो जवः
जय्यो यः शक्यते जेतुं जेयो जेतव्यमात्रके ३६ जैत्रस्तु जेता यो गच्छत्यलं विद्विष
तः प्रति सोभ्यमित्रोभ्यमित्रीयो प्यभ्यमित्रीण इत्यपि ३७ ऊर्जस्वलः स्यादूर्ज
स्वी य ऊर्जोतिशयान्वितः स्यादुरस्वानुरसिलो रथिलो रथिको रथी ३८ काम
गाम्यनुकामीनो ह्यत्यंतीनस्तथा भृशं शूरो वीरश्च विक्रांतो जेता जिष्णुश्च जित्वरः
३९ सांयुगीनो रणे साधुः शस्त्राजीवायुधीयिकौ ध्वजिनी वाहिनी सेना पृतनानी
किनी चमूः ४० वरूथिनी वलं सैन्यं चक्रं चानीकमस्त्रियां व्यूहस्तु वलविन्यासो भे

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

अम दादंडादयोयुधि। ३९ प्रत्यासारोव्यूहपार्ष्णिः सैन्यपृष्ठेपरिग्रहः एकेभैकरथात्र्यश्वा
६१ पत्तिः पंचपदातिका ४० पत्यंगैस्त्रिगुणैः सर्वैः क्रमादाख्यायथोत्तरं सेनामुखंगुल्म
गणौवाहिनीपृतनाचमूः ४१ अनीकिनीदशानीकिन्यक्षौहिण्यथसंपदि ॥ संपत्तिः
श्रीश्चलक्ष्मीश्चविपत्यांविपदापदौ ४२ आयुधंतुप्रहरणंशस्त्रमस्त्रमथास्त्रियौ
धनुश्चापौधन्वशरासनकोदंडकार्मुकं ४३ इष्वासोप्यथकर्णस्यकालपृष्ठंशरा
सनं कपिध्वजस्यगांडीवगांडिवौपुंनपुंसकौ ४४ कोटिरस्याटनीगोधातलेज्या त्य:
घातवारणे लस्तकस्तुधनुर्मध्यंमौर्वीज्याशिंजिनीगुणः ४५ स्यात्प्रत्यालीढमाली ६०
ढमित्यादिस्थानपंचकं लक्ष्यंलक्ष्यंशरव्यंचशराभ्यासउपासनं ४६ पृषत्क

CC-0. Digitized by eGangotri and MIDF- Delhi

वाजा विशिखा अजिह्मगखगाशुगाः कलंबमार्गणशराः पत्री रोप इषुर्द्वयोः ४७
प्रक्ष्वेडनास्तु नाराचाः पक्षो वाजस्त्रिषूत्तरे निरस्तः प्रहिते बाणे विषाक्ते दिग्धलिप्तकौ
४८ तूणोपासंगतूणीरनिषंगा इषुधी द्वयोः तूण्यां खड्गे तु निस्त्रिंशचंद्रहासासि
रिष्टयः ४९ कौक्षेयको मण्डलाग्रः करवालः कृपाणवत् त्सरुः खड्गादिमुष्टौ स्या
न्मेखला तन्निबंधनं ५० फलकोऽस्त्री फलं चर्म्म संग्राहो मुष्टिरस्य यः द्रुघणो मुद्ग
रघनौ स्यादीली करवालिका ५१ भिंदिपालः सृगस्तुल्यौ परिघः परिघातनः
द्वयोः कुठारः स्वधितिः परशुश्च परश्वधः ५२ स्याच्छस्त्री चासिपुत्री च छुरिका च

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



सिधेनुका वा पुंसि शल्यं शंकुर्ना सर्वला तोमरोऽस्त्रियां ५२ प्रासस्तु कुंतः कोणस्तु
स्त्रियः पाल्यश्रिकोटयः सर्वाभिसारः सर्वौघः सर्वसंहननार्थकः ५४ लोहाभिसा
रोऽस्त्रभृतां राज्ञां नीराजनाविधिः यत्सेनयाभिगमनमरौ तदभिषेणनं ५५
यात्रा व्रज्याभिनिर्याणं प्रस्थानं गमनं गमः स्यादासारः प्रसरणं प्रचक्रं चलितार्थ
कं ५६ अहितान्प्रत्यभीतस्य रणे यानमभिक्रमः वैतालिका बोधकराश्चा
क्रिका घाण्टिकार्थकाः ५७ स्युर्मागधास्तु मगधा वंदिनस्तुतिपाठकाः संशप्तका
स्तु समयात्संग्रामादनिवर्तिनः ५८ रेणुर्द्वयोः स्त्रियां धूलिः पांशुर्ना न द्वयोर



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जः धूर्णीधोरणः समुत्पिंजपिंजलौ भृशमाकुले ५९ पताका वैजयंती स्यात्केतनं ध्व-
जमस्त्रियां सा वीराशंसनं युद्धभूमिर्यातिभयप्रदा ६० अहंपूर्वमहंपूर्वमित्यहं-
पूर्विकास्त्रियां आहोपुरुषिका दर्पाद्या स्यात्संभावनात्मनि ६१ अहमहमिका तु
सा स्यात्परस्परं यो भवत्यहंकारः द्रविणं तरः सहबलशौर्याणि स्थाम शुष्मं च ६२
शक्तिः पराक्रमः प्राणो विक्रमस्त्वतिशक्तिता वीरपाणं तु यत्पानं वृत्ते भाविनि वा
रणे ६२ मृधमास्कंदनं संख्यं समीकं सांपरायिकं अस्त्रियां समरानीकरणाः कलह-
विग्रहौ ६३ संप्रहाराभिसंपातकलिसंस्फोटसंयुगाः अभिमर्दसमाघातसंग्राः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



नाभ्यागमाहवाः ६४ समुदायः स्त्रियः संयत्समित्याजिसमिद्युधः नियुद्धंबाहुयुद्धंस्यात्तु
मुलंरणसंकुले ६५ क्ष्वेडातुसिंहनादःस्यात्करिणांघटनाघटा क्रंदनंयोधसंरावो
बृंहितंकरिगर्जितं ६६ विस्फारोधनुषःस्वानःपटहाडंबरौसमौ प्रसभंतुबलात्
कारोहठोथस्खलितंछलं ६७ अजन्यंक्लीबमुत्पातउपसर्गःसमंत्रयं मूर्छातुक
श्मलंमोहोप्यवमर्दस्तुपीडनं ६८ अभ्यवस्कंदनंत्वभ्यासादनंविजयोजयः वैर
शुद्धिःप्रतीकारोवैरनिर्यातनंचसा ६९ प्रद्रावोद्रावसंद्रावसंदावाविद्रवोद्रवः अ
पक्रमोपयानंवरणेभंगपराजयः ७० पराजितपराभूतौत्रिषुनष्टतिरोहितौ



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रमापणं निवर्हणं निकारणं विशारणं ७१ प्रवासनं परासनं निषूदनं निहिंसनं नि
र्वासनं संज्ञपनं निर्ग्रंथनमपासनं ७२ निस्तर्हणं निहननं क्षणनं परिवर्जनं निर्वा
पणं विशसनं मारणं प्रतिघातनं ७३ उद्वासनप्रमथनक्रथनोज्जासनानि च आलं
भपिंजविशरघातोन्मथवधा अपि ७४ स्यात्पंचता कालधर्मो दिष्टांतः प्रलयोत्ययः
अंतो नाशो द्वयोर्मृत्युर्मरणं निधनोस्त्रियां ७५ परासुप्राप्तपंचत्वपरेतप्रेतसंस्थि
ताः मृतप्रमीतौ त्रिष्वेते चिता चित्या चितिः स्त्रियां ७६ कबंधोस्त्री क्रियायुक्तमपमूर्द्ध
कलेवरं श्मशानं स्यात्पितृवनं कुणपः शवमस्त्रियां ७७ कबंधोस्त्री क्रियायुक्तमपमूर्द्ध

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

५२ कलेवरं श्मशानं स्यात्पितृवनं कुणपः शवमस्त्रियां ७८ प्रग्रहोपग्रहौ वंद्यां कारा स्या
द्बंधनालये पुंसि भूम्न्यसवः प्राणाश्चैवं जीवोऽसुधारणं ७९ आयुर्जीवितकालो ना
जीवातुर्जीवितौषधं ८० इति क्षत्रियवर्गः ८ उरव्या ऊरुजा अर्या वैश्या भूमि
स्पृशो विशः आजीवो जीविका वार्त्ता वृत्तिर्वर्त्तनजीवने १ स्त्रियां कृषिः पाशु
पाल्यं वाणिज्यं चेति वृत्तयः सेवा श्ववृत्तिरनृतं कृषिरुंछशिलं त्वृतं २ द्वे या
चिता याचितयोर्यथासंख्यं मृतामृते सत्यानृतं वणिग्भावः स्यादृणं पर्युदंचनम् रामः
उद्धारोऽर्थप्रयोगस्तु कुसीदं वृद्धिजीविका याञ्चयाप्तं याचितकं नियमादापमि ५२

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्यकं ८४ उत्तमर्णाधमर्णौ द्वौ प्रयोक्तृग्राहकौ क्रमात् कुसीदिको वार्द्धुषिको वृद्ध्याजी
वश्च वार्द्धुषिः ८५ क्षेत्राजीवः कर्षकश्च कृषकश्च कृषीवलः क्षेत्रं व्रैहेयशालेयं व्रीहि
शाल्युद्भवोचितं ८६ यव्यं यवक्यं षाष्टिक्यं यवादिभवनं हि यत् तिल्यं तैलीनवन्
माषोमाणुभंगा द्विरूपता ८७ मौद्गीनकोद्रवीणादि शेषधान्योद्भवक्षमं। बी
जाकृतं तूप्तकृष्टं सीत्यं कृष्टं च हल्यवत् ८८ त्रिगुणाकृते तृतीयाकृतं त्रिहल्यं त्रि
सीत्यमपि तस्मिन् द्विगुणाकृते तु सर्वं पूर्वं शंबाकृतमपीह ८९ द्रोणाढका
दिवापादौ द्रौणिकाढकिकादयः खारीवापस्तु खारीक उत्तमर्णादयस्त्रिषु ९०

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

६५ पुंनपुंसकयोर्वप्रः केदारः क्षेत्रमस्य तु केदारकं स्यात्कैदार्यं क्षेत्रं कैदारिकं गणो ११
लोष्टानि लेष्टवः पुंसि कोटिशो लोष्टभेदनः प्राजनं तोदनं तोत्रं खनित्रमवदारणम्
१२ दात्रं लवित्रमाबंधो योत्रं योक्त्रमथो हलं निरीषं कूटकं फालः कृषिको लांग
लं हलं १३ गोदारणं च सीरोऽथ शम्या स्त्री युगकीलकः ईषा लांगलदण्डः स्या
त्सीता लांगलपद्धतिः १४ पुंसि मेधिः खले दारु न्यस्तं यत्पशुबंधने आशुर्व्री
हिः पाटलः स्यात्सितशूकयवौ समौ १५ तोक्मस्तु तत्र हरितो कलापस्तु सतीनकः ण्य:
लकः हरेणुः खण्डिकश्चास्मिन् कोरदूषस्तु कोद्रवः १६ मंगल्यकोमसूरोऽथ ६५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मुकुष्टकमयष्टकौ वनमुंगे सर्षपे तु द्वे तंतुभकदंवकौ ६७ सर्षपश्चोतकश्चासौ श्चो
टीमाञ्चोव बातुटिः सिद्धार्थस्त्वेष धवलो गोधूमः सुमनः समौ ६८ स्याद्यावकस्तु
कुल्माषश्चनको हरिमंथजः द्वौ तिले तिलपेजश्च तिलपिंजश्च निष्फले ६९ क्षवः क्षु
ताभिजननो राजिका कृष्णिकासुरी स्त्रियौ कंगू प्रियंगू द्वे अतसी स्यादुमा क्षुमा ७०
मातुलानी तु भंगायां व्रीहिभेदस्त्वणुः पुमान् किंशारुः शस्यशूकं स्यात् कणिशं शस्यमं
जरी ७१ धान्यं व्रीहिः स्तंबकरिः स्तंबो गुच्छस्तृणादिनः नाडी नालं च काण्डोस्य पलालो
स्त्री स निःफलः ७२ कडंगरो वुषं क्लीबे धान्यत्वचि तुषः पुमान् शूकोऽस्त्री श्लक्ष्णातीक्ष्ण

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम ग्रेसमीसिंबात्रिषूत्तरे ७२ ऋद्धमावसितंधान्यंपूतंतुबहुलीकृतं माषादयःसमीधा
६५ न्येशूकधान्येयवादयः ७३ शालयःकलमाद्याश्चषष्टिकाद्याश्चपुंस्यमी तृणधान्या
निनीवाराःस्त्रीगवेधुर्गवेधुकाः ७४ अयोग्रोमुषलोऽस्त्रीस्यादुदूखलमुलूखलं प्रस्फो
टनंशूर्प्पमस्त्रीचालिनीतितउःपुमान् ७५ स्यूतप्रसेवौकंदोलपिटौकटकिलिंजकौ
समानौरसवत्यांतुपाकस्थानमहानसे ७६ पौरोगवस्तदध्यक्षःसूपकारास्तुवल्लवा
आरालिकावांधसिकाःसूदाश्चौदनिकागुणाः ७७ आपूपिकःकांदविकोभक्ष्यकार गुरुः
इमेत्रिषु अश्मंतमुद्धानमधिश्रयणीचुल्लिरंतिका ७८ अंगारधारिकांगारशकंट्य ६५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पिहसंत्यपि हसन्त्यप्यथ नस्त्री स्यादंगारोलौतमुल्मुकं ३० क्लीबेंबरीषं भ्राष्ट्रो ना कंडुर्वा स्वे
दनी स्त्रियां अलिंजरः स्यान्माणिकं कर्कर्यालुर्गलंतिका ३१ पिठरः स्थाल्युखा कुंडं कल
शस्तु त्रिषु द्वयोः घटः कुटः निपावस्त्री शरावो वर्द्धमानकः ३२ ऋजीषं पिष्टपचनं कंसो
स्त्री पानभोजनं कुतूः कृत्तेः स्नेहपात्रं सैवाल्पा कुतुपः पुमान् ३३ सर्वमावपनं भांडं पा
त्रामत्रे च भाजने दर्विः कंबिः खजाका च स्यात्तर्दूर्दारुहस्तकः ३४ अस्त्री शाकं हरितकं
शिग्रुरस्य तु नालिका कडंबश्च कलंबश्च वेशवार उपस्करः ३५ तिंतिडीकं च चुक्रं च
वृक्षाम्लमथ वेल्लजं मरिचं कोलकं कृष्णमूषणं धर्मपत्तनं ३६ जीरको जरणो जाजी

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ॰ ६६ कणाह्वस्तेतुजीरके सुखवीकारवीपृथ्वीपृथुःकालोपकुंविता ८७ आर्द्रकं
शृंगवेरंस्यादथछत्राविनुन्नकं कुस्तुंबुरुंचधान्याकमथशुंठीमहोषधम
स्त्रीनपुंसकयोर्विश्वंनागरंविश्वभेषजं आलनालकसौवीरंकुल्माषाभिषु
तानिच ८८ अवंतिसोमधान्याम्लकुंजलानिचकांजिकं सहस्रवेधिजतुः
कंवाह्लीकंहिंगुरामठं ९० तत्पत्रीकारवीपृथ्वीवाष्पीकाकवरीत्रिपु निशाह्वा
कांचनीपीताहरिद्रावरवर्णिनी ९१ सामुद्रंयत्तुलवणंमक्षीवंवशिरंचतत्
सैंधवोस्त्रीशीतशिवंमाणिमन्थंचसिंधुजे १०० रौमकंवसुकंपाक्यंविडंचकृत — रामः ६६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

केह्यं सौवर्चलोऽक्षरुचके तिलकं तत्र मेचके १ मत्स्यण्डी फाणितं खण्डविका
रे शर्करा सिता कूर्चिका क्षीरविकृतिः स्याद्रसाला तु मार्जिता २ स्यात्तेमनं
तु निष्ठानं त्रिलिंगा वासितावधेः शूलाकृतं भटित्रं च शूल्यमुख्यं तु पैठरं ३
औदश्वितमोदाश्वितकमुदश्वितिश्च संस्कृते प्रणीतमुपसंपन्नं प्रयतं स्या
त्सुसंस्कृते ४ स्यात्पिच्छिलं तु विजिलं संमृष्टं शोधितं समे चिक्कणं मसृ
णं स्निग्धं तुल्ये भावितवासिते ५ आपक्वं पौलिरभ्यूषो लाजाः पुंभूम्नि चाक्ष
तं पृथुकः स्याच्चिपिटको धाना भृष्टयवे स्त्रियः ६ पूपोऽपूपः पिष्टकः स्यात्करं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम भोदधिसक्तवः भिस्सा स्त्रीभक्तमंधोन्नमोदनोस्त्रीसदीदिविः ७ भिस्सिटाद
६१ ग्धिकासर्वरसाग्रेमंडमस्त्रियां मासराचामनिस्रावामंडेभक्तसमुद्भवे ८
यवागूरुष्णिकाश्राणाविलेपीतरलाचसा गव्यंत्रिषुगवांसर्वंगोविड्गोमय
मस्त्रियां ९ तत्तुशुष्कंकरीषोस्त्रीदुग्धंक्षीरंपयःसमं पयस्यमाज्यंदध्या
दिद्रप्संदधिघनेतरत् १० घृतमाज्यंहविःसर्पिर्नवनीतंनवोद्धृतं तत्तुहै
यंगवीनंयद्ध्योगोदोहोद्भवंघृतं ११ दंडाहतंकालसेयमरिष्टमपिगोरसः रामः
६१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तक्रंह्युदश्विन्मथितंपादांबूर्द्धाम्बु निर्जलं १२ मंडंदधिभवंमस्तुपेयूषोभिनवंपयः
अशनाया बुभुक्षा क्षुद्ग्रासस्तु कवलार्थकः १३ सपीतिः स्त्रीतुल्यपानंसग्धिः स्त्रीसहभोजनम् उ
दन्यातु पिपासातृट्तर्षोजग्धिस्तुभोजनं १४ जेमनंलेपआहारोनिघसोन्याद इत्यपि सौहित्य
तर्पणंतृप्तिः पेलाभुक्तसमुज्झितं १५ कामंप्रकामंपर्य्याप्तंनिकामेष्टंयथेप्सितं गोपेगो
पालगोसंख्यगोधुगाभीरवल्लवाः १६ गोमहिष्यादिकंपादबंधनंद्वौगवीश्वरे गोमान्गो
मीगोकुलंतुगोधनंस्याद्गवांव्रजे १७ त्रिष्वाशितंगवीनंतद्गावोयत्राशिताःपुरा उक्षाभ
द्रोबलीवर्द्दऋषभोवृषभोवृषः १८ अनड्वान्सौरभेयोगौरुक्षांसंहतिरौक्षकम्

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम

६८

गव्यागोत्रागवांवत्सधेन्वोर्वात्सकधैनुकं १९ वृषोमहान्महोक्षःस्याद्वृद्धोक्षस्तुज
रद्गवः उत्पन्नउक्षाजातोक्षःसद्योजातस्तुतर्णकः २० शकृत्करिर्वत्सकःस्याद्दम्य
वत्सतरौसमौ आर्षभ्यःषंडतायोग्यःषंढोगोपतिरिट्चरः २१ स्कंधप्रदेशस्तुव
हःसास्नातुगलकंबलः स्यान्नस्तितस्तुनस्योतःप्रष्ठवाड्युगपार्श्वगः २२
युगादीनांतुवोढारोयुग्यप्रासंगशाकटाः खनतितेनतद्वोढास्येदंहालिकसैरि
कौ २३ धूर्वहेधुर्य्यधौरेयधुरीणाःसधुरंधराः उभावेकधुरीणैकधुरावेकधुरावहे अम
२४ सतुसर्वधुरीणःस्याद्योवैसर्वधुरावहः माहेयीसौरभेयीगौरुस्रामाताचशृंगि ६८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अर्जुन्यघ्न्यारोहिणीस्यादुत्तमागोषुनैचिकी वर्णादिभेदात्संज्ञाःस्युःशवलीधवला
दयः २५ द्विहायनीद्विवर्षागौरेकाब्दात्वेकहायनी चतुरब्दाचतुर्हायन्येवंत्र्य
ब्दात्रिहायनी २६ वशावंध्यावतोकातुस्रवद्गर्भाथसंधिनी आक्रांतावृष
भेणाथवेहद्गर्भोपघातिनी २७ काल्योपसर्याप्रजनेप्रष्ठौहीबालगर्भि
णी स्यादचंडीतुसुकराबहुसूतिःपरेष्टुका २८ चिरसूतावष्कयणीधेनु
स्यान्नवसूतिका सुव्रतासुखसंदोह्यापीनोध्नीपीवरस्तनी २९ द्रोणक्षी
राद्रोणदुग्धाधेनुष्याबंधकेस्थिता समांसमीनासायैवप्रतिवर्षंप्रसूय

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम·
६९

ते २० ऽधस्तु क्लीबमापीनं समौ शिवककीलकौ नपुंसि दाम संदानं पशुरज्जुस्तु
दामनी २१ वैशाखमंथमंथानमंथानो मंथदंडके कुठरो दण्डविष्कंभो मंथनी
गर्गरी समे २२ उष्ट्रे क्रमेलकमयमहांगाः करभः शिशुः करभाः स्युः शृंखल
का दारवैः पादबंधनैः २३ अजा छागी स्तभछागबस्तछगलका अजः मेढ्रो
रभ्रोरणोर्णायुमेषवृष्णय एडकाः २४ उष्ट्रोरभ्राजवृंदे स्यादौष्ट्रकौरभ्रकाज
कं चक्रीवंतस्तु वालेया रासभा गर्दभाः खराः २५ वैदेहकः सार्थवाहो नैग राम·
मो वाणिजो वणिक् पण्याजीवो ह्यापणिकः क्रयविक्रयिकश्च सः २६ ६९

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विक्रेतास्याद्विक्रयिकः क्रायिकः क्रयिकः समौ वाणिज्यंतुवणिज्यास्यान्मूल्यंवस्नो
प्यवक्रयः ७९ नीवीपरिपणोमूलधनंलाभोधिकंथनं प्रतिदानंपरीवर्त्तोनै
मेयनियमावपि ८० पुमानुपनिधिर्न्यासः परिदानंतदर्पणं क्रयेप्रसारि
तंक्रय्यंक्रेयंक्रेतव्यमात्रके ८१ विक्रेयंपणितव्यंचपण्यंक्रय्यादयस्त्रिषु
क्लीबेसत्यापणंसत्यंकारः सत्याकृतिःस्त्रियां ८२ विपणोविक्रयः संख्याःसं
ख्येयेह्यादशत्रिषु विंशत्याद्याः सदैकत्वेसर्वाःसंख्येयसंख्ययोः ८३ संख्या
र्थेद्विबहुत्वेस्तःतासुचानवतेःस्त्रियः पंक्तेःशतसहस्रादिःक्रमाद्दशगुणोत्त

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ं ८४ पौतवं द्रुवयं पाय्यमिति मानार्थकं त्रयं मानं तुलांगुलिप्रस्थैर्गुंजाः पंचाद्यमाषक
८५ ते षोडशाक्षः कर्षोऽस्त्री पलं कर्षचतुष्टयं सुवर्णबिस्तौ हेम्नोऽक्षे कुरुविस्तस्तु त
त्पले ८६ तुलास्त्रियां पलशतं भारः स्याद्विंशतिस्तुला आचितं दशभाराः स्युः शा
कटो भार आचितः ८७ कार्षापणः कार्षिकः स्यात् कार्षिके ताम्रिके पणः अस्त्रि
यामाढकद्रोणौ खारी वाहो निकुंचकः ८८ कुडवः प्रस्थ इत्याद्याः परिमाणार्थका
पृथक् पादस्तुरीयो भागः स्यादंशभागौ तु वंटके ८९ द्रव्यं वित्तं स्वापतेयं रिक्थ
मृक्थं धनं वसु हिरण्यं द्रविणं द्युम्नमर्थरैविभवा अपि ९० स्यात्कोषश्च हिरण्य

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

व हेमरूप्येकृताकृते ताभ्यांयदन्यत्तत्कूप्यं रूप्यंतद्वयमाहतं ४९ गारुत्मतंमरक
तमश्मगर्भहरिन्मणिः शोणरत्नंलोहितकः पद्मरागोथमौक्तिकं ५० मुक्ताथवि
द्रुमःपुंसिप्रवालंपुंनपुंसकं रत्नंमणिर्द्वयोरश्मजातौमुक्तादिकेपिच ५१ स्वर्णं
सुवर्णंकनकंहिरण्यंहेमहाटकं तपनीयंशातकुंभंगांगेयंभर्मकर्बुरं ५२
चामीकरंजातरूपंमहारजतकांचने रुक्मंकार्तस्वरंजांबूनदमष्टापदोऽस्त्रियां ५३
अलंकारसुवर्णंयच्छृंगीकनकमित्यपि रीतिःस्त्रियामारकूटोनस्त्रियामथताम्र
कं ५४ शुल्वंम्लेच्छमुखंद्व्यष्टवरिष्ठोदुंबराणिच लोहोस्त्रीशस्त्रकंतीक्ष्णंपिंडंका

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

अम: ७१

लायसायसी ५५ अश्मसारोथमंडूरं सिंहानमपि तन्मले सर्वं च तैजसं लो
हं विकारस्त्वयसः कुशी ५६ क्षारः काचोथ चपलो रसः सूतश्च पारदे गव
लं माहिषं शृंगमभ्रकं गिरिजामले ५७ स्रोतोंजनं तु सौवीरं कापोतांजन
यामुने तुत्थांजनं शिखिग्रीवं वितुन्नकमयूरके ५८ सौगंधिकश्च व
ल्मीकाध्याकल्ताल्यातुष्कलस्थिका रीतिपुष्पं पुष्पकेतुः पौष्पकं कुसुमांजनं ५९
पिंजरं पीतनं तालमालं च हरितालके गैरेयमर्थ्यं गिरिजमश्मजं च शिलाजतु ६० गुः ७१
बोलगंधरसप्राणपिंडगोपरसाः समाः डिंडीरोब्धिकफः फेनः सिंदूरं नागसं

CC-0. Digitized by eGangotri and MIDF- Delhi

भवं ६१ नागःसीसकयोगेष्टवङ्गाशिलात्रपुपिच्चटं रंगवंगेअथपित्तुलूलोधकम
लोज्ञरं ६२ स्यात्कुसुंभंवाह्निशिखंमहारजनमित्यपि मेषकम्बलडुशोयिः श
शोणितशशरोमाशा ६३ मधुभोड्रनासिकादमध्वच्छिष्टंतु शिक्थके मनःशिला
मनोगुप्तामनोह्वानागजिह्विका ६४ नेपालीकुनटीगोलायवक्षारोयवाग्रजः
पाक्योथसर्जिकाक्षारःकापोतःसुखवर्चकः ६५ सौवर्चलंस्यादुचकंत्वक्क्षीरी
वंशलोचना शिग्रुजंश्वेतमरिचंमोरटंमूलमैक्षवं ६६ ग्रंथिकंपिप्पलीमूलं
चटकाशिरइत्यपि गोलोमीभूतकेशोनापत्रांगंचंदनं ६७ त्रिकटुत्र्यूषणंव्यो
रक्त

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

अं.
७३

पंत्रिफलात्तु फलत्रिकं ६८ इति वैश्यवर्गः ९ शूद्राश्चावरवर्णाश्च वृषलाश्च ज
घन्यजाः आचांडलात्तु संकीर्णा अंबष्ठकरणादयः ६९ शूद्राविशोस्तु करणोंऽ
म्बष्ठो वैश्याद्विजन्मनोः शूद्राक्षत्रिययोरुग्रो मागधः क्षत्रियाविशोः ७० माहिष्यो
र्याक्षत्रिययोः क्षत्तार्याशूद्रयोः सुतः ब्राह्मण्यां क्षत्रियात्सूतस्तस्यां वैदेहको विशः
७१ रथकारस्तु माहिष्यात्करण्यां यस्य संभवः स्याच्चांडालस्तु जनितो ब्राह्मण्यां
वृषलेन यः ७२ कारुः शिल्पी संहतैस्तैर्द्वयोः श्रेणिः सजातिभिः कुलिकः स्यात्कु राम:
लश्रेष्ठी मालाकारस्तु मालिकः ७३ कुंभकारः कुलालः स्यात्पलगंडस्तु लेपकः ७३

CC-0. Digitized by eGangotri and MIDF- Delhi
Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तंत्रवायः कुविंदः स्यात्तुन्नवायस्तु सौचिकः ७४ रंगाजीवश्चित्रकरः शस्त्रमार्जोसिधाव
कः पादूकृच्चर्मकारः स्याद्व्योकारो लोहकारकः ७५ नाडीन्धमः स्वर्णकारः कलादो रु
क्मकारकः स्याच्छांखिकः कांबविकः शौल्विकस्ताम्रकुट्टकः ७६ तक्षा तु वर्द्धकिस्त्वष्टा
रथकारस्तु काष्ठतट् ग्रामाधीनो ग्रामतक्षः कौटतक्षोनधीनकः ७७ क्षुरिमुंडि
दिवाकीर्त्तिनापितांतावसायिनः निर्णेजकः स्याद्रजकः शौण्डिको मंडहारकः ७८
जाबालः स्यादजाजीवो देवाजीवस्तु देवलः स्यान्माया शाम्बरी मायाकारस्तु प्रतिहा
रकः ७९ शैलालिनस्तु शैलूषा जायाजीवाः कृशाश्विनः भरता इत्यपि नटाश्चा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

अ·
७३

रणास्तुकुशीलवाः १० मार्दंगिकामौरजिकाःपाणिवादास्तुपाणिघाः वेणुध्माः
स्युर्वैणविकावीणावादास्तुवैणिकाः ११ जीवांतकःशाकुनिकौद्वौवागुरिकजालि
कौ वैतंसिकाःकौटिकश्चमांसिकश्चसमंत्रयं १२ भृतकोभृतिभुक्कर्मकरोवैत
निकोपिसः वार्त्तावहोवैवधिकोभारवाहस्तुभारिकः १३ विवर्णःपामरोनीच
प्राकृतश्चपृथक्जनः निहीनोपसदोजाल्मःक्षुल्लकश्चेतरश्चसः १४ भृत्य
दासेरदासेयदासगोप्यकचेटकाः नियोज्यकिंकरप्रेष्यभुजिष्यपरिचारकाः १५ रामः
पराचितपरिस्कंदपरजातपरैधिताः मंदस्तुंदपरिमृजआलस्यःशीतकोऽल ७३

CC-0. Digitized by eGangotri and MIDF- Delhi
Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सोऽनुलः ८६ दक्षेतुचतुरपेशलपटवः सुत्थानउष्णश्च चांडालप्लवमातंगदिवा
कीर्त्तिजनंगमाः ८७ निषादश्वपचावंतेवासिचंडालपुक्कसाः भेदाः किरात
शवरपुलिंदाम्लेछजातयः ८८ व्याधोमृगवधाजीवोमृगयुर्लुब्धकोपिसः कौलेयकःसा
रमेयःकुक्कुरोमृगदंशकः ८९ शुनकोभषकःश्वास्यादलर्कस्तुसयोगिकः श्वाविश्वकद्रुर्मृ
गयाकुशलःशरमाशुनी ९० विट्चरःसूकरोग्राम्योवर्करस्तरुणःपशुः आच्छोदनंमृगव्यंस्या
दाखेटोमृगयास्त्रियां ९१ दक्षिणारुर्लुब्धयोगाद्दक्षिणेर्माकुरंगकः चौरैकागारिकस्तेनद
स्युतस्करमोषकाः ९२ प्रतिरोधिपरास्कंदिपाटच्चरमलिम्लुचाः चौरिकास्तैन्यचौर्येचस्तेयं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

अम लोग्रंतु तद्धनं २३ वीतंसस्तूपकरणं बंधने मृगपक्षिणां उन्माथः कूटयंत्रं स्याद्वागुरा
७५ मृगबंधनी २४ शुल्वं वराटकः स्त्री तु रज्जुस्त्रिषु वटी गुणः उद्घाटनं घटीयंत्रं सलिलो
द्वाहनं प्रहेः २५ पुंसि वेमा वापदंडः सूत्राणि नलि तंतवः वाणिर्व्युतिः स्त्रियौ तुल्ये
पुस्तं लेप्यादिकर्मणि २६ पंचालिका पुत्रिका स्याद्वस्त्रदंतादिभिः कृता पिटकः पेटको
पेटा मंजूषाथ विहंगिका २७ भारयष्टिस्तदालंबि शिक्यं काचोथ पादुका पादू शू:
पानत् स्त्री सैवानुपदीना पदायता २८ नद्ध्री वध्री वरत्रा स्यादश्वादेस्ताडनी क ७५
शा चंडालिका तु कंडोलवीणा चंडालवल्लकी २९ नाराची स्यादेषणिका शाण

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्वीश्वरः पतिरीशिता १० अधिभूर्नायको नेता प्रभुः परिवृढोऽधिपः अधिकर्द्धिः समृद्धः
स्यात्कुटुंबव्यापृतस्तु यः ११ स्यादभ्यागारिकस्तस्मिन्नुपाधिश्च पुमानयं वरांगरू
पोपेतो यः सिंहसंहननो हि सः १२ निर्वार्यः कार्यकर्त्ता यः संपन्नः सत्वसंपदा अवाचि
मूकोथ मनोजवसः पितृसंनिभः १३ सत्कृत्यालंकृतां कन्यां यो ददाति स कूकुदः लक्ष्मी
वाँल्लक्ष्मणः श्रीलः श्रीमान् स्निग्धस्तु वत्सलः १४ स्याद्दयालुः कारुणिकः कृपालुः सूर
तः समाः स्वतंत्रोऽपावृतः स्वैरी स्वच्छंदो निरवग्रहः १५ परतंत्रः पराधीनः परवान्नाथ
वानपि अधीनो निघ्न आयत्तः स्वच्छंदो गृह्यकोप्यसौ १६ खलपूः स्याद्बहुकरो दीर्घ
सूत्रश्चिरक्रियः जाल्मोऽसमीक्ष्यकारी स्यात्कुंठो मंदः क्रियासु यः १७ कर्मक्षमो

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लंकर्मीणः क्रियावान्कर्मसूद्यतः सकार्मः कर्मशीलोयः कर्मशूरस्तुकर्मठः १८ भर
अ· ७५ ण्यभुक्कर्मकरः कर्मकारस्तुतत्क्रियः अपस्नातोमृतस्नातआमिषाशीतुशौष्कलः १९ रामः
बुभुक्षितः स्यात्क्षुधितोजिघत्सुरशनायितः परान्नः परपिण्डादोभक्षकोघस्मरोद्म
रः २० आद्यूनःस्यादौदरिकोविजिगीषाविवर्जिते उभौत्वात्मंभरिः कुक्षिंभरिः स्वोदर
पूरके २१ सर्वान्नीनस्तुसर्वान्नभोजीगृध्नुस्तुगर्द्धनः लुब्धोभिलाषुकस्तृष्णक्समौ
लोलुपलोलुभौ॥ २२ ॥उन्मदस्तून्मदिष्णुः स्यादविनीतस्समुद्धतः मत्तेशौण्डोत्कटक्षी
बाः कामुकेकमितानुकः २३ कम्रः कामयिताभीकः कमनः कामनोभिकः विधेयो ७५

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विनयग्राहीवचनेस्थितआश्रयः २४ वश्यःप्रणेयोनिभृतविनीतप्रश्रिताःसमाः धृष्टे
धृष्णग्वियातश्चप्रगल्भःप्रतिभान्विते २५ स्यादधृष्टेतुशालीनोविलक्षोविस्मयान्विते
अधीरेकातरस्त्रस्तोभीरुभीरुकभीलुकाः २६ आशंसुराशंसितरिगृहयालुर्गृहीतरि
श्रद्धालुःश्रद्धयायुक्तेपतयालुस्तुपातुके २७ लज्जाशीलेपत्रपिष्णुर्वन्दारुरभिवादके
शरारुर्घातुकोहिंस्रस्स्याद्वर्द्धिष्णुस्तुवर्द्धनः २८ उत्पतिष्णुस्तूत्पतितालंकरिष्णुस्तुमंड
नः भूष्णुर्भविष्णुर्भविता वर्त्तिष्णुर्वर्त्तनःसमौ २९ निराकरिष्णुःक्षिप्नुःस्यात्सांद्रःस्नि
ग्धस्तुमेदुरः ज्ञातातुविदुरोविंदुर्विकासीतुविकस्वरः ३० विसृत्वरोविसृमरःप्रसा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



रीवविसारिणि सहिष्णुः सहनः क्षंता तितिक्षुः क्षमिता क्षमी ३१ क्रोधनोऽमर्षणः कोपी
चण्डस्त्वत्यंतकोपनः जागरूको जागरिता घूर्णितः प्रचलायितः ३२ स्वप्नक् शयालु
निद्रालुर्निद्राणशयितौ समौ पराङ्मुखः पराचीनः स्यादवाङप्यधोमुखः ३३ देवान
ञ्चति देवद्र्यङ् विश्वद्र्यङ् विश्वगञ्चति यः सहाञ्चति सध्र्यङ् स स तिर्यङ् यस्तिरोऽञ्चति ३४
वदो वदावदो वक्ता वावदूकश्च वक्तरि स्याज्जल्पाकस्तु वाचालो वाचाटो बहुगर्ह्यवाक् ३५
दुर्मुखे मुखराबद्धमुखौ शक्लः प्रियंवदे लोहलः स्यादस्फुटवाग्गर्ह्यवादी तु कद्वदः ३६
समौ कुवादकुचरौ स्यादसौम्यस्वरोऽस्वरः रवणः शब्दनो नांदीवादी नांदीकरः समौ ३७



Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जडोऽज्ञ एडमूकस्तु वक्तुं श्रोतुमशिक्षिते तूष्णींशीलस्तु तूष्णीको नग्नोऽवासा दिगंबरः ३८
निःकासितोऽवकृष्टः स्यादपध्वस्तस्तु धिक्कृतः आत्तगर्वोऽभिभूतः स्याद्दापितः साधितः स
मौ ३९ अधिक्षिप्तप्रतिक्षिप्तौ बद्धे कीलितसंयतौ आपन्न आपत्प्राप्तः स्यात्कांदिशी
को भयद्रुतः ४० आक्षारितः क्षारितोऽभिशस्ते संकसुकोऽस्थिरे व्यसनार्त्तोपरक्तौ द्वौ वि
हस्तव्याकुलौ समौ ४१ विक्लवो विह्वलः स्यात्तु विवशोऽरिष्टदुष्टधीः कश्यः कशार्हे संन
द्धे त्वाततायी वधोद्यते ४२ द्वेष्ये त्वक्षिगतो वध्यः शीर्षच्छेद्य इमौ समौ विष्यो विषेणा
यो वध्यो मुशल्यो मुशलेन यः ४३ शिश्विदानः कृष्णकर्मा चपलश्चिकुरः समौ दोषै

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ
७८

कद्रुकृघ्नोभागी निकृतस्त्वनृजुः शठः ४४ कर्णेजपः सूचकः स्यात् पिशुनो दुर्जनः खलः
नृशंसो घातुकः क्रूरः पापो धूर्त्तस्तु वंचकः ४५ अज्ञमूढयथाजातमूर्खवैधेयबालि
शाः कदर्यकृपणाक्षुद्रकिंपचानमितंपचाः ५६ निःस्वस्तु दुर्विधो दीनो दरिद्रो दुर्ग
तोपि सः वनीपको याचनको मार्गणो याचकार्थिनौ ५७ अहंकारवानहंयुः स्याच्छुभं रामः
युस्तु शुभान्वितः दिव्योपपादुका देवा नृगवाद्या जरायुजाः ५८ स्वेदजाः कृमिदंशा
द्याः पक्षिसर्पादयोण्डजाः इति जातिवर्गः १ ५९ उद्भिदस्तरुगुल्माद्या उद्भिदुद्भि राम
ज्जमुद्भिदं सुंदरं रुचिरं चारु सुषमं साधु शोभनं ६० कांतं मनोरमं रुच्यं मनोज्ञं

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मंजु मंजुलं तदासेचनकं तृप्तेर्नास्त्यंतो यस्य दर्शनात् ६१ अभीष्टेऽभीप्सितं हृद्यं दयितं वल्लभं प्रि
यं निकृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमाः ६२ कुपूयकुत्सितावद्यखेटगर्ह्याण
काः समाः मलीमसं तु मलिनं कच्चरं मलदूषितं ६३ पूतं पवित्रं मेध्यं च वीध्रं तु विमला
र्थकं निर्णिक्तं शोधितं मृष्टं निःशोध्यमनवस्करं ६४ असारं फल्गु शून्यं तु वशिकं तुच्छ
रिक्तके क्लीवे प्रधानं प्रमुखप्रवेकानुत्तमोत्तमाः ६५ मुख्यवर्य्यवरेण्याश्च प्रवर्होऽनवरा
र्ध्यवत् पराध्याग्र्यप्राग्रहरप्राग्र्याग्र्याग्रीयमग्रियं ६६ श्रेयान् श्रेष्ठः पुष्कलः स्यात्सत्त
मश्चातिशोभने स्युरुत्तरपदे व्याघ्रपुंगवर्षभकुंजराः ६७ सिंहशार्दूलनागाद्याः पुंसि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



ष्ठार्थगोचराः अप्राग्र्यं द्वयहीने द्वे अप्रधानोपसर्जने ६८ विशंकटं पृथु बृहद्विशालं पृथुलं मह
त् वड्रोरुविपुलं पीनपीव्नी तु स्थूलपीवरे ६९ स्तोकाल्पक्षुल्लकाः सूक्ष्मं श्लक्ष्णं दभ्रं कृशं तनुः
स्त्रियां मात्रा त्रुटिः पुंसि लवलेशकणाणवः ७० अत्यल्पेऽल्पिष्ठमल्पीयः कणीयोऽणीय
इत्यपि परःशताद्यास्ते येषां परा संख्या शतादिकात् ७१ गणनीयं गणेयं तु संख्याते ग
णितमथ समं सर्वं विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषं ७२ सम
ग्रं सकलं पूर्णमखण्डं स्यादनूनके घनं निरन्तरं सान्द्रं पेलवं विरलं तनुः ७३ समीपे
निकटासन्नसन्निकृष्टसनीडवत् सदेशाभ्याशसविधसमर्यादसवेशवत् ७४



Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उपकण्ठान्तिकाभ्यर्णाभ्यग्रा अप्यभितोव्ययं संसक्ते त्वव्यवहितमपदान्तरमित्यपि ७५
नेदिष्ठमन्तिकतमं स्याद्दूरं विप्रकृष्टकं दवीयश्च दविष्ठञ्च सुदूरं दीर्घमायतं ७६ वर्त्तु
लं निस्तलं वृत्तं बन्धुरन्तून्नतानतं उच्चप्रांशून्नतोदग्रोच्छ्रितास्तुङ्गेथ वामने ७७ न्यङ्नी
चखर्वह्रस्वाः स्युरवाग्रमवनतानतं अरालं वृजिनं जिह्ममूर्मिमत्कुञ्चितं नतं ७८
आविद्धं कुटिलं भुग्नं वेल्लितं वक्रमित्यपि ऋजावजिह्मप्रगुणौ व्यस्ते त्वप्रगुणाकुलौ ७९
शाश्वतस्तु ध्रुवो नित्यः सदातनसनातनः स्थास्नुः स्थिरतरस्थेया नेकरूपतया तु यः ८०
कालव्यापी स कूटस्थः स्थावरो जङ्गमेतरः चरिष्णु जङ्गमचरं त्रसमिङ्गं चराचरं ८१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ॰ ८१ चलनं कंपनं कंप्रं चलं लोलं चलाचलं तरलं चंचलं चैव पारिप्लवपरिप्लवे ७२ अतिरिक्तः समधि
कोदृढसंधिस्तु संहतः कक्खटं कठिनं क्रूरं कठोरं निष्ठुरं दृढं ७३ जठरं मूर्तिमन्मूर्तं प्रवृद्धं
प्रौढमेधितं पुराणे प्रतनप्रत्नपुरातनचिरंतनाः ७४ प्रत्यग्रोभिनवो नव्यो नवीनो नूत
नो नवः नूत्नश्च सुकुमारं तु कोमलं मृदुलं मृदु ७५ अन्वगन्वक्षमनुगेनुपदं क्लीवमव्ययं
प्रत्यक्षं स्यादैन्द्रियकमप्रत्यक्षमतीन्द्रियं ७६ एकतानोनन्यवृत्तिरेकाग्रैकायनावपि
अप्येकसर्ग एकाग्र्योप्येकायनगतोपि सः ७७ पुंस्यादिः पूर्वपौरस्त्यप्रथमाद्या अथास्त्रि रामः
यां अंतो जघन्यं चरमं अंत्यपाश्चात्यपश्चिमं ७८ मोघं निरर्थकं स्पष्टं स्फुटं प्रव्यक्तमुल्बणं ८१

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एवं साधारणंतु सामान्यमेकाकी त्वेकएककः ८९ भिन्नार्थका अन्यतर एकत्वमेनतरावपि
उच्चावचं नैकभेदमुच्चंडमविलंबितं ९० अरुंतुदस्तु मर्मस्पृग बाधंतु निरर्गलं प्रसव्यं प्रतिकू
लं स्यादपसव्यमपष्टुव ९१ वामं शरीरं सव्यं स्यादपसव्यंतु दक्षिणं संकटं नातु संबाधः कलि
लं गहनं समे ९२ संकीर्णं संकुलाकीर्णं मुंडितं परिवापितं ग्रथितं ग्रंथितं दृब्धं विसृतं विस्तृ
ततं ९३ अंतर्गतं विस्मृतं स्यात्प्राप्तप्रणिहिते समे वेल्लितप्रेंखिताधूतचलिताकंपिते धुते ९४
नुन्ननुत्तास्तनिष्ठ्यूताविद्धक्षिप्तेरिताः समाः परिक्षिप्तंतु निवृतं मूषितं मुषितार्थकं ९५ प्रवृद्धप्र
सृते न्यस्तनिसृष्टे गुणिताहते निर्दिग्धोपचिते गूढगुप्ते गुंठित रूषिते ९६ द्रुतावदीर्णेउद्गू

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



र्गौंघते काम्यितभिलषिते घ्राणघ्राते दिग्धलिप्ते समुदक्तोद्धृते समे ९७ वेष्टितं स्याद्वलयितं संवीतं
रुद्धमावृतं रुग्णं भुग्नेथ निशितक्ष्णुतशातानि तेजिते ९८ स्याद्विनाशोन्मुखं पक्वं ह्रीणह्रीतौ तु ल
ज्जिते वृत्ते तु वृत्तव्यावृत्तौ संयोजित उपाहितः ९९ प्राप्यं गम्यं समासाद्यं स्यन्नं रीणं स्नुतं स्रुतं
संगूढः स्यात्संकलितोऽवगीतः ख्यातगर्हणः १०० विविधः स्याद्बहुविधो नानारूपः पृथग्विधः
अवरीणो धिक्कृतः स्यादपध्वस्तोऽवचूर्णितः १ अनायासकृतं फांतं स्वनितं ध्वनितं समे ब
द्धे संदानितं मूतमुद्दितं संदितं सितं २ निष्पक्वं क्वथितं पाके क्षीराज्यपयसां शृतं निर्वाणो मु
निवह्न्यादौ निर्वातस्तु गतेऽनिले ३ पक्वं परिणते गूनं हन्ने मीढं तु मूत्रिते पुष्टे तु पुषितं सोढे



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भ्रांतमुद्वांतमुज्झिते ४ दांतस्तुदमितेशांतःशमितेप्रार्थितेऽर्दितः ज्ञप्तस्तुज्ञापितेछन्नश्छादिते
पूजितेञ्चितः ५ पूर्णस्तुपूरितेक्लिष्टःक्लिशितेवसितेसितः प्रुष्टप्लुष्टोषितादग्धेतष्टत्वष्टौ
तनूकृते ६ वेधितच्छिद्रितौविद्धेविन्नवित्तौविचारिते निःप्रभेविगतारोकौविलीनेविद्रुत
द्रुतौ ७ सिद्धेनिर्वृत्तनिष्पन्नौदारितेभिन्नभेदितौ ऊतंस्यूतमुतंचेतित्रितयंतंतुसंतते
८ स्यादर्हिते [illegible] नमसितमपचायितार्चितापचितं वरिवसितवरिवस्यितमुपासि
तमुपासितंचोपचरितंच ९ संतापितसंतप्तौधूपितधूपायितौचदूनश्च हृष्टेमत्तस्तृप्तः
प्रह्लन्नःप्रमुदितःप्रीतः १० छिन्नंछातंलूनंकृत्तंदातंदितंछितंवृक्णं स्रस्तंध्वस्तंभ्रष्टंस्कन्नंप

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

अम॰

तितंस्नुतंगलितं ११ लब्धंप्राप्तंविन्नंभावितमासादितंचभूतंच अन्वेषितंगवेषि
तमन्विष्टंमार्गितंमृगितं १२ आर्द्रंसार्द्रंक्लिन्नंतिमितंस्तिमितंसमुन्नमुत्तंच त्रा
णंत्रातंरक्षितमवितंगोपायितंगुप्तंच १३ अवगणितमवमतावज्ञातेभ्यव
मानितंचपरिभूते त्यक्तंहीनंविधुतंसमुज्झितंधूतमुत्सृष्टं १४ उक्तंभाषितमु
दितंजल्पितमाख्यातमभिहितंलपितं बुद्धंबुधितंमनितंविदितंप्रतिपन्नमव
सितावगते १५ ऊरीकृतमुररीकृतमंगीकृतमाश्रुतंप्रतिज्ञातं संगीर्णविदित
संश्रुतसमाहितोपश्रुतोपगतं १६ ईलितशस्तपणायितपणफितपनिता

तृः

CC-0. Digitized by eGangotri and MIDF- Delhi

यितपनितपनितानि अपगीर्णवर्णिताभिष्टुतेडितानि स्तुतार्थानि १७
भक्षितचर्वितलिप्तप्रत्यवसितगिलितखादितप्सातं अभ्यवहृतान्नजग्धग्लस्त
ग्रस्ताशितं भुक्ते १८ क्षेपिष्ठक्षोदिष्ठप्रेष्ठवरिष्ठस्थविष्ठबंहिष्ठाः । क्षिप्रक्षुद्रा
भीप्सितपृथुपीवरबहुप्रकर्षार्थाः १९ साधिष्ठद्राघिष्ठस्फेष्ठगरिष्ठह्रसिष्ठ
वृन्दिष्ठाः बाढव्यायतबहुगुरुवामनवृन्दारकातिशये २० इति विशेष्यनिघ्न
वर्गः २ प्रकृतिप्रत्ययार्थाद्यैः संकीर्णे लिंगमुन्नयेत् कर्मक्रिया तत्सातत्ये ग
म्ये स्युरपरस्पराः १८ साकल्यासंगवचने पारायणपरायणे यदृच्छा स्वैरिता हे

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम॰ ि [illegible] तुभूत्यात्ता स्याद्विलक्षणं १९ शमथस्तु शमः शांतिर्दान्तिस्तु दमथोदमः अवदा
८४ नं कर्मवृत्तं काम्यदानं प्रवारणं २० वशक्रिया संवदनं मूलकर्मतु कार्मणं विधूननं
विधुननं तर्पणं प्रीणनावनं २१ पर्याप्तिः स्यात्परित्राणं हस्तवारणमित्यपि सेवनं
सीवनं स्यूतिर्विदरः स्फुटनं भिदा २२ आक्रोशनमभिषंगः संवेदो वेदना न ना संमू
र्छनमभिव्याप्तिर्याच्ञाभिक्षार्थनार्दना २३ वर्धनं छेदनेथ द्वे आनंदनसभाजने
आप्रछनमथाम्नायः संप्रदायः क्षये क्षिया २४ ग्रहे ग्राहो वशः कांतौ रक्षणस्त्रा रामः
णो रणः क्वणे व्यधो व्यधे पचा पाके हवो हूतौ वरो वृतौ २५ ओषः प्लोषे नयो ८४

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नायेस्यानिर्जीर्णोर्भ्रमो भ्रमौ स्फातिर्वृद्धौ प्रथा ख्यातौ स्पृष्टिः पृक्तौ स्रवः स्रवे २६
विधा समृद्धौ स्फुरणं स्फुरणा प्रमितौ प्रमा प्रसूतिः प्रसवे श्च्योते प्राघारः क्लमथः क्ल-
मः २७ उत्कर्षोतिशये संधिः श्लेषे विषय आश्रये क्षिपायां क्षेपणं गीर्णि गिरौ गि-
रणमुद्यमे २८ उंनाय उंनये श्रायः श्रयणे जयने जयः निगादो निगदो मादो मद
उद्वेग उद्भ्रमे २९ विमर्दनं परिमले भ्युपपत्तिरनुग्रहः निग्रहस्तद्विरुद्धः स्यादभियो-
गस्त्वभिग्रहः ३० मुष्टिबंधस्तु संग्राहो डिम्बे डमरविप्लवौ बंधनं प्रसितिश्चारः स्पर्शः
स्प्रष्टोपतप्तरि ३१ निकारो विप्रकारः स्यादाकारस्त्विंग इंगितं परिणामो विकारे

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम देसमेविहृतिर्विक्रिये ३२ अपहारस्त्वपचयः समाहारः समुच्चयः प्रत्याहार उपादानं विहारस्तु
८४ परिक्रमः ३३ अभिहारोभिग्रहणं निर्हारोभ्यवकर्षणं अनुहारोनुकारः स्यादर्थस्यापगमे व्य
यः ३४ प्रवाहस्तु प्रवृत्तिः स्यात्प्रवहो गमनं वहिः विघासो वियमो यामो यमः संयामसं
यमौ ३५ हिंसाकर्माभिचारः स्याज्जागर्या जागरा द्वयोः विघ्नोंतरायः प्रत्यूहः स्यादुपघ्नोंति
काश्रये ३६ निर्वेश उपभोगः स्यात्परिसर्पः परिक्रिया। विधुरं तु प्रविश्लेषो भिप्रायश्छंद
आशयः ३७ संक्षेपणं समसनं पर्यवस्थाविरोधनं परिसर्या परीसारः स्यादास्यात्वास राम.
नास्थितिः ३८ विस्तारो विग्रहो व्यासः स च शब्दस्य विस्तरः स्यान्मर्दनं संवहनं विनाशः स्याद ८५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दर्शनं ३९ संस्तवः स्यात्परिचयः प्रसरस्तु विसर्पणं नीवाकस्तु प्रयामः स्यात् सन्निधिः सन्नि
कर्षणं ४० लवोभिलावोलवने निष्पावः पवनेपवः प्रस्तारः स्यादवसरस्त्रसरः सूत्रवेष्ट
नं ४१ प्रजनः स्यादुपसरः प्रश्रयप्रणयौ समौ धीशक्तिर्निःक्रमोस्त्रीतु संक्रमोदुर्गसंचरः ४२
प्रत्युत्क्रमः प्रयोगार्थः प्रक्रमः स्यादुपक्रमः स्यादभ्यादानमुद्घात आरंभः संभ्रमस्त्वरा। ४२
प्रतिबंधः प्रतिष्टंभोवनायस्तु निपातनं उपलंभस्त्वनुभवः समालंभोविलेपनं ४३ विप्र
लंभोविप्रयोगोविलंभस्त्वतिसर्जनं विश्रावस्तु प्रतिख्यातिरवेक्षाप्रतिजागरः ४४ नि
पाठनिपठौपाठेतेमस्तेमौसमुंदने आदीनवाश्रवौक्लेशेमेलकेसंगसंगमौ ४५ संवी

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम॰
७६

क्षणंविवयनंमार्गणंमृगणामृगः परिरंभःपरिष्वंगःसंश्लेषउपगूहनं ४६ निर्वर्णनंतुनिध्यानंद
र्शनालोकनेक्षणं प्रत्याख्यानंनिरसनंप्रत्यादेशोनिराकृतिः ४७ उपशायोविशायश्चपर्यायश
यनार्थकौ अर्तनंचऋतीयाचघृणीयाचघृणार्थके ४८ स्याद्व्यत्यासोविपर्यासोव्यत्ययश्चविप
र्यये पर्ययोतिक्रमस्तस्मिन्नतिपातउपात्ययः ४९ प्रेषणंयत्समाहूयतत्रस्यात्प्रतिशासनं
ससंस्तावःक्रतुषुयास्तुतिभूमिर्द्विजन्मनां ५० निघाद्युत्क्षिप्यतेयत्रकाष्ठेकाष्ठंसउद्घनः स्तंब
घ्नस्तंबघनःस्तंबोयेननिहन्यते ५१ आविधोविध्यतेयेनतत्रविष्वक्समेनिघः उत्कारश्च रामः
निकारश्चद्वौधान्योत्क्षेपणार्थकौ ५२ निगारोद्गारविक्षारोद्गारक्षगारणादिषु आरत्यवर ७६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तिविरामस्तूपरामेथास्त्रियांतुनिष्ठेवः ५३ निष्ठ्यूतिनिष्ठेवननिष्ठीवनमित्यभिन्नानि जवनेजू
तिः सातिस्त्ववसानेस्यादथज्वरोजूर्त्तिः ५४ उदजस्तुपशुप्रेरणमकरणिरित्यादयःशापे गो
त्रांतेभ्यस्तस्यवृंदमित्यौपगवकादिकं ५५ आपूपिकंशाष्कुलिकमेवमाद्यमचेतसां माण
वानांतुमाणव्यंसहायानांसहायता ५६ हल्याहलानांब्राह्मण्यंवाडव्यंतुद्विजन्मनां द्वेपर्शु
कानांपृष्ठानांपार्श्वंपृष्ठ्यमनुक्रमात् ५७ खलानांखलिनीखल्याप्यथमानुष्यकंनृणांग्रा
मताजनताधूम्यापाश्यागल्यापृथक्पृथक् ५८ अपिसाहस्रकारीषवार्मणाथर्वणादि
कं ५९ इतिसंकीर्णवर्गः ३ नानार्थाःकेपिकांतादिवर्गेष्वेवात्रकीर्त्तिताः भूरिप्रयोगा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम
८७

येषेत्तुपर्यायेष्वपिनेष्टुते ६० आकाशेत्रिदिवेनाकोलोकस्तुभुवनेजने पद्येयशसिवश्लोकः
शरेखड्गेवसायकः ६१ जंबुकौक्रोष्टुवरुणौपृथुकौचिपिटार्भकौ आलोकोदर्शनोद्योतौभे
रीपटहमानकौ ६२ उत्संगचिह्नयोरंकः कलंकोंकापवादयोः तक्षकोनागवर्द्धक्योरर्कः
स्फटिकसूर्ययोः ६३ मारुतेवेधसिब्रध्नेपुंसिकः कंशिरोंबुनोः स्यात्पुलाकस्तुछधान्ये
संक्षेपेभक्तसिक्थके ६४ उलूकेकरिणःपुच्छमूलोपान्तेचपेचकः कमण्डलौचकर
कःसुगतेचविनायकः ६५ किष्कुर्हस्तेवितस्तौचशूककीटेचवृश्चिकः प्रतिकूलेप्र रामः
तीकस्त्रिष्वेकदेशेतुपुंस्ययं ६६ स्याद्भूतिकंतुभूनिम्बेकत्तृणेभूस्तृणेपिच ज्योति ८७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वायां च घोषे चक्रोशानक्वथक द्फले ६७ सिते च खदिरे सोमवल्कः स्यादथ सिह्लके ति
लकल्के च पिण्याकौ बाह्लीकं रामठेपि च ६८ महेंद्रगुग्गुलूलूकव्यालग्राहिषु कौशिकः रु
क्तापशंकास्वातंकः स्वल्पेपि क्षुद्रकास्त्रिषु ६९ जैवात्तृकः शशांकेपि खुरेप्यश्वस्य वर्त्मकः
व्याघ्रेपि पुंडरीको नायवान्यामपि दीप्यकः ७० शाल्मावृकाः कपिक्रोष्टुश्वानः स्वर्णोपि
गैरिकं पीडार्थेपि व्यलीकं स्यादलीकं त्वप्रियेऽनृते ७१ शीलान्वयावनूके द्वे शल्के शक
लवल्कले साष्टेशते सुवर्णानां हेम्नुराभूषणेपले ७२ दीनारेपि च निष्कोस्त्री कल्कोस्त्री
समलैनसोः दंभेप्यथ पिनाकोस्त्री शूलशंकरधन्वनोः ७३ धेनुका तु करेण्वां च मेघ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



जालेवकालिका कारिकायातनार्त्योः कर्णिकाकर्णभूषणे ७४ करिहस्तांगुलौपद्मवीजको
ष्यांत्रिष्वन्तरे वृंदारकौरूपिमुख्यावेकेमुख्यान्यकेवलाः ७५ स्याद्दांभिकेकौक्कुटिकोयश्चादू
रेरितेक्षणः ललाटिकःप्रभोर्भालदर्शीकार्याक्षमश्चयः ७६ भूम्न्यक्लिनंवलयंवक्रेभ्रुक
टकोऽस्त्रियां सूच्यग्रेक्षुद्रशत्रौचरोमहर्षेचकंटकः ७७ पांताः मयूरस्त्विट्कःज्वालास्व
लिवाणौशिलीमुखौ शंखोनिधौललाटास्थ्निकम्बौनस्त्रीन्द्रियेपिखं घृणिज्वालेअपिशिखे
खांताः शैलवृक्षौनगावगौ। ७८ आशुगौवायुविशिखौशरार्कविहगाःखगाः पतंगौप
क्षिसूर्यौविपूगःक्रमुकवृंदयोः ७९ पद्मानोपिमृगावेगःप्रवाहजवयोरपि परागःकौसुमे



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रेणौस्त्रानीयाद्रेरजस्यपि ८० गजेपिनागमातंगावपांगस्तिलकेपिच सर्गःस्वभावनिर्मो
क्षनिश्चयाध्यायसृष्टिषु ८१ योगःसन्नहनोपायध्यानसंगतियुक्तिषु भोगःसुखेस्त्र्यादि
भृतावहेश्चफणकाययोः ८२ चातकेहरिणेपुंसिसारंगःशवलेत्रिषु कपौचप्लवगःशा
पेत्वभिषंगःपराभवे ८३ यानाद्यंगेयुगःपुंसियुगंयुग्मेकृतादिषु स्वर्गेषुपशुवाग्वज्रदि
ङ्नेत्रघृणिभूजले ८४ लक्ष्यदृष्ट्यास्त्रियांपुंसिगौर्लिंगंचिह्नशेफसोः शृंगंप्राधान्यसान्वो
श्चवरांगंमूर्द्धगुह्ययोः ८५ भगःश्रीकाममाहात्म्यवीर्ययत्नार्ककीर्त्तिषु घांताः परिघः
परिघातनेस्त्रेप्योघोवृंदेंभसांरयः ८६ मूल्येपूजाविधावर्घोंहोदुःखव्यसनेष्वघं त्रिषु

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम
४१

ष्वल्पे लघुः काचाः शिक्यमृद्भेददृग्रुजः ८७ विपर्यासे विस्तरे च प्रपंचः पावके शुचिः। मास्यमा
त्ये चात्युपधे पुंसि मेध्ये सिते त्रिषु ८८ अभिष्वंगे स्पृहायां च गभस्तौ च रुचिः स्त्रियां चांताः
केकिताक्ष्यौ अहिभुजौ दंतविप्राण्डजा द्विजाः ८९ अजाविष्णुहरछागा गोष्ठाध्वनिवहा व्रजाः
धर्मराजौ जिनयमौ कुंजो दंतेऽपि न स्त्रियां ९० बलजे क्षेत्रपूर्द्वारे बलजा वल्गुदर्शना। समे
क्ष्मांशे रणेऽप्याजिः प्रजा स्यात्संततौ जने ९१ अब्जौ शंखशशांकौ च स्वके नित्ये निजं त्रिषु
जांताः पुंस्यात्मनि प्रवीणे तु क्षेत्रज्ञो वाच्यलिंगकः ९२ संज्ञा स्याच्चेतना नाम हस्ताद्यैश्चार्थ
सूचना ञांताः काकेभगंडौ करटौ गजगण्डकटी कटौ ९३ शिपिविष्टस्तु खलतौ दुश्च

रामः
४१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मीशामहेश्वरे देवीशाल्मिन्यपितस्त्वादिष्टं दैवेपिनद्वयोः ९४ रसेकटुःकटुकार्ये त्रिषुम
त्सरतीक्ष्णयोः रिष्टंक्षेमाशुभाभावेष्वरिष्टेतुशुभाशुभे ९५ मायानिश्चलयंत्रेषुकैत
वानृतराशिषु अयोघनेशैलशृंगेसीरांगेकूटमस्त्रियां ९६ सूक्ष्मेलायांत्रुटिःस्त्रीस्या
त्कालेल्पेसंशयेपिच अत्युत्कर्षाश्रयःकोष्ठोमूलेलग्नकचेजटा ९७ व्युष्टिःफलेस
मृद्धौचदृष्टिर्ज्ञानेक्षिदर्शने इष्टिर्यागेच्छयोःसृष्टेनिश्चितेबहुलेत्रिषु ९८ कष्टेतुकृच्छ्र
गहनेदक्षामंदागतेष्वतु पटुर्वोवाच्यलिंगोच पण्याः नीलकण्ठःशिवेप्यथ ९९ पुंसि
कोष्ठांतर्जठरं कुशूलोंतर्गृहंतथा निष्ठानिष्पत्तिनाशांताःकाष्ठोत्कर्षेस्थितोदिशि १००

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



त्रिषुज्येष्ठोतिशस्तेपि कनिष्ठोतियुवाल्पयोः डांताः दण्डोस्त्री लगुडेपि स्याद्गुडो गोले
क्षुपाकयोः १ सर्पमांसात्पशूव्याडौ गोभूवाचस्त्विडाइलाः क्ष्वेडा वंशशलाकापि ना
डीकालेपिषट्क्षणे २ काण्डोस्त्री दण्डवाणार्ववर्गावसरवारिषु स्याद्भाण्डमश्वा
भरणेमत्रेमूलवणिग्धने ३ ढांताः भृशप्रतिज्ञयोर्बाढं प्रगाढं भृशकृच्छ्रयोः
शक्तस्थूलौत्रिषुदृढौ व्यूढौ विन्यस्तसंहतौ ४ णांताः भ्रूणोर्भके स्त्रीगर्भेवाणो
बलिसुतेशरे कणोतिसूक्ष्मेधान्यांशे संघातेप्रमथेगणः ५ पणो द्यूतादिषूत्सृष्टे
भृतौमूल्येधनेपिच मौर्व्यांद्रव्याश्रितेसत्त्वशुक्लसंध्यादिकेगुणः ६ निर्व्यापारस्थि



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मौ कालविशेषोत्सवयोः क्षणः वर्णो द्विजादौ शुक्लादौ स्तुतौ वर्णं तु वाक्षरे ७ अरुणोभा
स्करे सूते वर्णभेदे पि च त्रिषु स्थाणुः सर्वोप्यथ द्रोणः काकेप्याजौ रवे रणः ८ ग्रामणी
र्नापिते पुंसि श्रेष्ठे ग्रामाधिपे त्रिषु ऊर्णा मेषादिलोम्नि स्यादावर्ते चान्तरा भ्रुवोः ९
हरणी स्यान्मृगी हेमप्रतिमा हरिता च या त्रिषु पाण्डौ च हरिणः स्थूणा स्तंभेपि वेश्मनः १०
तृष्णे स्पृहापिपासे द्वे जुगुप्साकरुणे घृणे वणिक्पथे च विपणिः सुरा प्रत्यक् च वारुणी
करेणुरिभ्यां स्त्री नेभे द्रविणं तु बलं धनं शरणं गृहरक्षित्रोः श्रीपर्णं कमलेपि च १२
विषाभिमरलोहेषु तीक्ष्णं क्लीबे खरे त्रिषु प्रमाणं हेतुमर्यादाशास्त्रेयत्ताप्रमातृषु १३

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

अम: करणं साधकतमं क्षेत्रगात्रेंद्रियेष्वपि प्राण्युत्पादे संसरणो ऽसंबाधचमूगतौ १४
२१ घण्टापथेथ वांतान्ने समुद्गरणमुन्नये अतस्त्रिषु विषाणं स्यात् पशुश्रृंगेभदंतयोः
१५ प्रवणं क्रमनिम्नोर्व्यां प्रह्वे ना तु चतुष्पथे संकीर्णौ निचिताशुद्धा वीरिणं शून्यमूषरं घ
णांता: देवसूर्यौ विवस्वंतौ सरस्वंतौ नदार्णवौ पक्षितार्क्ष्यौ गरुत्मंतौ शकुंतौ भासप
क्षिणौ १७ अग्न्युत्पातौ धूमकेतू जीमूतौ मेघपर्वतौ हस्तौ तु पाणिनक्षत्रे मरुतौ प
वनामरौ १८ यंता हस्तिपके सूते भर्ता धातरि पोष्टरि यानपात्रे शिशौ पोतः प्रेतः प्रा अम:
ण्यंतरे मृते १९ ग्रहभेदे ध्वजे केतुः पार्थिवे तनये सुतः स्थपतिः कारुभेदे पि भूभृद्भू २१

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मिथरेनृपे २० मूर्द्धाभिषिक्तो भूपेपि ऋतुस्त्रीकुसुमेपि च विश्वावप्याजितात्मानौ सुत
स्त्वष्टरिसारथौ २१ व्यक्तः प्राज्ञेपि दृश्यांता उभेशाक्वाजिदर्शने श्वता स्यात्सारथौ वाः स्वेक्ष
त्रियायां च भूभृदजे २२ कृतांतः स्यात्सकरणे प्रकारे कार्त्स्न्यवार्त्तयोः आनर्त्तः समरे नृत्य
स्थाननीवृद्विशेषयोः २३ कृतांतो यमसिद्धांतदैवाकुशलकर्मसु श्लेष्मादि रस
रक्तादिमहाभूतानि तद्गुणाः इंद्रियाण्यश्मविकृतिः शब्दयोनिश्च धातवः कक्षांतरे
पि शुद्धांतो नृपस्यासर्वगोचरे २५ कासूसामर्थ्ययोः शक्तिर्मूर्तिः काठिन्यकाययोः वि
स्तारवल्ल्योर्व्रततिर्वसती रात्रिवेश्मनोः २६ क्षयार्चयोरपचितिः सातिर्दानावसानयोः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम॰ आर्त्तिः पीडाधनुः कोघो जातिः सामान्यजन्मनोः २७ प्रचारः स्यंदयोरीतिरीतिर्डिंवप्र
९२ वासयोः उदयेधिगमे प्राप्तिस्त्रेतात्वग्नित्रयेयुगे २८ वीणाभेदेपि महती भूतिर्भस्मनि
संपदि नदीनगर्योर्नागानां भोगवत्यथसंगरे २९ संगेसभायां समितिः क्षयवासा
वपिक्षिती रवेरर्चिश्च शस्त्रं च वह्निज्वाला च हेतयः ३० जगती जगतीछंदोविशेषे
पिक्षितावपि पंक्तिश्छंदो पिदशमं स्यात्प्रभावेपि चायति ३१ पत्तिर्गतौ च मूलेतु
पक्षतिः पक्षभेदयोः प्रकृतिर्योनिलिंगे च कैशिक्याद्याश्च वृत्तयः ३२ सिकताः स्यु रामः
वालिकापि वेदे श्रवसि च श्रुतिः वनिता जनितात्यर्थानुरागी या च योषिति ३३ ९२

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गुप्तिः क्षितिव्युदासेपि धृतिर्धारणधैर्ययोः बृहती क्षुद्रवार्त्ताकी छंदोभेदे महत्यपि २४ वासि
ता स्त्रीकरिण्योश्च वार्त्ता वृत्तौ जनश्रुतौ वार्त्तं फल्गुन्यरोगे च त्रिष्वप्सु च घृतामृते २५ कलधौ
तं रूप्यहेम्नोर्निमित्तं हेतुलक्ष्मणोः श्रुतं शास्त्रावधृतयोर्युगपर्याप्तयोः कृतं २६ अत्या
हितं महाभीतिः कर्म जीवानपेक्षि च युक्ते क्ष्मादावृते भूतं प्राण्यतीते समे त्रिषु २७ वृत्तं प
द्ये चरित्रे त्रिष्वतीते दृढनिस्तले महद्राज्यं चावगीतं जन्ये स्याद्गर्हिते त्रिषु २८ श्वेतं रूप्येपि र
जतं हेम्नि रूप्ये सिते त्रिषु त्रिष्वितो जगदिंगेपि रक्तं नील्यादिरागि च २९ अवदातः सिते पी
ते शुद्धे बद्धार्जुनौ सितौ युक्तेतिसंस्कृते मर्षिण्यभिनीतोथ संस्कृतं ३० कृत्रिमे लक्षणोपेते

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



प्यनंतोन वधावपि ख्यातेहष्वे प्रतीनेभिजानत्क्रकलजेत्कुवे ८१ विविक्तो पूर्नविजनोमूर्छि
तोमूछमोछुयोः वैस्वान्नपत्तपौभुत्कौ श्वितीधवलमेवको ८२ सत्वेसाधौविद्यमानेप्रशस्ते
भ्यार्हितेवसत प्रस्तुतः पूजितेगानमभिष्टुक्तेग्रतः कृते ८३ निवातावाश्रयावातौशस्त्रा
भेद्यंचवर्मयत् जातोन्नेप्रबुद्धाः स्युरुच्छ्रिताद्यपिताम्तमी ८४ आविष्टोघनोसंनाआदृ
तौसादरार्चितौ तांताः अर्थोभिधेयरैवस्तुप्रयोजननिवृत्तिषु ८५ निपानागमयोस्तीर्थ
मृषिजुष्टजलेगुरौ समर्थस्त्रिषुशक्तिस्थेसंबद्धार्थेहितेपिच ८६ दशमीस्थौक्षीणरागा
वृद्धौवीधापदव्यपि अस्थानीयत्नयोनास्थाप्रस्थोस्त्रीमानमानयोः ८७ शासवद्रविणयो



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्रंथः संस्थाचारेस्थितौमृतौ भ्रांताः अभिप्रायवशौछंदावब्दौजीमूतवत्सरौ ४८ अपवादौतु
निंदाज्ञेदायादौसुतबांधवौ पादारश्म्यंघ्रितुर्यांशाश्चंद्राग्न्यर्कास्तमोनुदः निर्वादोजनवादेपि
शादोजंबालशष्पयोः आरावेरुदितेप्याप्तंपर्याक्रंदेदारुणोरणे ५० स्यात्प्रसादोनुरोधेपिसू
दःस्याद्व्यंजनेपिच गोष्ठाध्यक्षेपिगोविंदोहर्षेप्यामोदवन्मदः ५१ प्राधान्येराजलिंगेचवृषां
गेककुदोस्त्रियां स्त्रीसंविज्ज्ञानसंभाषाक्रियाकाराजिनामसु ५२ धर्मेरहस्युपनिषत्स्यादृ
तौवत्सरेशरत् पदंव्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुषु ५३ गोष्पदंसेवितेमानेप्रतिष्ठा
कृत्यमास्पदं त्रिष्विष्टमधुरौस्वादूमृदूचातीक्ष्णकोमलौ ५४ मूढाल्पापटुनिर्भाग्यामंदाः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम·
२४
स्युर्वैतृशारदौ प्रत्यग्राप्रतिभौ विद्वत्सुप्रगल्भौ विशारदौ ५५ दांताः व्यामो वटश्च न्यग्रोधा
वुत्सेधः काय उंनतिः पर्याहारश्च मार्गश्च विवधौ वीवधौ च तौ ५६ परिधिर्यज्ञियतरोः शाखाया
मुपसूर्यके बंधनं व्यसनं चेतः पीडाधिष्ठानमाधयः ५७ स्युः समर्थननीवाकनियमाश्च समा
धयः दोषोत्पादेनुबंधः स्यात्प्रकृत्यादिविनश्वरे ५८ मुख्यानुयायिनि शिशौ प्रकृतस्यानु
वर्तने विधुर्विष्णौ चंद्रमसि परिच्छेदे बिलेऽवधिः ५९ विधिर्विधाने दैवेपि प्रणिधिः प्रार्थ
ने च रे बुधवृद्धौ पंडितेपि स्कंधः समुदयेपि च ६० देशे नदीविशेषेब्धौ सिंधुर्ना सरिति स्त्रियां रामः
विधा विधौ प्रकारे च साधू रम्येपि च त्रिषु ६१ वधूर्जाया स्नुषा स्त्री च सुधा लेपोऽमृतं स्नुही सं २४

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धाभृतिस्तामर्यादाभ्रभ्रामसंभ्रमयः स्पृ ला ६२ मधुमधेपुष्परसे क्षौद्रेप्यंधंतमस्यपि
अतस्त्रिभुसमुच्चयौ पंडितंमन्यगार्वितौ ६३ ब्रह्मबंधुरधिक्षेपे निर्देशे थावलंबितः अ
अविदूरेप्यवष्टंभौ प्रसिद्धौ ख्यातभूषितौ ६४ धांताः ततशैलौ शिखरिणौ शिखिनौ व
ह्निबर्हिणौ प्रतिपन्नावुभौ लिप्सोपयुक्तव्यवसादिनौ ६५ दोष्मारथिहपारोहौ वाजिनोश्वे
षुपक्षिणः सूर्यवांहू चित्रभानूभानूरश्मिदिवाकरौ ६६ भूतात्मानौ धातृदेहौ मूर्खनीचौ
पृथक्जनौ ग्रावाणौ शैलपाषाणौ पत्रिणौ शरपक्षिणौ ६७ कुलेप्यभिजनो जन्मभूम्या
मप्यथहायनाः वर्षार्चिर्व्रीहिभेदाः स्युश्चंद्राग्न्यर्कविरोचनाः ६८ केशोपि वृजिनो विष्व

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम॰ कर्मार्कसुरशिल्पिनोः आत्मायत्नोधृतिर्बुद्धिः स्वभावोब्रह्मवर्ष्मच ६९ शक्रोघातुकमत्तेभोव
९५ र्षुकाब्दोघनोघनाः अभिमानोर्थादिदर्पेज्ञानेप्रणयहिंसयोः ७० घनोमेघेमूर्तिगुणेत्रि
ष्वमूर्तेनिरंतरे इनः सूर्येप्रभौराज्ञिमृगांकेक्षत्रियेनृपे ७१ वाणिन्यौनर्तकीमेतेस्रवंत्या
मपिवाहिनी ह्लादिन्यौवज्रतडितौवंदायामपिकामिनी ७२ त्वक्‌देहयोरपितनूः सूनोधो
जिह्विकापिच क्रतुविस्तारयोरस्त्रीवितानंत्रिषुतुच्छके ७३ मंदेथकेतनंकृत्येकेतावुपनि
मंत्रणे वेदतत्त्वंतपोब्रह्मब्रह्माविप्रः प्रजापतिः ७४ उत्सादनेचहिंसायांसूदनेचापिगं समं॰
धनं आतंचनंप्रतीवापजवनाप्यायनार्थकं ७५ व्यंजनंलांछनंश्मश्रुनिष्ठानावयवेष्वपि ९५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्यात्कौलीनंलोकवादेयुद्धेपश्वहिपक्षिणां ७७ स्यात्तुपानंनिःशरणोवनभेदेप्रयोजने अ
वकाशेस्थितौस्थानंक्रीडादावपिदेवनं ७८ उत्थानंपौरुषेतंत्रेसंनिविष्टोद्गमेपिच व्यु
त्थानंप्रतिरोधेचविरोधाचरणेपिच मारणेमृतसंस्कारेगतौद्रव्यर्थदापने निर्वर्त्तनोप
करणानुव्रज्यासुचसाधनं ८० निर्यातनंवैरशुद्धौदानेन्यासार्पणेपिच व्यसनंविप
दिभ्रंशेदोषेकामजकोपजे ८१ पक्ष्माक्षिलोम्निकिंजल्केतन्त्वाद्यंशेप्यणीयसि तिथि
भेदेक्षणेपर्ववर्त्मनेत्रच्छदेस्त्रियां ८२ अकार्यगुह्येकौपीनंमैथुनंसंगतौरते प्रधानंपर
मात्माधीः प्रज्ञानंबुद्धिचिह्नयोः ८३ प्रसूनंपुष्पफलयोर्निधनंकुलनाशयोः क्रंदनंरोद

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम: नोः कानने वर्ष्मदेहप्रमाणयोः ॥७४॥ गृहदेहत्विट्प्रभावा धामान्यथ चतुष्पथे संनिवेशे
२६ च संस्थानं लक्ष्म चिह्नप्रधानयोः ॥७५॥ आच्छादने संपिधानमपवारणमित्युभे आराधनं
साधने स्यादवाप्तौ तोषणेऽपि च ॥७६॥ अधिष्ठानं चक्रपुरप्रभावाध्यासनेष्वपि रत्नं स्वजाति
श्रेष्ठेऽपि वने सलिलकानने ॥७७॥ तलिनं विरले स्तोके वाच्यलिङ्गमथो त्रिषु समानाः सत्
समैकेषु पिशुनौ खलसूचकौ ॥७८॥ हीनन्यूनावूनगर्ह्यौ वेगिशूरौ तरस्विनौ अभिपन्नो
ऽपराद्धोऽभिग्रस्तव्यापद्गतावपि ॥७९॥ इति नान्ताः कलापो भूषणे बर्हे तूणीरे संहते राम:
ऽपि च परिच्छदे परीवापः पर्युप्तौ सलिलस्थितौ ॥८०॥ गोधुग्गोष्ठपती गोपौ हरविष्णू वृषा २६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कणा गाव्यालाप्याश्च कशिपु त्वन्नमाच्छादनंद्वयं २१ तल्पंशय्याट्टदारेषु स्तंबेपि विटपोस्त्रि
यां प्राप्तरूपस्वरूपाभिरूपाबुधमनोज्ञयोः २२ भेद्यलिंगाअमी कूर्मीवीणाभेदश्च क
च्छपी कुतपोमृगरोमोत्थपटे चाह्नोष्टमेंशके २३ पांताः विवर्णोऽज्ञस्मितरेफो द्विरेफोव
र्बुरेपिव शफंमूलेतरूणां स्याद्गवादीनांखुरेपिव २४ गुंफास्यात्कुंथने हारेलंफारेपिव
गह्वरे शिक्याजत्यांसरितिमासिकापांवमातृते २५ फांताः अंतराभवसत्वेश्वेगंधर्वोदि
व्यगायने कंबुर्नावलये शंखे द्विजिह्वौ सर्पसूचकौ २६ पूर्वोन्यलिंग प्रागाह पुंबहुत्वेपि पू
र्वजान् भांताः कुंभौ घटेभमूर्द्धांशौ डिंभौतु शिशुबालिशौ २७ स्तंभौस्थूणाजडीभावौ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम
२१

शंभू ब्रह्मत्रिलोचनौ आश्रिभ्रूणार्भकागभांघ्रिश्रंभग्रगायेपिव ९८ स्याभेर्याउंडुभि
पुंसिस्यादक्षेउंडुभिस्त्रियां स्यान्महारजनेक्लीवंकुसुंभंकरकेपुमान् ९९ क्षत्रि
येपिचनाभिर्नासुरभिर्गवि वस्त्रियां सभासंसदिसभ्येवत्रिष्वध्यक्षेपिवल्लभः
३०० भांताः किरणप्रग्रहौरश्मीकपिभेकौप्लवंगमौ इछामनोभवौकामौसौ
र्योद्योगौपराक्रमौः १ धर्मापुण्ययमन्यायस्वभावाचारसोपमाः उपायपूर्वआ
रंभः उपधाव्याजपूपक्रमाः २ वणिक्पथपुरंवेदोनिगमोनागरोवणिक् नैगमौद्वौव उरु:
लेरामोनीलवास्त्रसितेपिच ३ शब्दादिपूर्वोवृंदेपिग्रामक्रांतौचविक्रमः गुल्मारुक २१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्वं च सेना च जामिः स्वसृकुलस्त्रियोः ४ क्षितिक्षान्त्योः क्षमा युक्ते क्षेमं शक्ते हिते त्रिषु त्विषु
श्यामौ हरित्कृष्णौ श्यामा स्यात्सारिवा निशा ५ ललामं पुच्छपुण्ड्राश्वभूषाप्राधान्यकेतुषु
सूक्ष्ममध्यात्ममप्याद्ये प्रधाने प्रथमस्त्रिषु ६ वामौ वल्गुप्रतीपौ द्वावधमौ न्यूनकुत्सितौ
जीर्णं च परिभुक्तं च यातयाममिदं द्वयं ७ ~~तामः~~ तुरंगगरुडौ तार्क्ष्यौ निलयापच
यौ क्षयौ श्वश्रुर्यौ देवलस्यालोभ्रातृव्यौ भ्रातृजं द्विषौ ८ पर्जन्यौ रसदब्देन्द्रौ स्यादर्यः
स्वामिवैश्ययोः तिष्यः पुष्ये कलियुगे पर्यायोवसरे क्रमे ९ प्रत्ययोधीनसपथज्ञा
नविश्वासहेतुषु रंध्रे शब्देथानुशयो दीर्घद्वेषानुतापयोः १० स्थूलोच्चयस्त्वाकार्त्स्न्ये

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



नागानांमध्यमेगते समयाःशपथाचारकालसिद्धांतसंविदः ११ व्यसनान्यशुभंदैवेविपदि
त्यनयाःस्त्रियः अत्ययोतिक्रमेकृच्छ्रेदोषेदण्डेप्यथापदि १२ युद्धायत्योःसंपरायःपूज्य
स्त्वश्वशुरेपिच पश्चादवस्थायिवलंसमवायश्चसंनयौ १३ संघातेसंनिवेशेचसंस्त्यायः
प्रणयास्त्वमी विश्रंभयाञ्चाप्रेमाणोविरोधेपिसमुच्छ्रये १४ विषयोयस्ययोज्ञातस्त
त्रशब्दादिकेष्वपि निर्यासेपिकषायोस्त्रीसभायांचप्रतिश्रयः १५ प्रायोभूम्न्यंतगमनेम
न्युर्दैन्येक्रतुक्रुधीः रहस्योपस्थयोर्गुह्यंसत्यंसपथतथ्ययोः १६ वीर्यंबलेप्रभावेचद्र
व्यंभव्येगुणाश्रयेः धिष्ण्यंस्थानेगृहेभेग्नौभाग्यंकर्मशुभाशुभं १७ कशेरुहेम्नोर्गांगे



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यंविशल्यादंतिकापिच वृषाकपायीश्रीगौर्योरभिख्यानामशोभयोः १८ आरंभो
निष्कृतिःशिक्षापूजनंसंप्रधारणं उपायकर्मचेष्टाचचिकित्साचनवक्रियाः १९
छायासूर्यप्रियाकांतिःप्रतिबिंबमनातपः कक्षाःप्रकोष्ठेहर्म्यादेःकांच्यांमध्येभबंधनं
२० कृत्याक्रियादेवतयोस्त्रिषुभेद्येधनादिभिः जन्यंस्याज्जनमेदेपिजघन्येऽधमेपिच
२१ गर्ध्योधीनौचवक्तव्यौकल्यौसज्जनिरामयौः अर्थवाननपेतोर्थादर्थ्येपुण्यंतुचार्व
पि २२ रूप्यंप्रशस्तरूपेपिवदान्योवल्गुवागपि न्याय्येपिमध्यंसौम्यंतुसुंदरेसोमदै
वते २३ यांताः निवहावसरौवारौसंस्तरौप्रस्तराध्वरौ गुरौगीष्पतिपित्राद्यौद्वापरौयु

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम गसंज्ञयोः २४ प्रकारोभेदसादृश्येआकारालिंगिताकृती किंसारुर्धान्यशूकेच मरुर्धन्व
११० धराधरौ २५ अद्रयोद्रुमशैलार्काः स्त्रीस्तनाब्दौपयोधरौ ध्वांतारिदानवावृत्रा बलिहस्तां
शवःकराः २६ प्रदराभंगनारीरुग्वाणाअस्त्राः कचाअपि अजातशृंगोगौः कालेप्य
श्मश्रुर्नातवरौ २७ स्वर्णेपिराःपरिकरःपर्यंकपरिवारयोः मुक्ताशुद्धौचतारःस्याच्छा
रोवायौसतुत्रिषुः २८ कर्बुरेथप्रतिज्ञाजिसंविदापत्सुसंगरः वेदभेदेगुप्तवादेमंत्रोमि
त्रोरवावपि २९ मखेषुयूपखंडेपिस्वरुःपण्यावत्सरः आडंबरस्तूर्यरवेगजेंद्राणांचग रम
र्जिते ३० अभिहारेभियोगेचचौर्येसंनहनेपिच स्याज्जंगमंपरीवारःखड्गकोशेपरि ११०

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हृदे ३१ विष्टरो विटपी दर्भे ग्रीष्मे पीठ यमासनं वारिवास्थे प्रतीहारः प्रतीहार्य प्यनंतरे
३२ पिप्पलेनजले विस्लौ वम्भुनापि गरो स्त्रिषु लारो वलेस्थिरो गेवल्मा प्येल्ली वंवरे त्रिषु ३३
दुरोदरो धूतं कारे पणो द्यूते दुरोदरं महारण्ये दुर्गपथे कांतारं पुंनपुंसकं ३४ मत्सरो
न्य शुभ द्वेषे तद्वत् कृपणयो स्त्रिषु देवाद्भुते वरः श्रेष्ठे त्रिषु क्लीवे मनाक् प्रिये ३५
वंशांकुरे करीरो स्त्री तरुभेदे घटे वना नावम्लु जगने हलः सूत्रे प्रतिसरो स्त्रियां ३६
यमानि रैद्रवंश वर्षि विस्फुलिंगाग्नि वाग्नि त्रिषु भूक्रोहि कपिभेकेषु हरिर्ना कपिले त्रिषु ३७
शर्करा कर्परी शेषि पात्रा स्याद्यापमेगनौ हाराभू वाकृ भ्राक् ज्वस्यान्तं झीनिर्ज्ञब्रतीः त्मओ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi





३८ धात्री स्यादुपमातापि क्षितिरप्यामलक्यपि क्षुद्रा व्यंगा नटी वेश्या सरघा कण्टकारिका
३९ त्रिषु क्रूरेधमेल्पेपि क्षुद्रं मात्रा परिछदे अल्पे च परिमाणे स्यान्मात्रं कार्त्स्न्येवधारणे ४०
आलेख्याश्चर्ययोश्चित्रं कलत्रं श्रोणिभार्ययोः योग्यभाजनयोः पात्रं वाहनपक्षयोः ४१
निदेशग्रन्थयोः शास्त्रं शस्त्रमायुधलोहयोः स्याज्जटांशुकयोर्नेत्रं क्षेत्रं पत्नीशरीरयोः ४२
मुखाग्रे क्रोडहलयोः पोत्रं गोत्रं तु नाम्नि च सत्रमाच्छादने यज्ञे सदादाने वनेपि च ४३
अजिरं विषये कायेप्यम्बरं व्योम्नि वाससि चक्रं राष्ट्रेप्यक्षरं तु मोक्षेपि क्षीरमप्सु च ४४ स्व
र्णेपि भूरिचन्द्रौ द्वौ द्वारमात्रेपि गोपुरं गुहादम्भौ गह्वरे द्वे रहोन्तिकमुपह्वरे ४५ पुरोधि



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कमुपर्यथागारे नगरे पुरं मंदिरं वाथ राष्ट्रोस्त्री विषयस्यादुपद्रवे ४६ दरोस्त्रियां भये श्व
भ्रे वज्रोस्त्री हीरके पवौ तंत्रं प्रधाने सिद्धांते सूत्रवाये परिछदे ४७ औशीरश्चामरे दंडे प्यौशी
रं शयनासने पुष्करं करिहस्ताग्रे वाद्यभांडमुखे जले ४८ व्योम्नि खड्गफले पद्मे तीर्थौषधि
विशेषयोः अंतरमवकाशावधिपरिधानांतर्धिभेदतादर्थ्ये ४९ छिद्रात्मीयविनाबहि
रवसरमध्यंतरात्मनि च मुस्तेपि पिठरं राजकशेरुण्यपि नागरं ५० शार्वरं त्वंधतमसे घा
तुके भेद्यलिंगकं गौरोरुणे सिते पीते व्रणकार्यप्यरुष्करः ५१ जठरं कठिनेपि स्यादधस्ता
दपि चाधरः अनाकुलेपि चैकाग्र्यो व्यग्रो व्यासक्त आकुले ५२ उपर्युदीच्यश्रेष्ठेष्वप्युत्तरं स्या

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अमः दन्तुरः। एषां विपर्यये श्रेष्ठे दूरानात्मोत्तमाः पराः ५३ स्वादुप्रियौ तु मधुरौ क्रूरौ कठिन
१०५ निर्दयौ। उदारो दातृमहतोरितरस्त्वन्यनीचयोः ५४ मंदस्वछंदयोः स्वैरः शुभ्रमुद्दीप्तशुक्ल
योः। रांताः। चूडा किरीटं केशाश्च संयता मौलयस्त्रयः ५५ द्रुमप्रभेदमातंगकाण्डपुष्पा
णि पीलवः। कृतान्तानेहसोः कालश्चतुर्थेपि युगे कलिः ५६ स्यात्कुरंगेपि कलमः प्रवारे
पि च कंबलः। करोपहारयोः पुंसि बलिः प्राण्यंगजे स्त्रियां ५७ स्थौल्यसामर्थ्यसैन्येषु बलं
ना काकसीरिणोः। वातूलः पुंसि वात्यायामपि वातासहे त्रिषु ५८ भेद्यलिंगः शठे व्यालः अमः
पुंसि श्वापदसर्पयोः। मलोऽस्त्री पापविट्किट्टान्यस्त्री शूलं रुगायुधं ५९ शंकावपि द्वयोः १०५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कीलः पालिस्त्र्यश्र्यंकपंक्तिषु कलाशिल्पे कालभेदे प्याली सख्यावली अपि ६० अब्ध्यंबुविकृतौ
वेला कालमर्यादयोरपि बहुला कृत्तिका गावो बहुलोऽग्नौ शितौ त्रिषु ६१ लीलाविलासक्रिय
योः रुपला सर्करापि च शोणितेंभसि कीलालं मूलमाद्ये शिफाभयोः ६२ जालं समूह आ
नायगवाक्षक्षारकेष्वपि शीलं स्वभावे संहृते सस्ये हेतुकृते फलं ६३ छर्दिनेत्ररुजो क्लीबं सम
हे पटलं न ना अधःस्वरूपयोरस्त्री तलं स्याच्चामिषे पलं ६४ और्वानलेपि पातालं चैलं वस्त्रे
धमे त्रिषु कुकूलं शंकुभिः कीर्णे श्वभ्रे ना तु तुषानले ६५ निर्णीते केवलमिति त्रिलिंगं त्वे
ककृत्स्नयोः पर्याप्तिक्षेमपुण्येषु कुशलं शिक्षिते त्रिषु ६६ प्रवालमंकुरेप्यस्त्री त्रिषु स्थू

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ
१०३

लं जडेपि च करालो दंतुरे तुंगे चारौ दक्षे च पेशलः ६७ मूर्खेर्भकेपि बालः स्याल्लोलश्चलसतृष्ण
योः लोलाः दवदावौ वनारण्यवह्नी जन्महरौ भवौ ६८ मंत्रीसहायसचिवौ पतिशाखि
नराधवाः अवयः शैलमेषार्का आज्ञाह्वानाध्वराहवाः ६९ भावः सत्तास्वभावाभिप्रायः
चेष्टात्मजन्मसुः स्यादुत्पादे फले पुष्पे प्रसवो गर्भमोचने ७० अविश्वासेपह्नवेव निकृताव
पि निह्नवः उत्सेकामर्षयोरिच्छाप्रसवे मह उत्सवः ७० अनुभावः प्रभावे च सतां च मतिनिश्च
ये स्याज्जन्महेतुः प्रभवः स्थानं चाद्योपलब्धये ७१ शूद्रायां विप्रतनये शस्त्रे पारशवः ७ मा
न ध्रुवो भभेदे क्लीबं तु निश्चिते शाश्वते त्रिषु ७२ सोज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोस्त्रियां

नाम:
१०३

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

घने स्त्री कटीवस्त्रबंधेपि नीवी परिपणोपि च ७३ शिवा गौरी फेरवयोर्द्वंद्वं कलहयुग्मयोः
द्रव्यासुव्यवसायेपि सत्वमस्त्री तु जंतुषु ७४ क्लीबं नपुंसकं षंढे वाच्यलिंगमविक्रमे श्रांताः
द्वौ विशौ वैश्यमनुजौ द्वौ वराभिवरौ स्पशौ ७५ द्वौ राशी पुंजमेषाद्यौ द्वौ वंशौ कुलमस्करौ
रहःप्रकाशौ वीकाशौ निर्वेशो भृतिभोगयोः ७६ कृतांते पुंसि कीनाशः क्षुद्रकर्षकयोस्त्रिषु
पदे लक्ष्ये निमित्तेपि देशः स्यात्कुशमप्सु व ७७ दशावस्थानेकविधाप्याशा तृस्नापि वायता
वशा स्त्री करिणी व स्याद्दृग्ज्ञाने ज्ञातरि त्रिषु ७८ स्यात्कर्कशः साहसिकः कठोरामसृणावपि
प्रकाशोतिप्रसिद्धेपि शिंशावज्ञे व बालिशः ७९ कोशोस्त्री कुड्मले खड्गेपिधानेर्थौघदिव्य

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम
१०३

णोः नाशः क्षयेनिरोधानेजीवितेशाश्वियामपि ८० नशांसत्वसौनिह्विंशौअंशुसूर्यांशवःकराः
शांताः सुरमत्स्यावनिमिषौपुरुषावात्ममानवौ ८१ काकमत्स्यौखगौध्वांक्षौकक्षौतुतृणवी
रुधौ अभीषुप्रग्रहरश्मौप्रैषःप्रेषणामर्दने ८२ पक्षःसहायेप्युष्णीषशिरोवेष्टकिरीटयोः
शुक्लेमूषिकश्रेष्ठेसुकृतेवृषभेवृषः ८३ द्यूतेक्षेमारिफलकेप्याकर्षोथाक्षमिंद्रिये नाद्यू
तांगेकर्षचक्रेव्यवहारेकलिद्रुमे ८४ कर्षूर्वार्ताकरीषाग्नौकर्षुःकुल्याभिधायिनी प्रभातेनत
क्षपायांवपौनपुंविषमप्सुच ८५ अपादानेप्यामिषंस्यादपराधोपिकिल्बिषं स्याद्दृष्टौ
लोकधात्वंशेवत्सरेवर्षमस्त्रियां ८६ प्रेक्षणार्थेक्षणांप्रत्ताभिक्षसेनार्थनाम्निति त्विट्शो

अम:
१०३

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भापित्रिपुरेन्मस्थं कात्स्यनिकृष्टयोः ८७ प्रसूक्ते विकृतेऽपूर्वे रूक्ष्यत्वप्रमाणविक्रमो यांताः
रविश्वेन छुदोहंसोम्मूर्यवृक्षी विभावसू ८८ वत्सो नराकवर्षो कोसारंगाम्लदिवौकसः श्रृंगारा
दो विषेती यैगुणो रागोऽद्भवे रसः ८९ प्रस्तुगं सावतंसो नो-- कूरेपिशेखरे देवभेदेऽनलेर
स्मौ वस्तूरत्ने धनेवसु ९० विम्मौत्रवेधास्वीता श्रीहिंनाशसाहिदंष्ट्रयोः लालसे प्रार्थनौत्सु
क्यो हिंसा चौर्यादिकर्मसु ९१ प्रसूरश्वापि भूपा वौरोदस्यो रोदसी वते ज्वाला भासो नपुंस्यर्चिः
श्रौतिर्भेयो तहविष्षु ९२ पायापराधयो रागः स्वगवाल्यादिनोर्वपः तेजः पुरीषयो र्वर्चो
महत्त्वनब्वर्चसोः ९३ रजोगुणो व स्त्रीपुष्पे राहोध्वांते गुणे तमः छंदः पद्येभिलाषे च तपः कृच्छ्रादि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



कर्म्मच सहोवलंसहामार्गोनभस्तुश्रावणोनभाः ओकःसद्माश्रयश्चौकः पयःक्षीरंपयोम्बुच
९५ ओजोदीप्तौवलेश्रोतः इंद्रियेनिम्नगारये तेजःप्रभावेदीप्तौचवलेशुक्रेप्यतस्त्रिषु ९६
विद्वान्विदंश्चवीभत्सोहिंस्रोप्यतिशयेत्वमी वृद्धप्रशस्ययोर्ज्यायान्कनीयांस्तुयुवाल्पयोः ९७
वरीयांस्तूरुवरयोःसाधीयान्साधुवाढयोः दलेपिवर्हेनिर्वंधोपरागार्कादयोग्रहाः ९८
द्वार्यापीडेक्वाथरसेनिर्यूहोनागदंतके तुलासूत्रेश्वादिरश्मौप्रग्रहःप्रग्रहेपिच ९९ पत्नी
परिजनादानमूलशापाःपरिग्रहाः दारेषुचगृहाःश्रोण्यामप्यारोहेवरस्त्रियाम् ४००
व्यूहोवृंदेप्यहिर्वृत्रेप्यग्नीन्द्वर्कास्तमोपहाः परिच्छदेनृपार्हेर्थेपरिवर्होव्ययाःपरे १ नानार्था



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आङीषदर्थेभिव्याप्तौ सीमार्थे धातुयोगजे आप्रगृह्यः स्मृतौ वाक्येप्यास्तु स्यात्कोपपीडयोः २
पापकुत्सेषदर्थे कु धिङ्निर्भर्त्सननिंदयोः चान्वाचयसमाहारेतरेतरसमुच्चये ३ स्वस्त्याशीःक्षेम
पुण्यादौ प्रकर्षे लंघनेप्यति स्वित्प्रश्ने च वितर्के च तु स्याद्भेदेवधारणे ४ सकृत्सहैकवारे स्यादा
राद्दूरसमीपयोः प्रतीच्यां चरमे पश्चादुताप्यर्थविकल्पयोः ५ पुनःसहार्थयोःशश्वत्सा
क्षात्प्रत्यक्षतुल्ययोः प्रतिप्रतिनिधौ वीप्सालक्षणादौ प्रयोगतः ६ इति हेतुप्रकरणप्रकाशादि
समाप्तिषु प्राच्यां पुरस्तात्प्रथमे पुरार्थेग्रत इत्यपि ७ यावत्तावच्च साकल्येवधौ मानेवधार
णे मंगलानंतरारंभप्रश्नकार्त्स्न्येष्वथो अथ ८ वृथा निरर्थकाविध्योर्नानानेकोभयार्थयोः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम: तपृछायांविकल्पेचपश्चात्सादृश्ययोरनु ९ प्रश्नावधारणानुज्ञानुनयामंत्रणेननु गर्हास
१०५ मुच्चयप्रश्नेशंकासंभावनास्वपि १० उपमायांविकल्पेवासामित्वर्द्धेजुगुप्सिते अमासह
समीपेचकंवारिणिचमूर्द्धनि ११ इवेत्थमर्थयोरेवंनूनंतर्केर्थनिश्चये तूष्णीमर्थेसुखेजो
षंकिंपृछायांजुगुप्सने १२ नामप्राकाश्यसंभाव्यक्रोधोपगमकुत्सने अलंभूषणपर्या
प्तिशक्तिवारणवाचकं १३ हुंवितर्केपरिप्रश्नेसमयांतिकमध्ययोः पुनरप्रथमेभेदे
निर्निश्चयनिषेधयोः १४ स्यात्प्रबंधेचिरातीतेनिकटागामिकेपुरा ऊररीचोररीच राम:
विस्तारेंगीकृतेत्रयं १५ स्वर्गेपरेचलोकेस्वर्वार्तासंभाव्ययोःकिल निषेधवाक्यालंकार १०५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जिता सानुनये खलु समीपोभयतः शीघ्रं साकल्याभिमुखेभितः जन्मप्रकाशयोः प्रादुर्मिथो
न्योन्यं रहस्यपि १७ तिरोंतर्द्धौ तिर्यगर्थे हाविषादरुगार्तिषु अहहेत्यद्भुते खेदे हिहेताव
वधारणे १८ इत्यनेकार्थवर्गः ४ चिरायचिररात्रायचिरस्याद्याश्चिरार्थकाः मुहुः
पुनःपुनः शश्वदभीक्ष्णमसकृत्समाः १९ स्राक्झटित्यंजसाह्नाय मंक्षुद्राक्सपदिद्रुतं
बलवत्सुष्ठुकिमुत स्वत्यतीव निर्भरे २० पृथग्विनांतरेणर्ते हिरुङ्नाना च वर्जने यतद्य
तस्ततो हेतावसाकल्ये तु चिच्चन २१ कदाचिज्जातु सार्द्धं तु साकं सत्रा समं सह आनुकूल्या
र्थकं प्राध्वं व्यर्थकं तु वृथा मुधा २२ आहोउताहो किमुत विकल्पे किं किमूत च तुहिचस्मह वै

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम

१०६

पादपूरणेपूजनेऽस्त्विति २३ दिवाह्नीत्यथ दोषा च नक्तं च रजनाविति तिर्यगर्थे साचि तिरो

प्यथ संबोधनार्थकाः २४ स्युः प्याट् पाडंग हे है भोः समया निकषा हिरुक् अतर्किते तु स

हसाकस्मात्पुरः पुरतोऽग्रतः २५ स्वाहा देवहविर्दाने श्रौषट् वौषट् वषट् स्वधा किंचिदीषत्

मनागल्पे प्रेत्यामुत्र भवांतरे २६ यथा तथा चैवं साम्ये अहो ही इति विस्मये मौने तु तू

ष्णीं तूष्णीकं सद्यः सपदि तत्क्षणे २७ दिष्ट्या समुपजोषं चेत्यानंदेऽथांतरेऽन्तरा अंत

रेण च मध्ये स्युः प्रसह्यं तु हठार्थकं २८ युक्ते द्वे सांप्रतं स्थानेऽभीक्ष्णं शश्वदनारते अ

भावे नह्यनो नापि मास्म मालं च वारणे २९ पक्षान्तरे चेद्यदि च तत्त्वे त्वद्धाञ्जसा द्वयम

पुरा:

१०६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकाशेप्राउराविःस्यात्सेमेवंपरमंमते २० समंततस्तुपरितःसर्वतोविष्वगित्यपि अका
मानुमतौकामम्असूयोपगमेस्तुच २१ नचस्याद्विरोधोक्तौकच्चित्कामप्रवेदने निः
षमंदुःषमंगर्ह्येयथास्वंतुयथायथं २२ मृषामिथ्याचवितथेयथार्थंतुयथातथम्
स्युरेवंतुपुनर्वैवेत्यवधारणवाचकाः २३ प्रागतीतार्थकंनूनमवश्यंनिश्चयेद्वयं सं
वद्वर्षेऽवरेत्वर्वागामेवंस्वयमात्मना २४ अल्पेनीचैर्महदुच्चैःप्रायोभूम्न्यद्रुतेशनैः
सनानित्येबहिर्बाह्येस्मातीतेस्तमदर्शने २५ अस्तिसत्वेरुषोक्तावुप्रश्नेऽनुनयेत्वयि
तर्केऊंस्यादुषारात्रेरवसानेनमोनतौ २६ अंगीकृतौस्यादथकिंहीनसंबोधनेत्वरे ला

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम॰ यंसाये प्रगे प्रातः प्रभाते निकषांतिके ४७ परुत्परार्येषमो ऽब्दे पूर्वे पूर्वतरे यदि अद्यात्राह्न्यथ पू
१५९ र्वेह्नीत्यादौ पूर्वोत्तरापरा ४८ तथाधरान्यान्यतरेतरात्पूर्वेद्युरादयः उभयेद्युश्चोभयेद्यु
परे त्वह्नि परेद्यवि ४९ ह्योऽतीतेऽनागतेऽह्नि श्वः परश्वस्तत्परेऽहनि तदा तदानीं युगपदेक
दा सर्वदा सदा ५० एतर्हि संप्रतीदानीमधुना सांप्रतं तथा दिग्देशकाले पूर्वादौ प्रागुदक्
प्रत्यगादयः ५१ इत्यव्ययवर्गः ५ सलिंगशास्त्रैः सन्नादिकृत्तद्धितसमासजैः अनु
क्तैः संग्रहो लिंगं संकीर्णवदिहोन्नयेत् ५२ लिंगशेषविधिर्व्यापी विशेषैर्यद्यबाधितः राम॰
स्त्रियामीदूद्विरामैकाच्सयोनिप्राणिनाम च ५३ नाम विद्युन्निशा वल्ली वीणा दिग्भू न १५९

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दीत्विपां अदंमैछिगुरेकार्थैर्नव पात्रशुगादिभिः ४४ नलहृदे यौनिकथात्रावैरमैथुनिका
दिथुन् स्त्रीभावादवनिक्ति नगुलपत्रकपोशुजिह्निशाः ४५ उणादिशुनित्रीश्म
श्मावृक्षगंबलांश्यरं नतकीअपाग्रहसाबेन्मोयापोध्ववामादिक पमोगःसाक्षिपास्यो
वेदांउपानाहिफाल्गुनी श्येनंपानावमलपानैलंपानास्वधेतिव ४६ स्त्रीस्याकाविन्मणा
त्यादिर्विविशोपदवपेपदि लंकागोपालिकाटीकाधानकीफंजिकाठकी ४७ सिध्रकाला
रिकाहिकाग्रावकोल्कापिपीलिका तिंदुकीकर्णिकीभंगीशुरंगीशुविमाठयः ४८ पि
छाविततंडावाकिरापश्चालिःस्फारणीदणीदरात मातिःकंथानथासपीनाभीराजसभालिति

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



जंभा रंभा ब्रमधुरा प्वार्जा प्रियंगि रापिव रुक्षरी वर्वरी पारी होरा लघा यत्सिमला ५१ लाक्षालि
क्षावगंडूषा गंधुसीवमसीमषी इति स्त्रीलिंगसंग्रहः ८ पुंस्त्वे समेदाउर्वराः सपर्ण्याः कुराकुराः
स्वर्गेयागाद्रिमेघाब्धिद्रुकालासिशरारयः करगंडौष्ठदोर्दंतकंठकेशनखस्तनाः ५३ अह
न्ताः क्ष्वेडभेदा रात्रांताः प्रागसंख्यकाः श्रीवेष्ठाद्या रुनिर्यासा जनेनाअपिवाधिता ५४
कसेरुजतु वस्तूनि हित्वा तु रुविरामकाः कषणाभकरोपांता यद्यदंता अमीअथ ५५ प
थनपशनेपांता गोत्राख्याश्चरणाकयाः नाम्नि कर्त्तरि भावे च घञजप्नङणघाजुच ५६
स्नुः कर्त्तरि मनिन् भावे नौ धाद्विः प्रादितोन्यतः इ देश्च वडवा वश्च वंडं वंनु समाहृते ५७



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कांतसूर्य्येन्दुपर्य्यायपूर्वोय्यः पूर्षिकोपिच बटकश्चातथाकाश्च वलकश्चकूहूकंगकः ५८
पुंस्त्वे म्लवः समुद्गश्च विहपहपनशाणः कोघरघहट्टघश्च पिंडगोडपिवंडवत ५९ गंडः
कारंडोलगुडोवरंडश्च किणोपुराः इति श्रीमंतहारीतोदेमंथोजीथवुड्डाः ६० वासम
दोस्तुदः कुंदः फेनत्सूपौलपूपको आतपः क्षत्रियोनाभिः कुणपः क्षुरकोदरः ६१ पूरक्ष
रप्रकृत्याश्च गोलहिंगुलगुग्गुलाः वेतालमल्लभल्लाश्च पुरोडासेपि पट्टिशः ६२ कल्माषो
रभसश्चैव शकलाहः पतद्ग्रहः इति त्रिलिंगशेषः ९ छिद्रीनेत्रचारवारापपणश्चिग्न हि
मोदकं ६३ शीतोष्णमांसरुधिरमुखाक्षिद्रविणांचलं हलहेमशुल्वलोहसुखदुःखशुभा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अम॰ शुभं ६४ जलप्रणालिवर्गां व्यंजनान्यनुलेपनं कोधाः शतादिसंख्यान्यालक्षाद्व सं
११९ नंवमत् ६५ द्वेक्षमसिक्तसंनूतंपदंनान्तमकर्मीरि चातंसलोपर्थंशिष्टंराजंप्राक्संख्य
यान्वितं ६६ पात्राद्यदंतैरेकार्थोद्विगुर्लक्ष्यानुसारतः द्वंद्वैकत्वाव्ययीभावौपथः संख्या
व्ययात्परः ६७ षष्ठ्याश्छायातु बहूनां वेत्तविछायसंहतौ सभा शालार्थापिपराराजा
मनुष्यार्थादराजकात् ६८ दासीसभंनृपसभं रक्षःसभमिमादिशः उपज्ञोपक्रमांता
स्य तदादित्वप्रकाशने ६९ कोपज्ञकोपक्रमकं कथोशीनरनामसु भावेत्तंनकविभ्यो रामः
ऽसेसमूहे भावकर्मणोः ७० अदंतप्राग्भयाः पुण्यसुदिनाभ्यामहः परा क्रियाव्ययानां ११९

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भेदंकान्यैकत्वेपुंस्यनोऽके ७१ वीवधंपिछंगृहस्थूणांकिरीटंकर्मयोजने राजसूयंवाजपे
यंगद्यपद्यकृतौकवे: ७२ मणिकाश्मभाष्यासिंदूरंचीरचीवरपंजरम् लोकायितहरीताल
विदलंस्थलबाह्लिकं ७३ इतिनपुंसकलिंगशेषः पुंनपुंसकयो:शेषोर्धर्चपिण्या
कपाटका: मोदकस्तुंडकष्टंक:शाटक:कर्बटोर्बुद: ७४ पातकोद्योगचरकतमालाम
लकानड: कुष्ठंमुंडंसीधुपुस्तंक्ष्वेडितंक्षेमकुट्टिमम् ७५ संगमंशतमानार्मशबलाव्य
यताण्डवं कवियकंदकर्पासपारवारयुगंधुरं ७६ यूपप्रग्रीवपात्रीवयूषंचमसचि
क्कसौ अर्धर्चादौघृतादीनांपुंस्त्वाद्यंवैदिकंध्रुवं ७८ तन्नोक्तमिहलोकेपितच्चेदस्त्य

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

अम
१११

नशेषवत् इति नपुंसकशेषः ९ स्त्रीपुंसयोरपत्यांताद्विचतुःषट्पदोरगाः ७९ जातिभे
दाः पुमाख्याश्च स्त्रीयोगैः सहमल्लकः ऊर्मिर्वराटकः स्वाती वर्णको झाटलिर्मनुः ८० मू
षा सृपाटी कर्कंधूर्यष्टिः शाटी कटी कुटी इति स्त्रीपुंसशेषः १० स्त्रीनपुंसकयोर्भावक्रियो
ः ष्यञ् क्वचिच्च वुञ् ८१ औचित्यमौचिती मैत्री मैत्र्यं वुञ् प्रागुदाहृतः षष्ठ्यंतः प्राक्
पदं सेनाछायाशालासुरानिशाः ८२ स्याद्वा नृसेनं श्वनिशं गोशालमितरे च दिक् अ
बंतोत्तरपदो द्विगुश्चापुंसि नश्च लुक् ८३ त्रिखट्वं त्रिखट्वी च त्रितक्ष्यं च त्रितक्ष्यपि
त्रिपूपादीपुटी वाटी पेटी उवलपाडिमौ ८४ इति त्रिलिंगाः ११ परंलिंगं स्वप्रधाने

अमः
१११

CC-0. Digitized by eGangotri and MIDF- Delhi

अम
११९

द्वंद्वैतत्पुरुषेपितत् अर्थांताः प्राद्यलंप्राप्तापन्नपूर्वाः परोपगाः ८५ तद्धिता
र्थे द्विगुः संख्यासर्वनामतदंतकाः बहुव्रीहिरदिङ्नाम्नामुन्नेयंतदुदाहृतं
गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः कृतः कर्त्तर्यसंज्ञायां कृत्याःकर्मणिकी
र्तिताः ८७ अनाद्यंतास्तेनरक्ताद्यर्थैर्नानार्थभेदकाः षट्संज्ञकास्त्रिषुसमायुष्म
दस्मदमाङ्व्ययम् ८८ परंविरोधेशेषंतुलोकंशिष्टप्रयोगतः ८९ इतिलिंगादि
संग्रहवर्गः ९२ इत्यमरसिंहकृतौनामलिंगानुशासने काण्डस्तृतीयसामा
न्यः सांगएवसमर्थितः १५०३ शुभमस्तुसर्वजगताम् ◎ श्रीरस्तु

राम
११९

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

This PDF you are browsing is in a series of several scanned documents containing the personal colleciton of Jagannath Bhattarai ji from Kathmandu, Nepal.

CV:

Jagannath Bhattarai
Date of Birth: 31 December 1960
Place of Birth: Kathmandu, Nepal
Address: Nagarjun (Ramkot), Kathmandu

Educational Qualifications
Bachelor of Science (B.Sc.) – Major in Biology
Master's Degree – Sociology & Anthropology
Shastri (Ongoing) – Balmiki Vidyapeeth

Professional Experience
Government School Teacher (Madhyamik Pratham Shreni)
Taught at Secondary Level (Madhyamik)
Taught at Higher Secondary Level (Uchcha Madhyamik)
Served as Head Teacher
Led academic and administrative development
Strengthened institutional performance and student outcomes

Areas of Interest
Sanskrit Vyakaran
Spiritual & Philosophical Studies
Educational Leadership

Digitization by eGangotri Trust
Funding by MIDF, New Delhi